॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
६४

साहित्यदर्पणालोकः

(प्रश्नोत्तरात्मकः)

सम्पादक—
श्री रामजीलाल शर्मा
साहित्यदर्शनाचार्य
साहित्यविभागाध्यक्ष
आर्य गुरुकुल महाविद्यालय, सिरसागंज (मैनपुरी)

चौखम्बा सुरभारती प्रकाशन
वाराणसी

॥ श्रीः ॥ १५१२

चौखम्बा सुरभारती ग्रन्थमाला

६४

साहित्यदर्पणालोकः

(साहित्यदर्पण-प्रश्नोत्तरी)

सम्पादक—

श्री रामजीलाल शर्मा

साहित्यदर्शनाचार्य

साहित्यविभागाध्यक्ष

आर्य गुरुकुल महाविद्यालय, सिरसागंज (मैनपुरी)

चौखम्बा सुरभारती प्रकाशन

वाराणसी

प्रकाशक
चौखम्बा सुरभारती प्रकाशन
के० ३७/११७, गोपालमन्दिर लेन
पो० बा० नं० ११२९, वाराणसी २२१००१
दूरभाष : ३३३४३१

सर्वाधिकार सुरक्षित

षष्ठ संस्करण १९९२

मूल्य { १–[illegible]
७–[illegible]
सम्पूर्ण २५–००

अन्य प्राप्तिस्थान
चौखम्बा संस्कृत प्रतिष्ठान
३८ यू. ए., जवाहरनगर, बंगलो रोड
पो० बा० नं० २११३
दिल्ली ११०००७
दूरभाष : २३६३९१

*

प्रमुख वितरक
चौखम्बा विद्याभवन
चौक (बनारस स्टेट बैंक भवन के पीछे),
पो० बा० नं० १०६९, वाराणसी २२१००१
दूरभाष : ३२०४०४

मुद्रक
श्रीजी मुद्रणालय
वाराणसी

१५९२

प्रस्तावना

समस्त आलङ्कारिक ग्रन्थों में साहित्यदर्पण' ही एक ऐसा ग्रन्थ है, जो काव्य के समस्त अङ्गों पर प्रकाश डालने से सर्वाङ्गपूर्ण कहा जा सकता है। यही कारण है कि भारतवर्ष के प्राय: सभी विश्वविद्यालयों ने इस महान् ग्रन्थ को संस्कृत की परीक्षाओं में पाठ्य-ग्रन्थ के रूप में स्वीकृत किया है। यद्यपि इसमें विषय-विवेचन 'काव्यप्रकाश' आदि ग्रन्थों की अपेक्षा अधिक सुगम एवं स्पष्ट है, किन्तु फिर भी मध्य-मध्य में जहाँ शास्त्रार्थ सम्बन्धी स्थल हैं, वहाँ विषय जटिल एवं गम्भीर हो गया है। इसी कारण अनेक स्थलों पर सामान्य टीकाकारों का तो कहना ही क्या, साहित्यदर्पण के प्रसिद्ध टीकाकार श्रीरामचरण तर्कवागीश जैसे विद्वान् भी उलझन में फंस गये हैं और ग्रन्थकार के आशय को ठीक प्रकार से न समझ सकने के कारण अर्थ का अनर्थ कर बैठे हैं। ऐसी स्थिति में सामान्य विद्यार्थियों के लिए साहित्यदर्पण को ठीक प्रकार समझ लेना अत्यन्त कठिन है। उसमें भी आज के परीक्षा-युग में छात्र के लिए साहित्यदर्पण को समझकर प्रश्नों के समुचित उत्तर लिखना तो अत्यन्त टेढ़ी खीर है। सामान्य अध्यापक भी बड़े-बड़े शास्त्रार्थों, लक्षण एवं ध्वनि सम्बन्धी प्रश्नों के उत्तर लिखने में प्राय: कठिनाई का अनुभव करते हैं।

अत: प्रिय छात्रो ! मैं आपकी इस कठिनाई को ध्यान में रखते हुए साहित्यदर्पण की प्रश्नोत्तरी 'साहित्यदर्पणालोक' के लेखन में प्रवृत्त हुआ हूँ। इसमें साहित्यदर्पण के सभी प्रष्टव्यांशों एवं शास्त्रार्थ के स्थलों को परीक्षोपयोगी ढङ्ग से लिखा गया है तथा ग्रन्थकार के वास्तविक आशय को हृदयङ्गम कराने का पूर्ण प्रयत्न किया है। इससे छात्रों को जहाँ प्रश्नों के उत्तर लिखने में निपुणता प्राप्त होगी, वहीं उन्हें ग्रन्थ के आशय को समझने का सामर्थ्य भी प्राप्त होगा। प्रश्नों के साथ ही इसमें विभिन्न विश्वविद्यालयों में पूछे गये प्रश्नों का भी सङ्केत किया गया है। इस प्रकार यह संस्करण छात्रों की समस्त आवश्यकताओं को पूर्ण करता है।

अब मैं 'चौखम्बा सुरभारती प्रकाशन' के अध्यक्ष महोदय को धन्यवाद देता हूँ, जिनके बार-बार आग्रह से मैं अनेक अध्यापनादि कार्यों में व्यस्त रहते हुए भी इस कार्य में प्रवृत्त हुआ ~~तथा~~ जिन्होंने इस पुस्तक के प्रकाशन का भार स्वयमेव स्वीकार किया है। साथ ही मैं अपने प्रिय शिष्य आचार्य श्री बहोरी लाल शर्मा (प्रो० श्री लक्ष्मणदास यजुर्वेद महाविद्यालय, खुर्जा) को भी बिना धन्यवाद दिये नहीं रह सकता हूँ, जो मेरे लेखनादि कार्यों में निरन्तर सहयोग प्रदान कर मुझे अन्यान्य ग्रन्थ लिखने के लिए प्रोत्साहित करते रहते हैं। अन्त में मैं परम तपस्वी श्रद्धेय श्री स्वामी सुमेधानन्दजी महाराज, अध्यक्ष—दयानन्द मठ, चम्बा (हि० प्र०) को भी अनेक धन्यवाद देता हूँ, जिन्होंने मुझे समस्त सांसारिक चिन्ताओं से मुक्त कर रखा है तथा जो निरन्तर मेरे कल्याण की कामना करते रहते हैं।

इस प्रश्नोत्तरी के लिखने का मेरा उद्देश्य काव्य के समस्त तत्त्वों—काव्य-स्वरूप तथा भेद, गुण, दोष, अलङ्कार एवं रसादि का संक्षेप में ज्ञान कराते हुए साहित्यदर्पण जैसे जटिल ग्रन्थ को हृदयङ्गम कराना है। यदि मैं अपने उद्देश्य में सफल हुआ तथा छात्र-वर्ग को इससे उचित लाभ हुआ तो मैं अपने परिश्रम को सफल समझूँगा। अब मैं यह कहकर अपने वक्तव्य को विराम देता हूँ—

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः॥

॥ इति शम् ॥

श्रावणशुक्ल तृतीया
संवत् २०३६

विदुषां वशंवदः
रामजीलाल शर्मा

प्रश्नानुक्रमणिका

१ साहित्यदर्पणस्य कर्त्ता कः ? कदा कुत्र चासौ साहित्यसुधाधारां प्रवाहयामास ? इति सप्रमाणं दर्शयत । १

२ काव्यस्य प्रयोजनं प्रतिपाद्य प्रमाणानि दर्शनीयानि । २

३ वेदादिषु सत्सु चतुर्वर्गफलप्राप्तये काव्यस्य कियानुपयोगः ? इति लिखत । ३

४ मम्मटोक्तं काव्यलक्षणमुल्लिख्य विश्वनाथोक्तदिशा सन्दूष्य युक्तायुक्तत्वे विचार्यताम् । ४

५ वक्रोक्तिजीवितकारोक्तं काव्यलक्षणं विश्वनाथोक्तदिशा सन्दूष्य स्वमतं प्रदर्श्यताम् । ६

६ भोजदेवकृतं काव्यलक्षणमुपपाद्य विश्वनाथदिशा खण्डयत । ७

७ ध्वनिकारोक्तं काव्यलक्षणमुक्त्वा विश्वनाथदिशा निरस्य स्वमतं लिखत । ७

८ विश्वनाथोक्तं काव्यलक्षणं सोदाहरणं प्रतिपाद्यताम् । ८

९ विश्वनाथोक्तकाव्यलक्षणस्य युक्तायुक्तत्वे विचारणीये । ९

१० गुणानां रसधर्मत्वात् रसात्मकस्य वाक्यस्य काव्यत्वात् कथं गुणाः काव्योत्कर्षहेतवः ? इति प्रतिपाद्यताम् । १०

११ 'वाक्यं स्याद् योग्यताकांक्षासत्तियुक्तः पदोच्चयः' कारिकेयं साधु व्याख्येया । १०

१२ 'आकाङ्क्षायोग्यतयोरात्मार्थधर्मत्वेऽपि पदोच्चयधर्मत्वमुपचारात्' इति पङ्क्तिर्व्याख्येया । ११

१३ साहित्यिकाः कुत्र शक्तिग्रहं मन्यन्ते, कुत्र नेति यथाशास्त्रं वर्णयत । १२

१४ रूढिं प्रयोजनं विनापि लक्षणालक्षणे दोषोऽस्ति न वेति विविच्यात्र दण्डचक्रन्यायेन कारणता, उत तृणारणिमणिन्यायेनेति प्रतिपाद्यताम् । १३

१५ उपादानलक्षणया लक्षणलक्षणतो वैलक्षण्यमुदाहरणद्वारा स्फोटनीयम् । १३

१६ काव्यप्रकाशोक्तं 'कर्मणि कुशलः' इति लक्षणोदाहरणं दर्पणोक्तदिशा खण्डनीयम् । १४

१७ का नाम लक्षणा ? कुत्र कथं चास्याः प्रयोगः ? कतिविधा च सा ? इति सोदाहरणं लिख्यताम् । १४

१८ 'गौर्वाहीकः' इत्यत्र का नाम लक्षणा ? कुत्र च सा ? इति सविशदं विविच्यताम् । १६

१९ का नाम व्यञ्जना ? कुत्रोपयुज्यते ? कतिविधा च सा ? इति साधु विविच्यताम् । १७
२० अनेकार्थस्य शब्दस्य वाचकतायां के नियामका भवन्ति ? इति विशदं विविच्य लिखत । १७
२१ काव्ये स्वरस्योदाहरणमस्ति न वा ? अस्ति चेत् कथं नोदाहृतम् ? नास्ति चेत् किं प्रमाणम् ? इति यथाशास्त्रं विविच्यताम् । १९
२२ तात्पर्यवृत्तिस्वीकारे का वाचोयुक्तिः ? साहित्यिकास्तां स्वीकुर्वन्तु न वा ? इति विशदं विविच्यत । २०
२३ 'विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिः' इति रसस्य स्वप्रकाशत्वम् अखण्डत्वं च यथा सिद्ध्यति तथोपपाद्य रसानुभूतिः क्व ? इति प्रतिपादयत । २०
२४ रसस्य सुपरिष्कृतं सामान्यलक्षणमभिधाय क्वचिल्लक्ष्ये समन्वयः क्रियताम् । कश्च तस्यास्वादनप्रकारः ? २२
२५ विभावानुभावसञ्चारिसात्त्विकभावानां लक्षणमभिधीयताम् । २३
२६ वत्सलरसः कस्य मते ? तत्र—'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ॥' इति विरोधपरिहारः कथम् ? इति साधु विवेचनीयम् । २४
२७ करुणादीनां रसानां दुःखमयत्वात् कथं रसत्वम् ? कथं वा दुःखकारणेभ्यः सुखोत्पत्तिः ? इति लिख्यताम् । २५
२८ 'नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवति व्यञ्जनायाश्च ज्ञानविशेषत्वाद् द्वयोरैक्यमापतितम्' अस्याः पङ्क्तेराशयः विशदीक्रियताम् । २६
२९ साधारणीकरणव्यापारस्वीकारे वाचोयुक्तीः प्रदर्शयत । २६
३० रसास्वादे विभावादीनामेकः प्रतिभासः कथमुत्पद्यते ? विविच्य लिखत । २७
३१ यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्तत् कथं तेषामेकस्य द्वयोर्वा सद्भावेऽपि स स्याद् ? इति विविच्य लिखत । २७
३२ 'अनुकार्यगतो रस' इति कस्य मतं ? किं च तत्कथनं भवते रोचते ? इति सम्यक् प्रतिपादयत । २८
३३ रसस्यानुकर्तृगतत्वं कस्य मते ? किञ्च तस्य मतं भवते रोचते ? इति विशदं विविच्यताम् । २८
३४ रसस्यालौकिकत्वं सत्यत्वं स्वप्रकाशत्वं च व्यवस्थाप्यताम् । २९

३५ को नाम नायकः ? कतिविधश्च सः ? कानि च तेषां लक्षणानि ? सोदाहरणं लिखत । ३०

३६ नायकस्य कस्मिन् विषये के सहायाः ? इति लिखत । ३१

३७ का नाम नायिका ? कतिविधा च सा ? इति नामतो निर्देश्या । ३२

३८ नार्या भावाभिव्यक्तेः साधनानि प्रदर्शयत । ३२

३९ विभावादीनां परिचयो देयः । ३२

४० अनुभावानां परिचयो देयः । ३३

४१ व्यभिचारिणां किं स्वरूपम् ? कतिविधाश्च ते ? इति विशदं विवेचयत । ३३

४२ सात्त्विकभावानां परिचयो देयः । ३४

४३ को नाम भावः ? विमृश्य लिखत । ३४

४४ स्थायिभावानां परिचयो देयः । ३५

४५ रसभेदानुक्त्वा शृङ्गारस्य भेदौ चोपपाद्य करुणविप्रलम्भस्वरूपमुपपाद्यताम् । ३५

४६ ध्वनेः सामान्यलक्षणमभिधाय क्वचित्समन्वयं प्रदर्श्य ध्वनि-गुणीभूत-व्यङ्ग्ययोर्भेदं युक्त्या संस्थाप्य च तद्भेदान् संक्षेपेण प्रदर्शयत । ३६

४७ अविवक्षितवाच्यस्य (लक्षणामूलस्य) ध्वनेः भेदौ सोदाहरणौ विवेचनीयौ ३९

४८ 'भ्रम धार्मिक विश्रब्धम्' इत्यादौ भ्रमणविधेः प्रकृतेऽनुपयुक्ततया निषधपरत्वात् कथं न विपरीतलक्षणेति विचार्य लिखत । ४०

४९ 'अमितः समितः प्राप्तैः' इत्यादौ पद्ये व्यङ्ग्यार्थः प्रदर्शनीयः । ४०

५० 'धन्यः स एव तरुणो' इति पद्यं कस्योदाहरणतयोपन्यस्तं दर्पणकारेण ? इति निर्णीय व्यङ्ग्यार्थः प्रदर्शनीयः । ४१

५१ 'त्वामस्मि वच्मि' इति पद्यं कस्योदाहरणतयोपन्यस्तं दर्पणकारेण ? इति निर्णीय व्यङ्ग्यार्थोऽत्र प्रदर्शनीयः । ४१

५२ 'तदप्राप्तिमहादुःख' इति पद्ये व्यञ्जकनिर्देशपुरःसरं व्यङ्ग्यार्थं स्पष्टीकुरु । ४२

५३ 'काव्यार्थस्याखण्डबुद्धिवेद्यस्य'''तस्यास्वादमात्रायत्तत्वात्' । सङ्गतिपूर्वकं व्याख्यातव्योऽयमंशः । ४३

५४ चित्राख्यस्तृतीयः काव्यभेदः साहित्यदर्पणकृतोऽभिमतो न वा ? सम्यगालोचनापूर्वकं सप्रमाणं स्वमतप्रदर्शनमप्यत्रापेक्षितम् । ४४

५५ गुणीभूतव्यङ्ग्यप्रभेदाः नामतः प्रदर्शनीयाः । ४५

५६ अभिधाया व्यङ्ग्यार्थबोधनाक्षमत्वं विविच्यताम् । ४५
५७ तात्पर्यावृत्त्या व्यञ्जनाया गतार्थत्वं निरस्यताम् । ४७
५८ लक्षणाभिधे रसस्य बोधिके न वा ? इति विचार्यताम् । ४८
५९ 'नीलादिसंवेदनानन्तरमेव ज्ञातताया अनुव्यवसायस्य वा सम्भवः' । इति पङ्क्तिः सोपष्टम्भं व्याख्येया । ४९
६० व्यक्तिविवेककाराणां महिमभट्टानां मतेन रसादिव्यङ्ग्यस्य अनुमानगतार्थतां संसाध्य तत्खण्डनप्रकारः प्रदर्शनीयः । ५०
६१ महिमभट्टाभिमतं वस्त्वलङ्कारयोरनुमानगतार्थत्वं संसाध्य तस्य खण्डनप्रकारः प्रदर्शनीयः । ५१
६२ रसस्य अर्थापत्तिवेद्यत्वं निरस्य सूचनबुद्धिवेद्यत्वं स्मृतित्वं च खण्डनीयम् । ५३
६३ रसात्मकवाक्यस्य काव्याङ्गत्वाङ्गीकारे वाक्यस्य न दर्शनयोग्यता, इति कथं काव्यस्य दृश्यत्वसिद्धिः ? इति विचार्य लिखत । ५४
६४ काव्यस्य ध्वनिर्गुणीभूतव्यङ्ग्यदृश्यश्रव्यभेदैश्च चातुर्विध्यात् काव्यं चतुर्धा इति कुतो नोक्तम् ? इति विचार्यताम् । ५४
६५ दृश्यकाव्यस्वरूपमुल्लिख्य अभिनयस्य च लक्षणमभिधाय तद्भेदांश्च प्रदर्श्य रूपकाणि कति उपरूपकाणि च कति ? इति विवेचयत । ५४
६६ नाटकस्य लक्षणं विलिख्य तत्र केषां केषां कार्याणां प्रतिपादनं दर्शनं वा निषिद्धमिति विविच्य लिखत । ५५
६७ अङ्कगर्भाङ्कयोर्लक्षणं प्रतिपाद्यताम् । ५६
६८ पूर्वरङ्गस्य लक्षणमुल्लिख्य सूत्रधारस्य स्थापकस्य च स्वरूपं निर्दिश्यताम् । ५७
६९ नान्द्याः लक्षणं सोदाहरणं सप्रपञ्चं च प्रतिपाद्यताम् । ५७
७० आमुखस्य (प्रस्तावनायाः) लक्षणं निरूप्यताम् । ५९
७१ को नामार्थोपक्षेपकः ? कतिविधश्च सः ? इति सोदाहरणं प्रतिपाद्यताम् । ५९
७२ का अर्थप्रकृतयः ? कति च तासां भेदाः ? सोदाहरणं लिखत । ६१
७३ कार्यस्य का अवस्था ? कति च ताः ? किं च तासां स्वरूपम् ? सोदाहरणं निरूपयत । ६२
७४ के नाम नाटकोक्ताः सन्धयः ? के च ते ? इति सोदाहरणं विवेचयत । ६३
७५ वृत्तीनां परिचयो देयः । ६४
७६ निम्नाङ्कितानां नाट्योक्तीनां परिचयो देयः—स्वगतम्, प्रकाशम्, अपवारितम्, जनान्तिकम्, आकाशभाषितम् । ६६

७७ किं नाम श्रव्यं काव्यम् ? कतिविधं च तत् ? इति विलिख्य पद्यस्य स्वरूपं भेदांश्च विशदं विवेचयत । ६७
७८ महाकाव्यस्य लक्षणं सोदाहरणं प्रतिपाद्यताम् । ६८
७९ गद्यकाव्यस्य लक्षणं सोदाहरणं प्रतिपाद्यताम् । तद्भेदांश्च विलिख्य कथाख्यायिकयोः स्वरूपं परस्परं भेदं च निरूपयत । ६९
८० खण्डकाव्यम्, चम्पूकाव्यम्, विरुदम्, करम्भकम्—एते व्याख्येयाः । ७०
८१ दोषस्य सामान्यलक्षणमभिधाय कतिविधश्च सः ? इति विविच्यताम् । ७१
८२ अविमृष्टविधेयांशभावस्य दोषत्वं प्रतिपाद्य उदाहरणे सङ्गमयत । ७१
८३ 'अमुक्ता' इत्यत्र अविमृष्टविधेयांशत्वं प्रतिपादयत । ७२
८४ यत्-यत् शब्दस्थले अविमृष्टविधेयांशभावव्यवस्थां वर्णयत । ७३
८५ 'गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः' पदपदांशदोषो वेति विविच्यताम् । ७६
८६ अभवन्मतसम्बन्धस्य दोषस्य स्वरूपमुदाहरणद्वारा स्फोटनीयम् । ७६
८७ भग्नप्रक्रमदोषस्य स्वरूपं भेदांश्च सोदाहरणं निरूपयत । ७८
८८ नियमपरिवृत्ति-वाच्यानभिधानयोः को भेदः ? इति विविच्य लिखत । ७९
८९ रसदोषाः सोदाहरणं स्फुटीक्रियन्ताम् । ८०
९० रसानां परस्परविरोधस्य परिहारः संक्षेपेण निरूपणीयः ।
'विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा ।
भवेद्विरोधो नाऽन्योऽन्यमङ्गिन्यङ्गत्वमाप्तयोः ॥'
इत्येषा कारिका सोदाहरणं वैशद्येन व्याख्येया । ८२
९१ समूहालम्बनात्मकस्य पूर्णघनानन्दरूपस्य रसस्य तादृशेनेतररसेन कथं परस्परं विरोधः सम्भावनीयः ? इति सयुक्तिकं विवेचयत । ८३
९२ रसानां विरोधप्रकाराः के ? तत्समावेशश्च एकस्मिन् पद्ये कया कर्तुं युक्त्या शक्यत ? इति लिखत । ८४
९३ गुणालङ्कारयोः भेदप्रदर्शनपूर्वकं गुणस्य लक्षणं प्रतिपाद्यताम् । ८५
९४ को नाम गुणः ? कतिविधश्च सः ? किं तेषां लक्षणम् ? कस्मिन् रसे के गुणा नियताः ? इति विविच्य प्रतिपादयत । ८५
९५ के वर्णाः कस्य रसस्य प्रतिपादकाः ? इति सोदाहरणं प्रतिपादयत । ८७
९६ प्राचीनोक्तानां दशशब्दगुणानां दशार्थगुणानां च केषु गुणेषु कथं चाऽन्तर्भावः ? इति निरूपयत । ८८

९७ रीतिः कतिविधा, किञ्च तासां लक्षणमिति सोदाहरणं प्रतिपादयत। ९०
९८ रीति नियतानां रचनादीनां व्यत्ययः कथं भवति? इति सोदाहरणं प्रतिपादयत। अथवा—'क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः' इति कारिका व्याख्येया। ९१
९९ निर्दुष्टालङ्कारलक्षणं निरूप्य तस्य काव्ये किं प्रयोजनम्? इति प्रतिपाद्यताम्। ९२
१०० पुनरुक्तवदाभासस्य शब्दालङ्कारत्वम्, अर्थालङ्कारत्वम् उभयालङ्कारत्वं वा? इति सप्रमाणं निरूपयत। ९३
१०१ श्लेषः शब्दालङ्कारोऽर्थालङ्कारो वा? कश्चात्र पूर्वपक्षः, कश्चात्र सिद्धान्तपक्षः? इति सप्रमाणं निरूपयत। ९४
१०२ निम्नलिखित अलङ्काराः सलक्षणोदाहरणं व्याख्येयाः—अनुप्रासः, लाटानुप्रासः, यमकम्, वक्रोक्तिः, शब्दश्लेषः, उपमा (पूर्णोपमा), मालोपमा, अनन्वयः, रूपकम् (परम्परितम्, साङ्गम्, निरङ्गम्), परिणामः, उल्लेखः, उत्प्रेक्षा (वस्तु-हेतु-फलोत्प्रेक्षा), अपह्नुतिः, अतिशयोक्तिः, तुल्ययोगिता, दीपकम्, प्रतिवस्तूपमा, दृष्टान्तः, निदर्शना, व्यतिरेकः, समासोक्तिः, अप्रस्तुतप्रशंसा, अर्थान्तरन्यासः, काव्यलिङ्गम्, विभावना, विशेषोक्तिः, विरोधाभासः (विरोधः), असंगतिः, एकावली, परिसंख्या, स्वभावोक्तिः, संसृष्टिः, सङ्करः। ९५
१०३ अलङ्काराणां परस्परभेदकता प्रकाश्यताम्। ११२

॥ श्रीः ॥

साहित्यदर्पणालोकः

(साहित्यदर्पण-प्रश्नोत्तरी)

वन्देऽहं जगदाधारं सर्वैर्देवैः सुपूजितम् ।
यं विना जीवलोकेऽस्मिन् श्रेयो नाप्नोति मानवः ॥ १ ॥
प्रणमामि ततो गुरून् श्रीरामलोटनाभिधान् ।
यैरुन्मीलितं चक्षुस्तमश्च विनिवारितम् ॥ २ ॥
छात्राणामुपकाराय मयालोकः प्रकाश्यते ।
न पाण्डित्यप्रकाशाय न वा धनादिलिप्सया ॥ ३ ॥
किन्तु साहित्यदर्पणे गूढभावसमन्वितः ।
आशिषा गुरुवर्याणामत्र प्रस्फोटितो मुदा ॥ ४ ॥

—: ० :—

प्रथमः परिच्छेदः

(१) प्रश्नः—साहित्यदर्पणस्य कर्ता कः ? कदा कुत्र चाऽसौ साहित्यसुधाधारां प्रवाहयामास ? इति सप्रमाणं दर्शयत ।

उत्तरम्—साहित्यदर्पणस्य कर्ता विश्वनाथ उत्कलदेशीयो गौडब्राह्मण आसीत् । अस्य पिता चन्द्रशेखरः साहित्यशास्त्रस्य ज्ञाता चतुर्दशभाषावित् कलिङ्गराजस्य सान्धिविग्रहिक-महापात्र आसीत् । अस्य पितामहश्च नारायणपादः कविपण्डितमुख्यो बभूव । विश्वनाथस्यापि उपाधिः सान्धिविग्रहिक-महापात्र आसीत् । अयं वैष्णवमतानुयायी आसीत् ।

श्रीविश्वनाथकविराजस्य समयविषये तु प्रायः विवादो नास्त्येव । यतः साहित्यदर्पणे चतुर्थपरिच्छेदे—

'सान्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः ।
अलावद्दीननृपतौ न सन्धिर्न च विग्रहः ॥'

अयं श्लोको मिलति । अस्मिन्नुल्लिखितः 'अलावद्दीनः' प्रसिद्धः सुल्तानः

'अलाउद्दीन खिल्जी' इति नाम्ना प्रसिद्धो यवनराजो दिल्लीश्वर एवासीत्। यश्च १३१६ खीष्टाब्दे विषप्रयोगेण मारितोऽभवत्।

साहित्यदर्पणस्यैकं हस्तलिखितं पुस्तकम् १३८४ ई० वर्षस्योपलब्धम्। अतो विश्वनाथस्य समयः ई० १३०० तथा १३८० मध्येऽस्ति, इति कथनं युक्तमेव।

साहित्यदर्पणे श्रव्यकाव्येन सह दृश्यकाव्यस्यापि विचारः कृतोऽस्ति। अस्मिन् एकस्मिन्नेव ग्रन्थे काव्यप्रकाशस्य दशरूपकस्य रसमञ्जर्याश्च संग्रहोऽस्ति। एवं च काव्यशास्त्रे अयमेक एव ग्रन्थो यथा सर्वामावश्यकतां पूरयेदिति मनसि निधाय एव रचितोऽयं ग्रन्थ इति मन्ये।

साहित्यदर्पणातिरिक्ता अनेन विरचिता ग्रन्थाः—(१) राघवविलासकाव्यम्, (२) कुवलयाश्वचरितम् (एतत् प्राकृतकाव्यम्), (३) प्रभावतीपरिणयनाटिका, (४) प्रशस्तिरत्नावलिः (षोडशभाषाणां करम्भकः), (५) चन्द्रकलानाटिका, (६) नरसिंहविजयकाव्यम्, (७) काव्यप्रकाशदर्पणनाम्नी काव्यप्रकाशस्य टीका च।

(२) प्रश्नः—काव्यस्य प्रयोजनं प्रतिपाद्य प्रमाणानि दर्शनीयानि। (हि० प्र० यू० १९८०, ८१, ८२, वा० सं० वि० वि० १९३८, ५६, ५९, ७१, ७८) 2042

उत्तरम्—काव्यस्य मुख्यं प्रयोजनं चतुर्वर्गफलप्राप्तिरेव। यथा चोक्तम्—

'चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव........................... ॥'

चतुर्वर्गफलप्राप्तिर्हि काव्यतो रामादिवत्प्रवर्तितव्यम्, न रावणादिवत्, इत्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव। अत एव काव्यस्योपादेयतां लक्ष्यीकृत्य भामहेनोक्तम्—

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम् ॥'

धर्मप्राप्तिः—काव्यतो धर्मप्राप्तिर्हि भगवन्नारायणचरणारविन्दस्तवादिना। 'एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग्भवति' इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव। यथाऽऽदित्यप्रसादतो मयूरो नाम कविः पापाद् विनिर्मुक्तः।

अर्थप्राप्तिः—अर्थप्राप्तिश्च श्रीहर्षादिभ्यो धावकादीनां कवीनां प्रसिद्धैव ।

कामप्राप्तिः—कामप्राप्तिस्तु—अर्थद्वारैवेति विदितमेव ।

मोक्षप्राप्तिः—मोक्षप्राप्तिश्च काव्यजन्यधर्मफलाननुसन्धानात् । उक्तं च भगवता श्रीकृष्णेन—

'युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।' इति ।

अपि च 'तरति शोकमात्मवित्' इत्यादिब्रह्मज्ञानप्रतिपादक-मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्च । काव्योपादेयत्वम् अग्निपुराणेऽपि प्रोक्तम्—

'नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा ।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभा ॥' इति ।

'त्रिवर्गसाधनं नाटयम्' इति च ।

विष्णुपुराणेऽपि—

'काव्यालापाश्च ये केचिद् गीतकान्यखिलानि च ।
शब्दमूर्तिधरस्यैते विष्णोरंशा महात्मनः ॥'

भरतेनाप्युक्तम्—

'धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्द्धनम् ।
लोकोपदेशजननं नाटचमेतद् भविष्यति ॥' इति ॥

एवं काव्योपादेयतायामेतानि वचनानि एव प्रमाणानि ।

(३) प्रश्नः—वेदादिषु सत्सु चतुर्वर्गफलप्राप्तये काव्यस्य कियानुपयोगः ? इति लिखत ।

उत्तरम्—ननु 'स्वाध्यायोऽध्येतव्यः' चतुर्वर्ग-पुरुषार्थसाधनत्वं प्रतीयते, भवता (विश्वनाथेन) तु चतुर्वर्गफलप्राप्तिः काव्यादेवेति उच्यते । अत्राह—चतुर्वर्गफलप्राप्तये द्वौ पन्थानौ । एकः वेदशास्त्रादिः, अपरश्च काव्यम् । तत्र ये परिपक्वबुद्धयः सन्ति तेभ्यो वेदादिशास्त्रेभ्यो नीरसतया दुःखादेव चतुर्वर्गफलप्राप्तिर्भवति । किन्तु ये सुकुमारमतय नीरसानां शास्त्राणाम् अध्ययने असमर्थाः सन्ति, तेभ्यः चतुर्वर्गफलप्राप्तये काव्यशास्त्रस्यावतारः । अनेन च काव्यशास्त्रेण कान्तासम्मिततयोपदेशेन परमानन्दसन्दोहजनकतया सुखादेव चतुर्वर्गफलप्राप्तिः ।

ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु किमिति काव्ये यत्नः करणीय इत्यपि न वक्तव्यम्। कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी (साधुतरा) न स्यात् ? अतः 'अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्' इति सूक्ति 'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्' इति च सूक्तिम् अनुरुध्य परिणतबुद्धिभिरपि चतुर्वर्गफलप्राप्तये काव्यशास्त्रस्य परिशीलनं कर्त्तव्यमेवेति दिक्।

(४) प्रश्नः—मम्मटोक्तं काव्यलक्षणमुल्लिख्य विश्वनाथोक्तदिशा सन्दूष्य युक्तायुक्तत्वे विचार्येताम्। (वा० सं० वि० वि० १९६१, ६७, ७२, हि० प्र० यू० १९७८, ८०)

उत्तरम्—'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति काव्यप्रकाशकृतः श्रीमम्मटस्य काव्यलक्षणम्।

अत्रोच्यते—यदि भवतास्य दोषरहितौ गुणसहितावलङ्कारविभूषितौ शब्दार्थौ काव्यम्, क्वचित् स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिरित्यर्थः स्वीक्रियते। यदा—

'न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः,
सोऽप्यत्रैव निहन्ति राक्षसकुलं, जीवत्यहो रावणः।
धिक् धिक् छक्रजितं प्रबोधितवता, किं कुम्भकर्णेन वा,
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥'

इत्यस्मिन् पद्ये 'अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्। न ह्यलब्धास्पदं किञ्चित्कुत्रचित्प्रतितिष्ठति॥' इति नियमविरुद्धो न्यक्कारपदस्य पूर्वप्रयोगः विधेयाविमर्शदोषं प्रकटयति। एवमेवात्र वृथात्वं विधेयम्, तच्च तत्पुरुषसमासे गुणीभावादनुवाद्यत्वप्रतीतिकृत्। एवं विधेयाविमर्शदोषदुष्टत्वादस्य काव्यत्वं व्याहतं भवति।

न चेष्टापत्तिरिति वाच्यम्। ध्वनित्वेनोत्तमकाव्यताऽस्य स्वयं मम्मटेनैव स्वीकृतत्वात्। तस्माद् उत्तमकाव्येऽत्र लक्षणस्यासत्त्वेन अस्मिन् लक्षणे अव्याप्तिदोषः।

ननु 'न्यक्कारः' 'वृथोच्छूनैः' इत्यादयः केचनांशा एवात्र दुष्टाः न सर्वः श्लोकः, इति चेत् ? तर्हि यत्रांशे दोषः सोऽकाव्यत्वप्रयोजकः, यत्र ध्वनिः स

उक्तमकाव्यप्रयोजक इत्यंशाभ्याम् उभयतः आकृष्यमाणमिदं (न्यक्कारो ह्ययमेव मे०) काव्यमकाव्यं वा किमपि न स्यात्। न च काव्यस्य कञ्चिदेवांशं दूषयन्ति श्रुतिदुष्टादयो दोषाः, किं तर्हि सर्वमेव काव्यम्। यतो हि 'रसापकर्षका दोषाः'; काव्यात्मभूतस्य रसस्य अनपकर्षकत्वे तेषां दोषत्वमपि न स्वीक्रियते। अन्यथा नित्यदोषानित्यदोषव्यवस्थाऽपि न स्यात्। यदुक्तं ध्वनिकृता—

'श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः ॥' इति ॥

किञ्चैवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात् सर्वथा निर्दोषस्यैकान्तमसम्भवात्।

नन्वीषदर्थे नञः प्रयोग इति चेत् तर्हि 'ईषद्दोषौ शब्दार्थौ काव्यम्' इत्युक्ते निर्दोषयोः काव्यत्वं न स्यात्। सति सम्भवे ईषद्दोषौ, इति चेत् एतदीय काव्यलक्षणेऽवाच्यम्। रत्नादिलक्षणे कीटानुवेधपरिहारवत्। न हि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः किन्तूपादेयतारतम्यमेव कर्तुम्। तद्वदत्र श्रुतिदुष्टादयो दोषा अपि काव्यस्य। उक्तं च—

'कीटानुविद्धरत्नादिसाधारण्येन काव्यता।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः ॥' इति ॥

अत्र शब्दार्थयोः 'सगुणौ' इति विशेषणमनुपपन्नम्। माधुर्यादिगुणानां रसैकधर्मत्वस्य। 'ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः' इत्यादिना काव्यप्रकाशे स्वयं मम्मटेन प्रतिपादितत्वात्। रसाभिव्यञ्जकत्वेनोपचारतः (स्वाश्रयरसाभिव्यञ्जकत्वरूपपरम्परासम्बन्धेन) 'सगुणौ शब्दार्थौ' इति शब्दार्थयोः सगुणत्वविशेषणम् उपपद्यते चेत्। तदपि न युक्तम्। तथा हि—तयोः काव्यस्वरूपेण अभिमतयोः शब्दार्थयोः रसोऽस्ति न वा। नास्ति चेत् गुणवत्त्वमपि नास्ति। गुणानां तदन्वयव्यतिरेकानुविधायित्वात्। अस्ति चेत्? कथं नोक्तं रसवन्ताविति विशेषणम्। गुणवत्वान्यथाऽनुपपत्त्या एतल्लभ्यते इति चेत्। तर्हि सरसावित्येव वक्तुं युक्तं न सगुणाविति। नहि प्राणिमन्तो देशा इति वक्तव्ये, शौर्यादिमन्तो देशा इति केनापि उच्यते।

ननु 'शब्दार्थौ सगुणौ' इत्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्यावित्यभिप्रायश्चेत्। तन्न। गुणाभिव्यञ्जकशब्दार्थवत्वस्य काव्ये उत्कर्षमात्रा-

धायकत्वात्, न स्वरूपाधायकत्वम्। उक्तं च—काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा, गुणाः शौर्यादिवत्, दोषाः काणत्वखञ्जत्वादय इव, रीतयोऽवयवसंस्थानविशेषवत्, अलङ्काराः कटककुण्डलादिवत्। इति।

'उक्तकाव्यलक्षणे 'अनलङ्कृती पुनः क्वापि' इति यदुक्तं तदपि न युक्तियुक्तम्। अस्यार्थः—सर्वत्र सालङ्कारौ क्वचिदस्फुटालङ्कारावपि शब्दार्थौ काव्यमिति। तत्र सालङ्कारशब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात् न तु स्वरूपाधायकत्वम्। यत्तु क्वचिदस्फुटालङ्कारत्वे उदाहृतम्—

'यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥' इति॥

एतच्चिन्त्यम्। अत्र हि विभावनाविशेषोक्तिमूलस्य सन्देहसङ्करालङ्कारस्य स्फुटत्वम्।

वस्तुतस्तु 'यः कौमारहरः' इत्यत्र न कश्चन स्फुटोऽलङ्कारः। कारणाभावे कार्योत्पत्तिरूपस्य विभावनाऽलङ्कारस्य न स्फुटता। यतः उत्कण्ठाभावकारणानां भावमुखेनैव वर्णनं न त्वभावमुखेन। एवं कारणसत्त्वेऽपि कार्यानुत्पत्तिरूपाया विशेषोक्तेश्च न स्फुटता। अर्थादत्र कारणकार्ययोरभावकथनस्य आर्थिकस्य सत्त्वेऽपि तद्वाचक नञादिनाऽनुपात्तत्वात्। यदि चेतोऽनुत्कण्ठितं नेत्यभिधीयेत तदा विशेषोक्तेः स्फुटत्वं भवेत्। अत उभयोरस्फुटत्वेन एतन्मूलकसन्देहसङ्करोऽपि अस्फुटं इति निर्विवादम्।

(५) प्रश्नः—वक्रोक्तिजीवितकारोक्तं काव्यलक्षणं विश्वनाथोक्तदिशा सन्दूष्य स्वमतं प्रदर्श्यताम्।

उत्तरम्—काव्यलक्षणविचारप्रस्तावे वक्रोक्तिजीवितकारैरभिहितं यत्—'वक्रोक्तिकाव्यजीवितम्' इति। तदपि न विचारसहम्। यतो हि वक्रोक्तेरलङ्काररूपत्वात्। अलङ्काराणां चोत्कर्षमात्राधायकत्वात्।

वस्तुतस्तु—वक्रोक्तिजीवितकारस्वीकृता वक्रोक्तिः नालङ्काररूपा किन्तु काव्यस्य प्राणस्थानीया। प्राणस्य चात्मनः भिन्नत्वाद् वक्रोक्तिजीवितकारोक्तमपि सम्यगेव।

(६) प्रश्नः—भोजदेवकृतं काव्यलक्षणमुपपाद्य विश्वनाथदिशा खण्डयत।

उत्तरम्—'अदोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति॥'

इति भोजदेवोक्तं काव्यलक्षणम्।

अस्यार्थः—दोषरहितं गुणसहितम् अलङ्कारयुक्तं रसान्वितं काव्यं कुर्वन् कविः कीर्तिं प्रीतिं च लभते।

अत्र विश्वनाथ आह—दोषरहितस्यैव काव्यत्वे काव्यं प्रविरलविषयं निर्विषयं वा स्यात्, सर्वथा निर्दोषस्यैकान्तमसम्भवात्। 'ईषद् दोषम्' इत्यपि न वाच्यम्। निर्दोषस्य काव्यत्वं न स्यात्। अतः काव्यलक्षणे अदोपमिति विशेषणं न देयम्। एवं गुणानां रसधर्मत्वात् गुणवत् काव्यस्यासत्त्वात् काव्यलक्षणे गुणत्वविशेषणमपि न देयम्। अलङ्काराणाम् उत्कर्षाधायकत्वं न तु स्वरूपाधायकत्वम्। तेन सालङ्कारत्वविशेषणमपि न देयम्। केवलं रसान्वितं (वाक्यं) काव्यम्, इत्येव काव्यलक्षणं वाच्यमिति।

परे तु उपहसनीयत्वस्यैवात्र दोषपदेन ग्रहणात्, अदोषमिति विशेषणमुचितमेव। गुणवत्त्वमपि स्वाश्रयाभिव्यञ्जकत्वसम्बन्धेन शब्दार्थयोरुपचर्यते इति दर्पणकारेणापि स्वीकाराददोष एव। कीर्तिप्रीतिवर्धके काव्ये अलङ्कारस्य सत्त्वमपेक्षितमेव यत्र न रसस्य हानिः, इति भोजदेवकृतं काव्यलक्षणमपि अनुपहसनीयकाव्यस्यैवेति न कुत्रापि दोष इति वदन्ति।

(७) प्रश्नः—ध्वनिकारोक्तं काव्यलक्षणमुक्त्वा विश्वनाथदिशा निरस्य स्वमतं लिखत। (ग० सं० का० वा० १९५२,५५,५९,६४,)

उत्तरम्—'काव्यस्यात्मा ध्वनिः' इति ध्वनिकारोक्तं काव्यलक्षणम्। अत्र पृच्छ्यते—तत्किं वस्त्वलङ्काररसादिलक्षणस्त्रिरूपो ध्वनिः काव्यस्यात्मा उत रसादिरूपमात्रो वा ? नाद्यः—प्रहेलिकादौ ('तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः। गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः'॥) इत्यत्र किञ्चिदपूर्णजलकुम्भस्य वस्तुनो ध्वन्यमानत्वेऽपि रसविकलतया अकाव्येऽपि काव्यत्वप्रसक्त्याऽतिव्याप्तिः स्यात्। द्वितीयश्चेद् ओमिति ब्रूमः।

ननु यदि रसादिरूपमात्रो ध्वनिः काव्यस्यात्मा, तदा—

'अत्ता एत्थ णिमज्जइ एत्थ अहं दिअसअं पलोएहि।
मा पहिअ रत्तिअन्धिय सज्जाए मह णिमज्जहिसि॥'

इत्यादौ वस्तुमात्रस्य व्यङ्ग्यत्वे कथं काव्यव्यवहार ? इति चेन्न । अत्रापि आगन्तुके परपुरुषे रतेर्वर्णनात् शृङ्गाराभास एवेति न काव्यत्वहानिः । अन्यथा 'देवदत्तो ग्रामं याति' इति वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेरपि काव्यत्वं स्यात् । अस्त्विति चेत्, न । रसवत एव काव्यत्वाङ्गीकारात्; न तु केवलं व्यङ्ग्यावगतिः काव्यत्वप्रयोजिकेति ।

रस एव काव्यस्यात्मा, इत्यत्र अग्निपुराणमपि प्रमाणम्—'वाग्वैदग्ध्य-प्रधानेऽपि रस एवात्र जीवितम्' इति । व्यक्तिविवेककारेणाप्युक्तम्—'काव्य-स्यात्मनि सङ्गिनि रसादिरूपे न कस्यचिद् विमतिः ।' इति ।

ननु रसवत एव काव्यत्वाङ्गीकारे प्रबन्धान्तर्वर्तिनां केषाञ्चिन्नीरसानां पद्यानां काव्यत्वं न स्यादिति चेत्, न । रसवत्पद्यान्तर्गतनीरसपदानामिव पद्य-रसेन प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारादिति ।

यत्तु नीरसेष्वपि वाक्येषु गुणाभिव्यञ्जकवर्णसद्भावाद् दोषाभावाद् अलङ्कारसद्भावाच्च काव्यव्यवहारः स रसादिमत्काव्यबन्धसाम्याद् गौण एव ।

यच्च वामनेनोक्तम्—'रीतिरात्मा काव्यस्य' इति, तन्न । रीतेः सङ्घटना-विशेषत्वात् सङ्घटनायाश्च अवयवसंस्थानरूपत्वात्, आत्मनश्च तद्भिन्नत्वात् । यच्च ध्वनिकारेणोक्तम्—

'अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः ।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥' इति ।

अत्र वाच्यात्मत्वम्, इति कथनं 'काव्यस्यात्मा ध्वनिः' इति स्ववचन-विरोधादेवाऽपास्तम् ।

वस्तुतस्तु नाऽनेन वाच्यात्मत्वं व्यवस्थाप्यते किन्तु काव्यस्य भेदमेवा-भिधीयते । तेन यः प्रतीयमानो भेदः स काव्यात्मत्वेन प्रसिद्धो ध्वनिरूप इति न स्ववचनविरोध इति बोध्यम् ।

(८) प्रश्नः— विश्वनाथोक्तं काव्यलक्षणं सोदाहरणं प्रतिपाद्यताम् । (वा० सं० वि० वि० १९५९, ६१, ७२, हि० प्र० यू० १९८०, ८१, ८२)

उत्तरम्—ननु सर्वेषां काव्यलक्षणानाम् अव्याप्त्यादिदोषग्रस्तानां न काव्यलक्षणत्वं सम्भवति । अतः काव्यलक्षणं किमिति जिज्ञासायां श्रीविश्वनाथ आह—'वाक्यं रसात्मकं काव्यम्' इति । रस एवात्मा

साररूपतया जीवनाधायको यस्य तत् वाक्यं काव्यमित्यर्थः। रसपदेनाऽत्र 'रस्यते=आस्वाद्यते यः स रसः' इति व्युत्पत्तियोगाद् भावरसाभासभावाभासादयोऽपि गृह्यन्ते। यत्र च वाक्ये न रसः नाऽसौ काव्यमिति। अन्यथा 'देवदत्तो ग्रामं याति' इत्यत्र तद्भृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेरपि काव्यत्वं स्यात्। न च तथा रसवत एव काव्यत्वाङ्गीकारादिति। तत्र रसो यथा—

'शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं,
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥'

अत्र, उक्तरूपः पतिः, उक्तरूपा च पत्नी आलम्बनविभावौ, शून्यं वासगृहम् इत्युद्दीपनविभावः, चुम्बनम् अनुभावः, लज्जाहासौ व्यभिचारिणौ, एतैरभिव्यक्तः सहृदयरतिभावः शृङ्गारो रसः। एवं भावादीनामपि उदाहरणानि ज्ञेयानि।

(९) प्रश्नः—विश्वनाथोक्तकाव्यलक्षणस्य युक्तायुक्तत्वे विचारणीये।

उत्तरम्—'वाक्यं रसात्मकं काव्यम्' इति विश्वनाथोक्तं काव्यलक्षणम्। अस्यार्थः—रस एवात्मा जीवनाधायको यस्य तत् वाक्यं काव्यमित्यर्थः। रसशब्देनात्र 'रस्यते=आस्वाद्यते, इति रसः' इति व्युत्पत्तियोगाद् रसभावतदाभासादयोऽपि गृह्यन्ते। यत्र च 'वाक्ये' न रसो नाऽसौ काव्यमिति।

अत्र विचार्यते—'वाक्यं रसात्मकं काव्यम्' इति काव्यलक्षणे 'रसात्मकम्' इत्यत्र रस एवात्मा यस्येति बहुव्रीहिः समासः। बहुव्रीहिश्चान्यपदार्थप्रधानो भवति। अन्यपदार्थश्चाऽत्र वाक्यमेव। वाक्यं च शब्दविशेष एव। तदेवं शब्दविशेषः काव्यमित्येव पर्यवसन्नम्। तत्राकाशगुणे शब्दे रसोऽस्ति न वा? अस्ति चेत्, कथम्?

'सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः' इत्यादिभवदुक्तलक्षणानुसारमपि ज्ञानस्वरूपस्य वा आत्मस्वरूपस्य वा रसस्य आकाशगुणे शब्दे लेशोऽपि हि दुर्लभः। नास्ति चेत्, कथमुक्तं 'रसात्मकम्' इति। न खलु अविद्यमानं किञ्चित् कस्याप्यात्मत्वेन व्यवस्थीयते। यदि रसप्रकाशकभावनाविषयार्थप्रतिपादकतासंसर्गेण वा, रसप्रकाशकतावच्छेदकार्थप्रतिपादकतासम्बन्धेन वा तदुपचर्यते इति

ब्रूषे, तर्हि प्रकाशोक्तं 'सगुणौ' इति विशेषणमुपद्रवता भवता किमर्थमुद्धूलिता धूलिरिति पृच्छामः । तत्रापि हि तुल्ययोगक्षेमोऽयं मार्गः ।

अथ रसस्यैव काव्यत्वं स्वीकारयितुं तथा प्रयास इति चेत्, तदपि न रुचिरम् । नीरसेऽपि चमत्कारिणि वस्त्वलङ्कारव्यञ्जके शब्दार्थयुगले काव्यत्वस्याभियुक्तैः स्वीकारात् । यदुक्तं ध्वनिकृता—

'व्यज्यन्ते वस्तुमात्रेण यदाऽलङ्कृतयस्तदा ।
ध्रुवं ध्वन्यङ्गता तासां काव्यवृत्तेस्तदाश्रयात् ॥' इति ।

अतः काव्यप्रकाशकारोक्तं काव्यलक्षणमेव युक्तमिति गुरवः ।

(१०) प्रश्नः—गुणानां रसधर्मत्वात्, रसात्मकस्य वाक्यस्य काव्यत्वात् कथं गुणाः काव्यस्योत्कर्षहेतव ? इति प्रतिपाद्यताम् ।

उत्तरम्—ननु यथा निरलङ्कारकाव्यापेक्षया सालङ्कारकाव्यस्योत्कृष्टता न तथा निर्गुणकाव्यापेक्षया सगुणकाव्यस्योत्कृष्टता वक्तुं शक्यते । यतः गुणानां रसैकधर्मत्वात्, निर्गुणानां च नीरसत्वात्, नीरसानां चाकाव्यत्वमेवेति गुणाः काव्यस्योत्कर्षका इति कथनमसङ्गतमिति चेत्, न । यद्यपि गुणाः रसस्य धर्माः, रसेन विना न तेषां स्थितिस्तथापि अत्र गुणपदं लक्षणया गुणाभिव्यञ्जकशब्दार्थपरम् । अतः 'गुणाः रसोत्कर्षहेतवः' इत्यस्य तात्पर्यं यत्—'गुणाभिव्यञ्जकाः शब्दार्थाः रसस्योत्कर्षकाः' इति । अतः गुणाभिव्यञ्जकशब्दविरहितात् काव्यात् गुणाभिव्यञ्जकशब्दसहितं काव्यमुत्कृष्टं भवतीति दिक् ।

इति साहित्यदर्पणालोके प्रथमः परिच्छेदः ॥

द्वितीयः परिच्छेदः

(११) प्रश्नः—'वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः' कारिकेयं साधु व्याख्येया । (वा० सं० वि० वि० १९५७, ६४,६६)

उत्तरम्—काव्यलक्षणे 'वाक्यं रसात्मकं काव्यम्' इत्युक्तम्, तत्र किं नाम वाक्यमित्यपेक्षायामाह—

'वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः' इति ।

योग्यतादित्रयात्मकः पदसमूह एव वाक्यमित्यर्थः । तत्र—

योग्यता—'योग्यता पदार्थानां परस्परसम्बन्धे बाधाभावः', एकपदार्थस्य अपरपदार्थेन सह सम्बन्धे बाधाऽभाव एव योग्यता। यथा—'गामानय' इत्यत्र गोपदार्थस्य आनयपदार्थेन सह यः सम्बन्धः स बाधितो न वर्तते इति योग्यतायाः सत्त्वाद् वाक्यत्वं भवति। न च बाधसत्त्वेऽपि यत्र पदार्थानां परस्परं सम्बन्धो वर्तते तत्रापि वाक्यत्वं स्यादिति वाच्यम्। तथा सति 'वह्निना सिञ्चति' इत्यस्यापि वाक्यत्वं स्यात्। नहि अग्निः सेचनक्रियायां समर्थः, अपि तु दहनक्रियायाम्। अतो नेदं वाक्यम्।

आकाङ्क्षाः—एकपदार्थस्य अपरपदार्थेन सहान्वयाऽपेक्षा आकाङ्क्षा। सा च श्रोतुः जिज्ञासारूपा, यथा 'देवदत्तो ग्रामम्' इत्यत्र गच्छतीति पदस्य। निराकाङ्क्षस्य वाक्यत्वे 'गौः, अश्वः, पुरुषो, हस्ती' इति परस्परं निरपेक्षस्य पदसमूहस्यापि वाक्यत्वं स्यात्। एवं चाऽतिव्याप्तिः स्यात्। अत्र गवाद्यर्थबोधकसुबन्तपदश्रवणानन्तरम् अश्वादिपदान्तरश्रवणेच्छाविरहस्य सिद्धत्वादाकाङ्क्षाशून्यत्वम्। अतो नेदं वाक्यम्।

आसत्तिः—यस्य पदार्थस्य येन पदार्थेन सह सम्बन्धाऽपेक्षा तेन सह तस्य अव्यवधानेन स्थितिः आसत्तिः। व्यवहितेऽपि वाक्यत्वे इदानीमुच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चरितेन गच्छतीति पदेन सङ्गतिः स्यात्। किन्तु ईदृशेन पदसमूहेन न भवति बोधः, आसत्तिविरहात्, न चेदं वाक्यम्।

व्यवधानं द्विविधम्—एकं कालव्यवधानम्, अपरं चानुपयुक्तपदार्थानां सत्त्वम्। तत्र कालव्यवधानस्योदाहरणं पूर्वमुक्तम्। द्वितीयस्य तु 'गिरिर्भुक्तमग्निमान् देवदत्तेन' इति। अत्र 'गिरिरग्निमान्', 'देवदत्तेन भुक्तम्' इति सम्बन्ध उचितः।

(१२) प्रश्नः—'आकाङ्क्षायोग्यतयोरात्मार्थधर्मत्वेऽपि पदोच्चयधर्मत्वमुपचारात्' इति पङ्क्तिर्व्याख्येया। (वा० सं० वि० वि० १९५६, ५८, ७४)

उत्तरम्—ननु आकाङ्क्षायाः जिज्ञासारूपत्वात्, जिज्ञासा च श्रोतुरिच्छा, इच्छायाश्चात्मधर्मत्वात्, कथं पदोच्चयधर्मत्वम्। एवं योग्यता यदि विपरीतबुद्ध्यभावरूपा तदा आत्मनिष्ठतया अन्वयबोधहेतुत्वात् तस्या आत्मवृत्तित्वमेव। यदा एकपदार्थीयापरपदार्थसम्बन्धाभावरूपा तदा (वृत्तितावच्छेदकसम्बन्धेन पदार्थनिष्ठतया) पदार्थधर्मत्वम्, इति कथं पदोच्चयधर्मत्वमिति चेत्, न। आत्मधर्मयोः आकाङ्क्षायोग्यतयोः स्वजन्यजनकत्वरूपपरम्परासम्बन्धेन

पदोच्चयधर्मत्वम् । समन्वयश्च–स्वम्=आकाङ्क्षा, योग्यता च, तज्जन्यः= वाक्यार्थः, तज्जनकश्च पदसमूह इति रीत्या । यदि च योग्यतायाः पदार्थधर्मत्वं तदा तस्याः स्वाश्रयोपस्थापकत्वसम्बन्धेन, पदोच्चयधर्मत्वं स्वीक्रियते । समन्वयश्च—स्वम्=योग्यता, तदाश्रयः=पदार्थः, तदुपस्थापकः=पदसमूह इति रीत्येति न कोऽपि दोषः ।

(१३) प्रश्नः—साहित्यिकाः कुत्र शक्तिग्रहं मन्यन्ते ? कुत्र न ? इति यथाशास्त्रं वर्णयत । (वा० सं० वि० वि० १९५९, ६१, ७५)

उत्तरम्—शब्दाः चतुर्विधाः—जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, द्रव्य(यदृच्छा-)शब्दाश्च । 'चतुष्टयी शब्दानां प्रवृत्तिः' इति महाभाष्यकारः । तत्र गोपिण्डादिषु गोत्वादिका जातिः । गुणो विशेषाधानहेतुः सिद्धो वस्तुधर्मः । शुक्लादयो हि गुणाः गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्तयन्ति । क्रियाः साध्यरूपाः वस्तुधर्माः पाकादयः । एषु हि अधिश्रयणावश्रयणान्तादि(चुल्युपरिधारणात् अधःश्रयणपर्यन्त-)पूर्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्यः । द्रव्यशब्दा एकव्यक्तिवाचिनो हरि-हर-डित्थडवित्थादयः । द्रव्यशब्दा एव यदृच्छाशब्दाः । एष्वेव व्यक्तेरुपाधिषु सङ्केतो गृह्यते न व्यक्तौ । आनन्त्यव्यभिचारदोषपातात् । उक्तं च विश्वनाथेन—

'सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च' इति ।

ननु व्यक्तौ शक्तिग्रहे कथम् आनन्त्यं व्यभिचारश्चेति चेत् ? श्रूयताम्—

उपाधिषु शक्तिस्वीकारे एकस्यां व्यक्तौ गवि शक्तौ गृहीतायां सर्वत्र कार्यं चलति । सामान्यलक्षणासन्निकर्षेण सर्वासां बोधश्च भवति । यदि व्यक्तौ शक्तिग्रहः स्वीक्रियते तदायं प्रश्नो जागर्ति यद्—एकस्यां व्यक्तौ सङ्केतग्रहो भवति उत सर्वस्याम् ? तत्र न प्रथमः । गवादीनां व्यक्तीनाम् अनन्तत्वात्, अनन्तव्यक्तिषु अनन्तशक्तिकल्पनागौरवाद् आनन्त्यं स्यात् । एकस्यामेव दृष्टव्यक्तौ शक्तिग्रहे तदतिरिक्तानां गोव्यक्तीनां भानमेव न स्यादिति व्यभिचारः पदार्थोपस्थितौ शक्तिग्रहस्य कारणत्वात् । न चैकस्यां व्यक्तौ शक्तिग्रहे अन्यासां व्यक्तीनां शक्तिग्रहं विनैवोपस्थितिरिति वाच्यम्, शक्तिग्रहं विना पदार्थोपस्थितौ स्वीकृतायां कारणाभावे कार्योत्पत्तिरूपव्यभि-

चारदोषपातात् । अपि चैवं गोशब्देन अश्वादीनामपि उपस्थितिः स्यात् । नापि द्वितीयः—भूतभविष्यद्वर्तमानानां समस्तानां गोव्यक्तीनाम् एकस्मिन् समये उपस्थित्यभावेन शक्तिग्रहासम्भवादिति दिक् ।

(१४) प्रश्नः—रूढिं प्रयोजनं विनापि लक्षणालक्षणे दोषोऽस्ति न वेति विविच्यात्र दण्डचक्रन्यायेन कारणता उत तृणारणिमणिन्याये-नेति प्रतिपाद्यताम् (वा० सं० वि० त्रि० १९३६, ६०, ७६)

उत्तरम्—'मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद् वाऽसौ लक्षणाशक्तिरर्पिता ॥'

इति लक्षणाप्रतिपादकं सूत्रम् । अत्र ययाऽन्योऽर्थः प्रतीयते सा लक्षणा, इति लक्षणम् । मुख्यार्थबाधः, मुख्यार्थयोगः, रूढिप्रयोजनाऽन्यतरच्चेति त्रयं हेतुः । अत्र लक्षणेऽन्यपदस्य न मुख्यार्थभिन्नोऽर्थः, किन्तु शक्यतावच्छेदकाति-रिक्तधर्मावच्छिन्नः । तेन मुख्यार्थान्वयबोधबाधनिबन्धनत्वे सति रूढिप्रयोज-नाऽन्यतरप्रयोज्यशक्यार्थसम्बन्धवत् तदतिरिक्तार्थप्रतिपादकशक्तित्वं लक्षण-त्वम् । अत्र रूढिप्रयोजनाऽन्यतरत्वानिवेशेऽपि 'कलिङ्गः साहसिकः' इत्यादौ कार्यनिर्वाहः स्यादेवेति चेत्, न । 'कमले चरणाघातं मुखं सुमुखि ! तेऽकरोत्' इत्यत्र रूढिप्रयोजनयोरभावेऽपि चरणाघातपदेन निर्जितत्वलक्षणाद् अतिव्याप्तिः स्यादिति सन्निवेशः । इदं नेयार्थतादोषस्योदाहरणम् ।

नन्वत्र तृतीयहेतोः कारणता दण्डचक्रन्यायेन तृणारणिमणिन्यायेन वेति चेत् ? तृणारणिमणिन्यायेन, इत्युत्तरम् । यथा—अग्निं प्रति तृणम्, अरणिः मणिश्च पृथक् पृथक् कारणम्, तथैव रूढिः पूर्वहेतुद्वयसंयुक्तः पृथक् हेतुः, अपि च मुख्यार्थबाधः, मुख्यार्थयोगः रूढिप्रयोजनयोरन्यतरच्चेति हेतुत्रयं न वर्तते । नैषां तृणारणिमणिन्यायेन कारणता किन्तु दण्डचक्रन्यायेनैव । अत एव काव्य-प्रकाशे मुख्यार्थबाधादित्रयं हेतुरित्येकवचनेन त्रयाणां समुदितानामेव हेतुत्वं प्रतिपादितम् ।

(१५) प्रश्नः—उपादानलक्षणया लक्षणलक्षणतो वैलक्षण्यमुदाह-रणद्वारा स्फोरणीयम् ।

उत्तरम्—लक्षणा द्विविधा—एका उपादानलक्षणा, अपरा लक्षणलक्षणा चेति । कोऽनयोर्भेद इति चेत् ? शृणु—

यत्र मुख्यार्थविशिष्ट-तदितरार्थप्रतिपादकशब्दत्वं, तत्रोपादानलक्षणा । अत एवेयमजहत्स्वार्थेत्युच्यते । एवं स्वार्थपरित्यागपूर्वकान्यार्थप्रतिपादक-

शक्तित्वं लक्षणलक्षणात्वम् । उपादानलक्षणाया उदाहरणं यथा—'कुन्ताः प्रविशन्ति' ।

अत्राचेतनानां कुन्तानां प्रवेशनक्रियासामर्थ्यं नास्ति, इति कुन्तरूपमुख्यार्थ-विशिष्टकुन्तधारिपुरुषरूपस्य मुख्यार्थेतरार्थस्य प्रतिपादकत्वात् 'कुन्तधारिपुरुषाः प्रविशन्ति' इति लक्षणयाऽर्थो बोध्यते ।

लक्षणलक्षणाया उदाहरणम्—'गङ्गायां घोषः' । विपरीतलक्षणायाश्चो-दाहरणम्—

'उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।
विदधदीदृशमेव सदा सखे ! सुखितमास्व ततः शरदां शतम् ॥'

इत्यत्र, उपकृतादयः शब्दाः अपकारिणं प्रति अन्वयमलभमानाः अपकारादिरूपेऽर्थे परिणता अयमेव उपादानलक्षणालक्षणलक्षणयोर्भेदः—यद् उपादान-लक्षणायां मुख्यार्थस्यात्मनोऽप्युपादानम् । लक्षणलक्षणायां तु परस्यैवोपलक्षणं मुख्यार्थस्य त्यागश्चेति ।

(१६) प्रश्नः—काव्यप्रकाशोक्तं 'कर्मणि कुशलः' इति लक्षणोदाहरणं दर्पणोक्तदिशा खण्डनीयम् । (वा० सं० वि० वि० १९३३, ४२, ५३, ५८, ६२)

उत्तरम्—केचित् (काव्यप्रकाशकारा मम्मटमहाभागाः) 'कर्मणि कुशलः', इति रूढावुदाहरन्ति । तेषामयमभिप्रायः–कुशान् = दर्भान्, लाति=आदत्ते, इति 'कुशलः' इति व्युत्पत्त्या लभ्यः कुशग्राहिरूपो मुख्योऽर्थः प्रकृतेऽसम्भवन् विवेचकत्वादिसाधर्म्यसम्बन्धसम्बन्धिनं दक्षरूपमर्थं लक्षयति ।

परं नेदं कथनं विचारसङ्गतम् । कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात् । अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तम् अन्यच्च प्रवृत्ति-निमित्तम् । यदि हि व्युत्पत्तिलभ्य एव मुख्योऽर्थस्तदा, 'गौः शेते' इत्यत्रापि लक्षणा स्यात् 'गमेर्डोः' (उणादि २।६७) इति गम्धातोः डोप्रत्यये कृते निष्पन्नस्य गोशब्दस्य शयनकालेऽप्रयोगात् ।

यदि च व्युत्पत्तिरेव प्रवृत्तिनिमित्तमिति मन्यते तदापि 'कुशलः' इत्यत्र लक्षणाया नावसरः । कौ = भुवि, शलति = चालयति, कार्याणि, यः स कुशलः, इति व्युत्पत्त्यापि दक्षरूप एव मुख्योऽर्थो, इति दिक् ।

(१७) प्रश्नः—का नाम लक्षणा ? कुत्र कथं चाऽस्याः प्रयोगः ? कतिविधा च सा ? इति सोदाहरणं लिख्यताम् ।

उत्तरम्—'मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद् वाऽसौ लक्षणा शक्तिरर्पिता ॥'

अभिधाख्यया शक्त्या योऽर्थो बोध्यते स मुख्योऽर्थः । अन्वयस्य तात्पर्यस्य वाऽनुपपत्तौ तस्य बाधे जाते, रूढिवशात्, कस्यापि प्रयोजनस्य सिद्धयै वा, मुख्यार्थसम्बद्धस्यैव अन्यार्थस्य ज्ञानं यया शक्त्या भवति, सा लक्षणा नाम ।

यथा—'कलिङ्गः साहसिकः' इत्यादौ कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थेऽसम्भवन् यया शब्दशक्त्या पुरुषादीन् प्रत्याययति, यथा च 'गङ्गायां घोषः' इत्यादौ गङ्गादिशब्दो जलमयादिरूपार्थवाचकत्वात् प्रकृतेऽसम्भवन् स्वस्य सामीप्यादिसम्बन्धसम्बन्धिनं तटादि बोधयति, रूढिप्रयोजनमूलाभ्यां द्विविधा, सा शब्दस्यार्पिता, स्वाभाविकेतरा, ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम । द्विविधापि सा पुनः उपादानलक्षणा, लक्षणलक्षणा चेति भेदेन द्विविधा, एता अपि सारोपसाध्यवसानभेदेन द्विधा, ताश्च शुद्धागौणीभेदेन द्विधा, एवं सङ्कलनया षोडशभेदा लक्षणा ।

"स्पष्टप्रतिपत्त्यर्थं तावत् (१६) षोडशभेदाः" यथा—

सं०	लक्षणा	उदाहरणानि
१	सारोपा उपादानलक्षणा रूढिः	अश्वः श्वेतो धावति ।
२	,, ,, प्रयोजनवती	एते कुन्ताः प्रविशन्ति ।
३	,, लक्षणलक्षणा रूढि	कलिङ्गः पुरुषो युध्यते ।
४	,, ,, प्रयोजनवती	आयुर्घृतम् ।
५	साध्यवसाना उपादानलक्षणा रूढिः	श्वेतो धावति ।
६	,, ,, प्रयोजनवती	कुन्ताः प्रविशन्ति ।
७	,, लक्षणलक्षणा रूढिः	कलिङ्गः साहसिकः ।
८	,, ,, प्रयोजनवती	गङ्गायां घोषः ।
९	गौणी सारोपा उपादानलक्षणा रूढिः	एतानि तैलानि हेमन्ते सुखानि ।
१०	,, ,, ,, प्रयोजनवती	एते राजकुमारा गच्छन्ति ।
११	,, ,, लक्षणलक्षणा रूढिः	राजागौडेन्द्रकण्टकं शोधयति ।
१२	,, ,, ,, प्रयोजनवती	गौर्वाहीकः ।
१३	गौणी साध्यवसाना उपादानलक्षणारूढिः	तैलानि हेमन्ते सुखानि ।
१४	,, ,, ,, प्रयोजनवती	राजकुमारा गच्छन्ति ।
१५	,, ,, लक्षणलक्षणा रूढिः	राजा कण्टकं शोधयति ।
१६	,, ,, ,, प्रयोजनवती	गौर्जल्पति ।

एवं प्रयोजनवती अष्टप्रकारा लक्षणा व्यङ्ग्यस्य गूढागूढत्वात् षोडशधा भवति। षोडशप्रकारा च सा धर्मिगतत्वेन धर्मगतत्वेन चेति द्वात्रिंशत्प्रकारा (३२) भवति। तथाविधा चेयम् अष्टप्रकाराभिः रूढिलक्षणाभिः साकं चैत्वारिंशद्विधा (४०) सम्पद्यते। पुनः प्रत्येकं पदवाक्यगतत्वेन द्विधा भूत्वा अशीतिप्रकारा (८०) लक्षणा जायते इति दिक्।

(१८) प्रश्नः—'गौर्वाहीकः' इत्यत्र का नाम लक्षणा? कुत्र च सा? इति विशदं विविच्यताम्। (वा० सं० वि० वि० १९४५, ५१, ६१, ६४, हि० प्र० यू० १९८०, ८१)

उत्तरम्—'गौर्वाहीकः' इत्यत्र कथं गोशब्देन वाहीकार्थो बोध्यते, इत्यत्र सन्ति वादिनां विप्रतिपत्तयः।

अत्र केचिदाहुः—'गौर्वाहीकः' इत्यत्र गोसहचारिणो ये जाड्यमान्द्यादयो गुणास्ते लक्षणया बोध्यन्ते। लक्षिताश्च ते गुणाः गोशब्दस्य वाहीकार्थाभिधाने (अभिधाने=अभिधया बोधने) प्रवृत्तिनिमित्तत्वमुपयान्ति।

परं तेषामिदं कथनं नितरामसङ्गतम्। गोशब्दस्यागृहीतसङ्केतं वाहीकार्यमभिधातुमसामर्थ्यात्। गोशब्दार्थमात्रबोधनाच्चाभिधाया विरतत्वाद् विरतायाश्च पुनरुत्थानासम्भवात्। 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति नियमात्।

अन्ये च पुनः गोशब्देन वाहीकार्थो नाभिधीयते, किन्तु स्वार्थसहचारिगुणसाजात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते, इति वदन्ति।

तदप्यन्ये न क्षमन्ते। तथा हि—गोशब्दाद् वाहीकार्थः प्रतीयते न वा? प्रतीयते इति चेत्, गोशब्दादेव वा? लक्षिताद्वा गुणादविनाभावद्वारा? तत्र न प्रथमः। वाहीकार्थस्यासङ्केतितत्वात्। न द्वितीयः। अविनाभावलभ्यस्यार्थस्य शाब्देऽनन्वये प्रवेशसम्भवात्। 'शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते' इति नियमात्। न द्वितीयः। यदि गोशब्दाद् वाहीकार्थो न प्रतीयते तदाऽस्य वाहीकशब्दस्य च सामानाधिकरण्यमसङ्गतं स्यात्।

तस्मादत्र गोशब्दो मुख्यया वृत्त्या वाहीकशब्देन सहान्वयमलभमानोऽज्ञत्वादिसाधर्म्यसम्बन्धाद् वाहीकार्थं लक्षयति। वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनम्। इयं च गुणयोगाद् गौणीत्युच्यते। लक्षणाभेदेषु चेदं प्रयोजने सारोपागौणीलक्षणलक्षणाया उदाहरणम्।

(१९) प्रश्नः—का नाम व्यञ्जना ? कुत्रोपयुज्यते ? कतिविधा च सा ? इति साधु विविच्यताम् ।

उत्तरम्—'विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः ।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥'

स्वं स्वमर्थं बोधयित्वा विरतासु, अभिधालक्षणाऽतात्पर्याख्यासु तिसृषु वृत्तिषु, ययाऽन्योऽर्थः बोध्यते, सा शब्दार्थस्य प्रकृतिप्रत्ययादेश्च शक्तिर्व्यञ्जन-ध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम ।

'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति न्यायात् स्वं स्वमर्थं बोधयित्वा उपरतानां तासां पुनरुत्थानाभावाद् वस्त्वलङ्काररसादिव्यङ्ग्यबोधेन न तासां सामर्थ्यमिति व्यञ्जनावृत्तिः स्वीक्रियते ।

सा च व्यञ्जना शाब्दी, आर्थी चेति द्विविधा । तत्र शाब्दी व्यञ्जनाऽपि द्विविधा—अभिधामूला, लक्षणामूला चेति । तत्राभिधामूला—

'अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाश्रया ॥'

अर्थादनेकार्थानां शब्दानां संयोगप्रकरणादिभिरेकस्मिन्नर्थे नियमिते सति अप्रकरणिकस्य अपरार्थस्य प्रतीतिर्यया भवति साऽभिधामूला-व्यञ्जना ।

यत् प्रयोजनमुद्दिश्य लक्षणायाः स्वीकारस्तस्य प्रयोजनस्य प्रतीतिर्यया भवति सा लक्षणामूला-व्यञ्जना ।

आर्थी व्यञ्जना तु—

वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः ।
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च ।
वैशिष्ट्यादन्यमर्थं या बोधयत् सार्थसम्भवा ॥'

अर्थाद् वक्तृबोद्धव्ययोः वाक्यवाच्यान्यसन्निधीनां तथा प्रस्तावदेश-कालादीनां वैलक्षण्येन ज्ञायमानस्यार्थान्तरस्य या बोधिका भवति सार्थी व्यञ्जना । इयमपि वाच्यलक्ष्यव्यङ्ग्यार्थभेदेन त्रिविधा जायते । तथा च वाच्यार्थव्यञ्जना, लक्ष्यार्थव्यञ्जना, व्यङ्ग्यार्थव्यञ्जना चेति त्रिविधा आर्थी व्यञ्जनेति दिक् ।

(२०) प्रश्नः—अनेकार्थस्य शब्दस्य वाचकतायां के नियामका भवन्ति ? इति विशदं विविच्य लिखत ।

अथवा

अभिधानियामकानां संयोग-विप्रयोगादीनां स्वरूपं सोदाहरणं स्पष्टीक्रियताम्। (१९३२, ४०)

उत्तरम्—नानार्थकस्य शब्दस्य एकत्रार्थेऽभिधया नियमने संयोगादयो हेतवो भवन्ति। यथा चाह भर्तृहरिः—

'संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥'

एते संयोगादयः शब्दवाच्यार्थस्य अनिश्चये सति, कतमोऽर्थोऽत्र विवक्षितः, इति सन्देहे सति, तदपाकरणद्वारेण विशेषज्ञानजनका भवन्ति।

तत्र संयोगः प्रसिद्धः सम्बन्धः। यथा—'सशङ्खचक्रो हरिः' इति। अत्र 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यनेकार्थको हरिशब्दो, विष्णुर्यमादिर्वा, इति सन्देहे सति शङ्खचक्रयोगेन विष्णुमेवाभिधत्ते। विप्रयोगस्तावत्, तत्सम्बन्धध्वंसः। यथा—'अशङ्खचक्रो हरिः' अत्र शङ्खचक्रवियोगेन तमेव विष्णुमभिधत्ते। साहचर्यं=सहचरता। यथा—'भीमार्जुनौ' इति। अत्र वृक्षपार्थाद्यनेकार्थः, अर्जुनशब्दो भीमसाहचर्यात् पार्थमेवाभिधत्ते। विरोधिता=वैरम् (वध्यघातकत्वम्)। यथा—'कर्णार्जुनौ' अत्र विरोधितया, कर्णः=सूतपुत्रः एव, न तु श्रवणेन्द्रियम्। अर्थः=प्रयोजनम्। यथा—'स्थाणुं वन्दे', अत्र भवच्छेदनप्रयोजनात्, स्थाणुः=शिव एव, न तु शङ्कुः। प्रकरणं=वक्तृश्रोतृबुद्धिस्थता। यथा—'सर्वं जानाति देवः', अत्र प्रकरणत्वाद् देवः=प्रकृतो राजा, न तु सुरः। लिङ्गं संयोगातिरिक्तसम्बन्धेन परपक्षवृत्तो धर्मः। यथा—'कुपितो मकरध्वजः' अत्र कोपस्य प्राणिधर्मस्य समवायेन चेतने कामे एव सम्भवात्, मकरध्वजः=कामो, न तु समुद्रः। अन्यसन्निधिर्यथा—'देवः पुरारिः', अत्र देवशब्दसान्निध्यात् पुरारिशब्दः शिवमेवाभिधत्ते न त्वन्यं कञ्चन। सामर्थ्यं=नियतशक्तिः। यथा—'मधुना मत्तः पिकः', अत्र मधुर्वसन्तः न तु मद्यम्, वसन्ते एव कोकिलमादनस्य सामर्थ्यात्। औचिती=योग्यता। यथा—'पातु वो दयितामुखम्', अत्र मुखम्=साम्मुख्यम्, न तु वदनम्। देशः=

स्थानम् । यथा—'विभाति गगने चन्द्रः', अत्र गगनदेश-सम्भवात्, चन्द्रः= शशिरेव, न तु कर्पूरादिकम् । कालो यथा—'निशि चित्रभानुः' अत्र चित्रभानुः=अग्निः, न तु सूर्यः, रात्रिसमये तस्यासम्भवात् । व्यक्तिः=लिङ्गम्, स्त्रीपुंस्त्वादिः । यथा—'भाति रथाङ्गम्', अत्र नपुंसकलिङ्गेन, रथाङ्गं = चक्रमेवाभिधीयते न तु चक्रवाकः, तद्वाचकस्य पुंल्लिङ्गत्वात् । स्वरस्तु वेदे एव विशेषप्रतीतिकृत्, न काव्ये । अतस्तस्य विषयो नोदाहृतः । आदिशब्दात् 'एतावन्मात्रस्तनी' इत्यादौ हस्तचेष्टादिभिः स्तनादीनां कमलकोरकाद्याकारत्वं द्योत्यते

(२१) प्रश्नः– काव्ये स्वरस्योदाहरणमस्ति न वा ? अस्ति चेत्, कथं नोदाहृतम्, नास्ति चेत्, किं प्रमाणम् ? इति यथाशास्त्रं विविच्यताम् । (१९६७)

उत्तरम्—स्वरस्तु वेदे एव विशेषप्रतीतिकृत्, न काव्ये । अतस्तस्योदाहरणमपि नेति सिद्धान्तः ।

परमत्र केचिद् भट्टादयश्चण्डीदासादयश्च वदन्ति—स्वरोऽपि काक्वादिरूपः, काव्ये विशेषप्रतीतिकृदेव । उदात्तादिरूपोऽपि मुनेः (भरताचार्यस्य) पाठोक्तदिशा शृङ्गारादिविशेषप्रतीतिकृदेव । उक्तं च भरतेन—

'हास्यशृङ्गारयोः कार्यौ स्वरौ मध्यमपञ्चमौ ।
षड्जर्षभौ तथा चैव वीररौद्राद्भुतेषु च' ।। इति ।

अत एतद्विषये उदाहरणमुचितमेवेति ।

अत्रोच्यते—स्वराः काक्वादय उदात्तादयो वा व्यङ्ग्यरूपमेव विशेषं प्रत्यायन्ति, न तु संयोगादय इवानेकार्थस्य शब्दस्य एकार्थनियन्त्रणरूपं विशेषम्, इति नैषामभिधानियामकत्वं वाच्यम् ।

न च क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावाद् अनियन्त्रितयोरप्यर्थयोरनुरूपस्वरवशेनैवैकत्र नियमनं वाच्यम् । अन्यथा तथाविधस्थले श्लेषालङ्कारानङ्गीकारप्रसङ्गः स्यात् । तत्र श्लेषस्तु स्वीक्रियते एव । अत एव श्लेषप्रस्तावे उक्तम्—काव्यमार्गे स्वरो न गण्यते, इति । यतः—

'स्वरभेदे हि अर्थभेदः, अर्थभेदे च शब्दभेदः ।
अतः सिद्धं काव्यमार्गे स्वरो न गण्यते, इति ।।'

(२२) प्रश्नः— तात्पर्यवृत्तिस्वीकारे का वाचोयुक्तिः ? साहित्यिकास्तां स्वीकुर्वन्तु न वा ? विशदं विवेच्यत ।

उत्तरम्—तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने ।
'तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे ॥'

अभिधाया एकैकपदार्थबोधनविरमात्, एवं लक्षणायाश्च लक्ष्यार्थबोधनविश्रामात् शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति न्यायात् पुनरुत्थानासम्भवात् वाक्यार्थरूपस्य पदार्थान्वयस्य बोधिका तात्पर्यं नाम वृत्तिः । तात्पर्यवृत्त्यर्थश्च तात्पर्यार्थः, तात्पर्यार्थबोधकं च वाक्यमिति अभिहितान्वयवादिनां मतम् ।

अयं भावः— घटं करोति, इत्यादिवाक्ये अभिधा घटपदेन कम्बुग्रीवादिमन्तं पदार्थम्, अम्विभक्त्या कर्मत्वमभिधाय विरमति । वृत्तिता तु न कस्याप्यर्थः । इति अपदार्थोऽपि वृत्तिता तात्पर्यवशात् अनयोः संसर्गविधया भासते । इत्थं तात्पर्यवृत्त्यैव पदार्थानां मिथः अन्वयो भवतीति अभिहितान्वयवादिनः ।

अन्विताभिधानवादिनां प्रभाकरमीमांसकानां मते तु पदार्थसंसर्गस्य पदशक्यत्वाङ्गीकारेण तात्पर्यवृत्तिर्नावश्यकी ।

साहित्यिका अपि भाट्टमतमेव स्वीकुर्वन्ति । काव्यप्रकाशे— इत्यभिहितान्वयवादिनां मतम्, इति बहुवचनेन, इत्यन्विताभिधानवादिनः इति चैकवचनेन कथनात् ज्ञायते यत् काव्यप्रकाशकाराणां भाट्टमतमेवाभिमतम् ।

एतेनेदं सिद्धं यत् साहित्यिकानां मते तात्पर्याख्यवृत्तिप्रतिपाद्यः तात्पर्यार्थो अस्तीति दिक् ।

इति साहित्यदर्पणालोके द्वितीयः परिच्छेदः ॥

तृतीयः परिच्छेदः

(२३) प्रश्नः—'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इति रसस्य स्वप्रकाशत्वम् अखण्डत्वं च यथा सिद्ध्यति तथोपपाद्य रसानुभूतिः क्व ? इति प्रतिपादयत ।

उत्तरम्—ननु रसात्मकवाक्यस्य काव्यत्वमुक्तम्। तत्र को रस इति जिज्ञासायामाह—'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः'। अस्यायमर्थः—स्थायिनां विभावादिभिः समं व्यङ्ग्यव्यञ्जकभावरूपाद् सम्बन्धाद्, विभावादीनां वा परस्परं संयोगात्=मिलनात्, रसस्य निष्पत्तिः=अभिव्यक्तिः, भवतीति। तथा हि—लोके प्रमदादिभिरालम्बनकारणैः, चन्द्रिकादिभिरुद्दीपनकारणैः, अश्रुपातादिभिः कार्यैः, चिन्तादिभिः सहकारिभिः उत्कण्ठादिभिश्च स्थायिनो रत्यादेरनुमितिविषये परिशीलनबलेन झटिति प्रवृत्तिमतां सामाजिकानां वासनारूपतयाऽन्तःस्थितः काव्ये नाट्ये च गुणालङ्कारयोगेन कायिकवाचिकसात्त्विकाहार्यरूपेणाभिनयेन च तैरेव कारणत्वादिव्यपदेशपरित्यागेन विभावनानुभावनसञ्चारणरूपव्यापारवत्तया अलौकिकविभावानुभावसञ्चारिशब्दव्यवहार्यैः ममैवैते, शत्रोरेवैते, इत्यादिसम्बन्धविशेषस्वीकारनियमस्य, न ममैवैते, न शत्रोरेवैते, इत्यादिसम्बन्धविशेषपरिहारनियमस्य चानिर्णयात् सीतात्वादिव्यक्तिविशेषांशरहितेन कामिनीत्वेन प्रतीतैरभिव्यक्तः, सूक्ष्मसंस्काररूपेण पूर्वत एवावस्थितः केवलमिदानीं साधारणीकृतविभावादिभिराविर्भूतो रत्यादिस्थायी नियतप्रमातृगतोऽपि व्यक्तिविशेषांशपरिहारवशात् लौकिकज्ञेयान्तरसम्पर्कशून्यचेतसा सकलसहृदयसंवादभाजा प्रमात्रा स्वाकार इवाभिन्नोऽपि गोचरीकृतः, चर्व्यमाणत्वैकप्राणः विभावादिप्रतीतिकालमात्रस्थायिकः पानकरसन्यायेन चर्व्यमाणः पुर इव परिस्फुरन्, हृदयमिव प्रविशन्, सर्वाङ्गीणमिवालिङ्गन्, अन्यत्सर्वं तिरोदधद् ब्रह्मास्वादमिवानुभावयन् अलौकिकचमत्कारकारी शृङ्गारादिको रसः। तत्रास्ति क्रमः किन्तूत्पलशतव्यतिभेदवद् लाघवात् (आशुतरत्वात्) न लक्ष्यते।

यदि मिलिता रत्यादयो रसास्तर्हि रसस्य स्वप्रकाशत्वम् अखण्डत्वं च केन सिद्ध्यतीति? यतो हि स्वप्रकाशता ज्ञाने भवति न रत्यादिषु, रत्यादीनां सम्मिश्रितत्वाच्च रसस्य अखण्डता सिद्ध्यतीति न वाच्यम्? रसस्याभिव्यक्तिः रत्यादिज्ञानतादात्म्यादेव भवति। अर्थाद् रत्यादिज्ञानस्वरूपमेव रसः। ज्ञानस्य स्वप्रकाशताऽखण्डता च सिद्धैव। अतः रसोऽपि स्वप्रकाशः, अखण्डश्च सिद्धयति। यदि रत्यादिकं प्रकाशशरीरादतिरिक्तं स्यात्तदैवास्य रसस्य स्वप्रकाशत्वं सिद्ध्येत्, न च तथा ज्ञानेन सह रत्यादेः तादात्म्याङ्गीकारादिति। यदुक्तम्—

'यद्यपि रसानन्यतया चर्वणापि न कार्या तथापि कादाचित्कतया कार्यत्वमुपकल्प्य तदेकात्मनि अनादिवासनापरिणतिरूपे रत्यादिभावेऽपि व्यवहार इति भावः।' इति। 'सुखादितादात्म्याङ्गीकारे चास्माकीं सिद्धान्तशय्यामधिशय्य दिव्यं वर्षसहस्रं प्रमोदनिद्रामुपेयाः' इति च। 'अभिन्नोऽपि स प्रमात्रा वासनोपनीतरत्यादितादात्म्येन गोचरीकृतः' इति च।

अनेन रसस्य ज्ञानस्वरूपा स्वप्रकाशताऽखण्डता च सिद्धा भवति।

नैयायिकास्तु ज्ञानस्य ज्ञानमनुव्यवसायेन स्वीकुर्वन्ति, तदयुक्तम्। यतो हि ज्ञानस्य ज्ञानमनुव्यवसायेन, अनुव्यवसायस्य ज्ञानं तदन्येन तस्यापि ज्ञानं तदन्येनेति स्वीकारे मूलक्षतिकरी अनवस्था स्यात्। ज्ञानतादात्म्यादेव रसस्याखण्डता स्वप्रकाशता च सिद्धा भवति। अत एवोक्तम्—

'विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः।
प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम्॥'

रसानुभवश्च प्रमातरीति विज्ञेयम्।

(२४) प्रश्नः—रसस्य सुपरिष्कृतं सामान्यलक्षणमभिधाय क्वचिल्लक्ष्ये समन्वयः क्रियताम्। कश्च तस्यास्वादनप्रकारः? (१९५२, ५४, ६४, हि० प्र० यू० १९८०, ८१) 2023

उत्तरम्—'सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥
लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥'

सत्त्वाख्यस्य गुणस्योद्रेकात्=रजस्तमसी अभिभूय आविर्भावात्। तत्र हेतुस्तथाविधकाव्यपरिशीलनम्। अखण्डः प्रत्येक एवाऽयं विभावादिसमूहालम्बनात्मकः, स्वप्रकाश आत्मनैव प्रकाशितः, आनन्दचिन्मयः=आमोदमिश्रितज्ञानस्वरूपः, वेद्यान्तरस्य=अन्यज्ञेयस्य, स्पर्शशून्यः=तत्काले सम्पर्करहितः, ब्रह्मास्वादसहोदरः=ब्रह्मज्ञानसमानः, लोकोत्तरचमत्कारप्राणो रस इत्यर्थः।

अयं च रसः स्वाकार इवाभिन्नत्वेनास्वाद्यते। अयमर्थः—यथात्मनो भिन्नेष्वपि शरीरादिषु 'गौरोऽहम्', 'काणोऽहम्', इत्यादिनाभेदः प्रतीयते, एवमेवात्मनो भिन्नोऽपि आनन्दचमत्कारमयो रस आत्मनोऽभिन्नत्वेन प्रतीयते इति।

उदाहरणं यथा—

'भो लङ्केश्वर ! दीयतां जनकजा रामः स्वयं याचते,
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किञ्चिद् गतम् ।
नैवं चेत्खरदूषणत्रिशिरसां कण्ठसृजा पङ्किलः
पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः ॥'

अत्र रावण आलम्बनविभावः, एतादृशोक्तिरनुभावः, 'न सहिष्यते' इति गम्यगर्वादयश्च सञ्चारिभावाः, एवं परस्परमिलितैः सर्वैर्विभावादिभिरभिव्यक्तः श्रीरामस्य युद्धोत्साहः स्थायीभावः साधारण्येन सामाजिकानां वासनया अनुभवविषयीकृतो युद्धवीररसतामापद्यते । अयं च वीररसो दानवीरो, धर्मवीरो, युद्धवीरो, दयावीरश्चेति चतुर्धा भवति ।

(२५) प्रश्नः—विभावानुभावसञ्चारिसात्त्विकभावानां लक्षणमभिधीयताम् ।

उत्तरम्—'रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः ।' इति । ये हि लोके रामादिगतरतिहासादीनामुद्बोधकारणानि सीतादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तः 'विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिः' इति विभावा उच्यन्ते ।

स च विभावो द्विविधः—आलम्बनविभावः, उद्दीपनविभावश्चेति । तत्रालम्बनविभावो यथा—

'आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात् ।'

आदिशब्दान्नायिकाप्रतिनायिकादयः ।

उद्दीपनविभावो यथा—

'उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ।'

अनुभावस्य लक्षणम्—'उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥'

यः खलु लोके सीतादिचन्द्रादिभिः स्वैः स्वैरालम्बनोद्दीपनकारणैः रामादेरन्तरुद्बुद्धं रत्यादिकं बहिः प्रकाशयन् कार्यमुच्यते स एव काव्यनाटययोः पुनरनुभावः कथ्यते । 'रत्यादीन् स्थायिनः, अनुभावयन्ति, अनुभवविषयीकुर्वन्तीति अनुभावाः' ।

व्यभिचारिभावस्य लक्षणम्—

'विशेषादाभिमुख्येन चरणाद् व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः ॥'

स्थिरतया वर्तमाने हि रत्यादौ निर्वेदादयः प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन चरणात्=प्रवर्तनात्, व्यभिचारिणः कथ्यन्ते । विशेषेणाभितः सर्वाङ्गव्यापितया रत्यादीन् स्थायिनः काव्ये चारयन्ति=सञ्चारयन्ति, मुहुर्मुहुरभिव्यञ्जयन्तीति वा व्यभिचारिणः ।

सात्त्विकभावलक्षणम्—'विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्तिताः ।' सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनान्तरो धर्मः । ते च सात्त्विकभावाः सत्त्वमात्रोद्भवत्वात् अनुभावतो 'गोबलीवर्दन्यायेन भिन्नाः' इति ।

(२६) प्रश्नः—वत्सलरसः कस्य मते ? तत्र 'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ॥' इति विरोधपरिहारः कथम् ? इति साधु विवेचनीयम् ।

(वा० सं० वि० वि० १९५२, ६४)

उत्तरम्—ननु 'शृङ्गारहास्यकरुणरौद्रवीरभयानकाः । बीभत्साद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ॥' इति कारिकायां नवरसानामेव गणना दृश्यते, एभ्योऽधिका अपि रसाः सन्ति न वेति चेत् ? श्रूयताम्—भरतमुनिसम्मतो वत्सलश्च दशमो रसोऽस्ति । तत्र चमत्कारस्य स्फुटयता रसत्वमस्त्येव अत्र, स्थायीभावः वत्सलतास्नेहः, पुत्रादिकमालम्बनम्, पुत्रादीनां चेष्टा उद्दीपनानि, शिरश्चुम्बनादीनि अनुभावाः, अनिष्टशङ्का हर्षादयो व्यभिचारिणः सन्ति ।

न च पूर्वरसभेदप्रतिपादकश्लोके नवरसानामेव गणना, अनेन तु तत्र न्यूनता, इति वाच्यम् । 'शान्तस्तथा मतः' इत्यत्र तथाशब्देन भरतमुनिसम्मतस्यास्य संग्रहात् । न च जीवगोस्वामिसम्मतानां प्रेमादीनामपि रसत्वं स्यादिति वाच्यम् । आदिमुनिभरतवचनस्य प्रामाणिकत्वेन वत्सलरसस्यैव ग्रहणं न तु प्रेमरसस्येति दिक् ।

उदाहरणं यथा—

'यदाह धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चाङ्गुलीम् ।
अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः ॥'

अत्र बालो रघुरालम्बनविभावः, उक्तभाषणादिकम् उद्दीपनविभावः, अध्याहारलभ्या आलिङ्गनादयोऽनुभावाः। एतैः समुदितैः विभावादिभिः, दिलीपस्य स्नेहः स्थायीभावः साधारण्येन सामाजिकानां वासनयाऽनुभवविषयीकृतः सभ्येषु वत्सलरसतामापद्यते।

(२७) प्रश्नः— करुणादीनां रसानां दुःखमयत्वात् कथं रसत्वम् ? कथं वा दुःखकारणेभ्यः सुखोत्पत्तिरिति लिख्यताम्। (१९४६)

उत्तरम्—ननु करुणादीनां रसानां दुःखमयत्वात् कथं रसत्वं कथं वा दुःखकारणेभ्यः सुखोत्पत्तिरिति चेत् ? श्रूयताम्—करुणादावपि रसे यत्परं सुखमुत्पद्यते तत्र सहृदयानामनुभव एव प्रमाणमस्ति। अपि च तेषु यदि दुःखं स्यात्तदा कोऽपि पुरुषः तदुन्मुखो न स्यात्। न हि कश्चित् सचेतन आत्मनो दुःखाय प्रवर्तते। करुणादिरसप्रधानेष्वपि काव्येषु नाटकेषु च सर्वेषां साभिनिवेशप्रवृत्तिर्दर्शनात्। शृङ्गारादिभ्य इव करुणरसप्रधानेभ्यः काव्येभ्योऽपि आह्लादस्वरूपरसधारायाः प्रत्यक्षानुभवविषयत्वात्। किञ्च करुणरसस्य दुःखहेतुत्वे करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुताप्रसङ्गः स्यात्। यथा सति लोकस्य तत्र प्रवृत्तिरेव न स्यात्। भवति च प्रवृत्तिः, अतो न दुःखहेतुता तेषामिति।

ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिः, कथं वा करुणरसप्रधाननाटकादिदर्शनेन अश्रुपातादयो जायन्ते ? इत्यपि न वाच्यम्। ये खलु वनवासादयो लोके दुःखकारणानि इत्युच्यन्ते, त एव हि काव्यनाटचसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यतां विहायालौकिकविभावशब्दवाच्यत्वं भजन्ते। तेभ्यश्च सुरते दन्तघातादिभ्य इव सुखमेव जायते। अतश्च लौकिकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोके एव प्रतिनियमः। काव्ये पुनः सर्वेभ्यो विभावादिभ्यः सुखमेव जायते। अपि च हरिश्चन्द्रादिचरितस्य काव्यनाटचयोरपि दर्शनश्रवणाभ्यां ये अश्रुपातादयः सामाजिकानां जायन्ते ते चेतसो रसानन्देन द्रवीभावात् सुखोत्पत्तिवदेव।

ननु तर्हि रसानामानन्दमयत्वे सति, ईदृशी आह्लादरूपा रसाभिव्यक्तिः सर्वेषां कथं न भवति ? इति न वाच्यम्।

'न जायते तदास्वादो विना रत्यादिवासनाम्।'

रत्यादिवासनां विना रसास्वादो न भवति । उक्तं च धर्मदत्तेन—

'सवासनानां सभ्यानां रसस्यास्वादनं भवेत् ।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः' ॥ इति ।

(२८) प्रश्नः—'नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवति व्यञ्जनायाश्च ज्ञानविशेषत्वाद् द्वयोरैक्यमापतितम्' अस्याः पङ्क्तेराशयः विशदीक्रियताम् । (वा० सं० वि० वि० १९५१, ६७, ७१)

उत्तरम्—ननु भवान् 'प्रकाशशरीरादनन्य एव हि रसः' इति कथनानुसारं ज्ञानस्वरूपमेव रसं मन्यते चेत्तदा सोऽज्ञेय एव सिद्धः; ज्ञेयोऽर्थाज्ज्ञानविषयो न सिद्धः । यतो हि ज्ञानं सदा स्वविषयभूतेभ्यो घटपटादिभ्यो भिन्न एव भवति । अत आस्वादस्वरूपः प्रकाश(ज्ञान-)स्वरूपो वा रसो नास्वादस्य ज्ञानस्य वा विषयो वा भवितुमर्हति । एवञ्च व्यञ्जना, अर्थाद् व्यञ्जनाजन्यबोधो रसश्चेति द्वयोरपि ऐक्यमेवापतितम् । यतो हि व्यञ्जनाजन्यबोधोऽपि ज्ञानविशेष एव भवति । पूर्वोक्तप्रकारेण रसश्चापि ज्ञानविशेष एव सिद्धः । अतो रसो व्यञ्जना(व्यञ्जनाजन्यबोध-)स्वरूप एव सिद्धो नासौ व्यञ्जनाजन्यबोधस्य विषयः सिद्धः । ततश्च कथं रसस्य व्यङ्ग्यता ? यतो हि—

'स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः ।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात् ॥'

इत्युक्तदिशा घटप्रदीपयोरिव व्यङ्ग्यव्यञ्जकयोः सदा सार्थक्यमेव भवति, पार्थक्ये एव च व्यङ्ग्यव्यञ्जकभावो भवितुमर्हति नाऽभिन्नतायामिति चेत् ? सत्यमुक्तम् । अत एवाहुः—'विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः भिन्नः स्वादनाख्यः कश्चिद् व्यापारः ।' इति । अत एव (विलक्षणत्वादेव) हि रसनास्वादनचमत्कारणादयो विलक्षणा एव व्यपदेशा भवन्ति । व्यञ्जनामात्रप्रसाधनग्रहितैरस्माभिरपि रसादीनां व्यङ्ग्यत्वम् (व्यञ्जनाजन्यबोधविषयत्वम्) उच्यते एवेति दिक् ।

(२९) प्रश्नः—साधारणीकरणव्यापारस्वीकारे वाचोयुक्तीः प्रदर्शयत ।

उत्तरम्—ननु कथं रामादिरत्याद्युद्बोधकारणैः सामाजिकरत्याद्युद्बोध इति चेत् ? उच्यते—

एकः साधरणीकरणाख्यो व्यापारः स्वीक्रियते। अस्यव प्रभावेण प्रमाता (श्रोता दृष्टा च) तदानीं समुद्रनिग्रह-रावणवधादिकारिभ्यो रामादिभ्य आत्मानम् अभिन्नत्वेन मन्यते। एवमेत्र रत्यादयोऽपि साधारण्येनैव प्रतीयन्ते। अन्यथा रत्यादेरपि स्वात्मगतत्वेन प्रतीतौ सभ्यानां व्रीडातङ्कादिर्भवेत्। परगतत्वेन प्रतीतौ त्वरस्यतापातः स्यात्। अपि च परस्येति, न परस्येति, ममेति, न ममेति चेत्यादिरूपेण विभावादेः आस्वादे परिच्छेदो न भवति, किन्तु ते प्रथमतः साधारण्येनैव प्रतीयन्ते, इति दिक्।

(३०) प्रश्नः—रसास्वादे विभावादीनामेकः, प्रतिभासः कथमुपपद्यते ? विविच्य लिखत।

उत्तरम्—ननु विभावानुभावनसञ्चारणेनाऽलौकिकव्यापारेण रसस्य कारणत्वे तेषामेकरूपतया कथं परिणाम इति चेत् ? श्रूयताम्—प्रथमं प्रतीयमानो विभावादिः प्रत्येकं हेतुरुच्यते। ततः सम्मिलितः सर्वो विभावादिः सहृदयानां प्रपाणकरसन्यायाच्चर्व्यमाणो रसरूपतां भजते। यथा—प्रपाणकरसे खण्डमरिचादीनां सम्मेलनादपूर्व एव कश्चिदास्वादः सञ्जायते तथा विभावादिसम्मेलनादिहापि, इति दिक्।

(३१) प्रश्नः—यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्तत् कथं तेषामेकस्य द्वयोर्वा सद्भावेऽपि स स्याद् ? इति विविच्य लिखत।

उत्तरम्—ननु यदि विभावानुभावव्यभिचारिभिर्मिलितैरेव रसस्तत्कथं तेषामेकस्य द्वयोर्वा सद्भावे रसानुभूतिः स्यादिति चेत् ? उच्यते—यत्र काव्ये विभावादीनां मध्ये एकस्य द्वयोर्वा सद्भावो भवेच्चेत् तर्हि शीघ्रमेवान्येषां प्रकरणवशात् समाक्षेपाद् (व्यञ्जनया बोधाद्) रसनिष्पत्तौ बाधकाभावाद् दोषो न भवति। यथा—

'दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहूनतावंसयोः,
सङ्क्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव।
मध्यः पाणिमतो नितम्बि जघनं पादावुदग्राङ्गुली
छन्दो नर्तयितुर्यथैव मनसः सृष्टं तथाऽस्या वपुः॥'

अत्र मालविकामभिलषतः अग्निमित्रस्य मालविकारूपस्य विभावमात्रस्य वर्णनेऽपि सञ्चारिणामौत्सुक्यादीनामौचित्यादेव (वाच्यस्य आलम्बनविभा-

वस्य वैशिष्ट्यादेव) आक्षेपो (व्यञ्जनया बोधः) भवति। ततो रसाभिव्यक्तिर्जायते। एवमन्येषामाक्षेपेऽपि बोध्यम्।

(३२) प्रश्नः—'अनुकार्यगतो रस' इति कस्य मतं ? किं च तत्कथनं भवते रोचते ? इति सम्यक् प्रतिपादयत। (१९४९, ५२, ६८)

ललनादिभिरालम्बनविभावैः रत्यादिको भावो जनितः, उद्यानचन्द्रिका-कोकिलरव-भ्रमरझङ्कारादिभिरुद्दीपनविभावैरुद्दीपितः, कटाक्ष-भुजाक्षेप-काकूक्तिप्रभृतिभिरनुभावैः स्तम्भस्वेदरोमाञ्चादिभिः सात्त्विकैश्च प्रतीतियोग्यतां नीतः, निर्वेदचिन्तालस्योत्कण्ठादिभिः व्यभिचारिभिः पोषितः, साक्षात्सम्बन्धेनानुकार्ये रामादौ स्थितोऽपि रामतुल्यवेषभूषाचारादियुते नर्तकादावपि रामत्वारोपात् सहृदयैरारोप्यमाणो रसपदवाच्यो भवति। इति भट्टलोल्लटप्रभृतीनां सिद्धान्ताद् अनुकार्यगत एव रस इति चेत् ? न। तथाहि—

'पारिमित्याल्लौकिकत्वात्सान्तरायतया तथा।
अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्॥'

सीतादिदर्शनादिजो रामादिरत्याद्युद्बोधः परिमितः=रामादिमात्रनिष्ठत्वेनाल्पः, लौकिको निर्दिष्टत्वेन तत्रैव दृष्टत्वात्; सान्तरायः=नाट्यकाव्यदर्शनश्रवणप्रतिकूलतया विघ्नसहितश्च वर्तते। रसस्य तु, अपरिमितत्वात्, अलौकिकत्वात् निरन्तरायत्वाच्च कथमनुकार्यगतत्वं सम्भवतीति भट्टलोल्लटादीनां कथनमसङ्गतमेव।

(३३) प्रश्नः—रसस्यानुकर्तृगतत्वं कस्य मते ? किञ्च तस्य मतं भवते रोचते ? इति विशदं विविच्यताम्।

उत्तरम्—ननु यथा कुज्झटिकापातसङ्कुले देशेऽविद्यमानस्यापि धूमस्य अभिमानाद् धूमनियतस्य वह्नेरनुमानम्, तथा नटेनैव ममैवैते विभावाद्या इति नैपुण्येन प्रकटीकृतैस्तत्राविद्यमानैरपि विभावादिभिः तन्नियता रतिरनुमीयमानाऽपि निजसौन्दर्यबलात् सामाजिकानां वासनयाऽऽस्वाद्यमानतया चमत्कृतिमावहन्ती रसतामापद्यते। अत्र नटे अनुमीयमानो रत्यादिभावः सामाजिकानां वासनया चर्व्यमाणो रसः। इदं प्रसिद्धतार्किकस्य श्रीशङ्कुकस्य मतम्। परं नेदं युक्तियुक्तम्। यतः—

'शिक्षाऽभ्यासादिमात्रेण राघवादेः सरूपताम्।
दर्शयन्नर्तको नैव रसस्यास्वादको भवेत्॥'

अभिनयस्य शिक्षयाऽभ्यासेन च राघवादेः स्वरूपस्याभिनयं कुर्वन् नटो (अनुकर्ता) रसस्यास्वादको नैव भवितुमर्हति । दृश्ये अभिनयस्य सम्पादने व्यग्रचित्तत्वात्, श्रव्ये च यथास्थितपाठेन व्याप्तचित्तत्वाद् रसस्यास्वादको न स्यात् । रसस्य काव्यार्थभावनयैव प्रतीतेः ।

ननु यदि काव्यार्थभावनापूर्वकं नटोऽभिनयं कुर्यात्तदा रसास्वादः किं तस्य न स्यात् ? उच्यते—

यदि नटोऽपि काव्यार्थभावनया रामादिस्वरूपतामात्मनो दर्शयेत्तदा सोऽपि सभ्य एव गण्यते । अर्थात्तदानीं नटो नटत्वेन रसास्वादको न किन्तु सहृदयत्वेनैवेति भावः । सहृदय एव रसास्वादको नाऽन्य इति निष्कर्षः ।

(३४) प्रश्नः—रसस्यालौकिकत्वं सत्यत्वं स्वप्रकाशत्वं च व्यवस्थाप्यताम् । (वा० सं० वि० वि० १९५७, ७४, ७९)

उत्तरम्—ननु यथा प्रदीपादिना घटो ज्ञाप्यो भवति । तथैव रसोऽपि ज्ञाप्यः कुतो नेति चेत् ? न । यो हि ज्ञाप्यो घटादिः स विद्यमानोऽपि कदाचिद् (ज्ञानसामग्र्यभावदशायाम्) अज्ञातो भवति, किन्तु रसस्तथा न, प्रतीतिमन्तरेणाभावात् ।

अयं रसो विभावादिज्ञानकारणकः, अतः कार्यः कुतो नेत्यपि न वाच्यम् । यदि रसः कार्यः स्यात्तदा विभावादिज्ञानकारणक एव स्यात् । ततश्च रसप्रतीतिकाले विभावादयो न प्रतीयेरन् कारणज्ञानतत्कार्यज्ञानादीनां युगपददर्शनात् । न हि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानं चैकदा सम्भवति । रसस्य च विभावादिसमूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणकत्वम् । तस्माद् रसो न कार्यः ।

ननु यदि रसो न कार्यस्तत्कथं महर्षिणा भरतेन 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इत्युक्तम् ? उच्यते—चर्वणस्य निष्पत्त्या रसस्य निष्पत्तेरौपचारिकत्वात् (लाक्षणिकत्वात्) । न च रसभिन्नतया चर्वणस्यापि कार्यत्वं कुत इति वाच्यम् ? चर्वणस्य कादाचित्कतया तत्रोपचारितेन कार्यत्वेन रसेऽपि कार्यत्वमुपचर्यते ।

यदि रसो न कार्यस्तर्हि नित्यः स्यादित्यपि न वाच्यम् । विभावादिज्ञानात् प्रागस्य संवेदनाभावात् । यदि रसो नित्यः स्यात्तदा विभावादि-

ज्ञानात् प्रागपि ज्ञायेत। किञ्चासंवेदनकाले भावोऽप्यस्य न विद्यते। न च नित्यवस्तुनोऽसंवेदनकालेऽसम्भवः। तस्माद् रसो न नित्यः।

न च भविष्यन्, साक्षात्कारविषयानन्दबहुलप्रकाशरूपत्वात्। यदि रसो भविष्यन् स्यात्तदाऽनुभवविषयो न स्यात्।

न च रसो वर्तमान इत्यपि वक्तुं शक्यते। यतो हि वर्तमानं वस्तु कार्यं ज्ञाप्यं वा भवति। रसस्य च कार्यज्ञाप्यविलक्षणत्वान्न वर्तमानत्वम्।

रसो न निर्विकल्पकज्ञानसंवेद्यः। सहृदयानां विभावादिपरामर्शविषयत्वात् परमानन्दमयत्वेन संवेद्यत्वाच्च। निर्विकल्पकं ज्ञानं हि निष्प्रकारकं भवति। अस्य तु विभावादिसमूहालम्बनात्मकत्वादेव सप्रकारता।

तर्हि रसः, सविकल्पकज्ञानसंवेद्यः कुतो नेति वाच्यम्। वचनप्रयोगयोग्यत्वाभावात्। सविकल्पकज्ञानसंवेद्यानां हि भवति वचनप्रयोगयोग्यता। रसस्य तु न तथा। अतो नास्ति रसः सविकल्पकज्ञानसंवेद्यः।

न च रसस्य प्रकाशः परोक्ष इति वाच्यम्। स्वादनाख्यव्यापारस्य मनःसन्निकर्षजन्यत्वेन साक्षात्कारतया परोक्षत्वासम्भवात्।

नापि रसोऽपरोक्षः। काव्यादिशब्दजन्यविभावादिज्ञानजन्यत्वात्।

अतो रसस्य ज्ञाप्यत्व-कार्यत्व नित्यत्व-भविष्यत्व-वर्तमानत्व-निर्विकल्पकज्ञानसंवेद्यत्व-सविकल्पकज्ञानसंवेद्यत्व-परोक्षत्वापरोक्षत्व-विलक्षणत्वादलौकिकत्वम्। सहृदयैर्वेद्यत्वाच्च सत्यत्वं रत्यादिज्ञानरूपत्वाचच स्वप्रकाशत्वमखण्डत्वं च सिद्धयति।

(३५) प्रश्नः—को नाम नायकः? कतिविधश्च सः? कानि च तेषां लक्षणानि? सोदाहरणं लिखत।

उत्तरम्—नायकः—त्यागी (दाता), कृती (वीरकर्मकुशलः), कुलीनः, सम्पत्तिशाली, सौन्दर्य तारुण्योत्साहसम्पन्नः, क्षिप्रकारी, तेजस्वी, गूढाभिप्रायज्ञः, सद्वृत्तश्च नायको भवति। स च धीरोदात्त-धीरोद्धत-धीरललित-धीरप्रशान्त-भेदेन चतुर्विधः। तत्र—

धीरोदात्तः—अनात्मश्लाघाकरः, क्षमाशीलः, अतिगम्भीरः, हर्षशोकादिरहितचित्तः, विनयच्छन्नगर्वः, दृढव्रतः नायको धीरोदात्तः कथ्यते। यथा—रामयुधिष्ठिरादिः।

धीरोद्धतः—मायापरः, प्रचण्डः, चपलः, दर्पाहङ्कारभूयिष्ठः, आत्मश्लाघानिरतः, एतादृशो नायको धीरोद्धत उच्यते । यथा—भीमसेनादिः ।

धीरललितः—निश्चिन्तः, मृदुः, नृत्यगीतादिकलापरः नायको धीरललित इति निगद्यते । यथा—रत्नावल्यां वत्सराज उदयनः ।

धीरप्रशान्तः—नायकसामान्यगुणैर्भूयिष्ठः द्विजादिको धीरप्रशान्तः कथ्यते । यथा—मालतीमाधवे माधवः ।

ते च पुनः प्रत्येकं दक्षिणधृष्टाऽनुकूलशठभेदेन चतुर्विधा भूत्वा षोडशधा भवन्ति । तत्र—

दक्षिणः—अनेकमहिलासु समरागो दक्षिणः कथ्यते ।

धृष्टः—कृतापराधोऽपि निःशङ्कः, तर्जितोऽपि न लज्जितः, दृष्टदोषोऽपि मिथ्यावचनः, धृष्ट उच्यते ।

अनुकूलः—एकस्यां नायिकायां निरतोऽनुकूलः कथितः ।

शठः—एकत्र बद्धभावः, अन्यत्र दर्शितबहिरनुरागः शठो भवति । तेषां च पुनरुत्तममध्यमाधमभेदेन मिलित्वा अष्टचत्वारिंशत् (४८) भेदा जायन्ते ।

(३६) प्रश्नः—नायकस्य कस्मिन् विषये के सहाया ? इति लिखत ।

उत्तरम्—नायकस्य बहुव्यापिनि प्रसङ्गगते इतिवृत्ते नायकसामान्यगुणैः किञ्चिदूनः पीठमर्दनामा सहायो भवति । यथा—रामचन्द्रादीनां सुग्रीवादयः ।

शृङ्गारे सहायाः—विटचेटविदूषकाः, मालाकार-रजक-ताम्बूलिकगान्धिकादयः शृङ्गारेऽस्य सहाया जायन्ते । ये अनुरक्ता नर्मकथानिपुणाः कुपितवधूमानभञ्जनाः शुद्धाश्च भवन्ति ।

अर्थचिन्तने सहायः—अर्थचिन्तने मन्त्री सहायो भवति । अपि च धीरललितस्य नायकस्य मन्त्री एवार्थचिन्तकः । ललितस्य नायकस्यार्थचिन्तनाद्यभावात् । शेषा धीरोदात्तादयो मन्त्रिण स्वेनोभयेन वाङ्गीकृतसिद्धयो भवन्ति ।

अन्तःपुरसहायाः—वामन-षण्ड-किरात-म्लेच्छाभीरशकारकुब्जाद्याः अस्याऽन्तःपुरसहाया जायन्ते ।

दण्डसहायाः—सुहृत्-कुमाराटविकाः सामन्तसैनिकाद्याश्च नायकस्य दण्ड सहाया भवन्ति ।

धर्मसहायाः—ऋत्विक्, पुरोहितः, ब्रह्मविदः, तापसाश्च नायकस्य धर्म सहायाः सन्ति ।

एषु पीठमर्दमन्त्रिपुरोहिततापसादय उत्तमाः सहायाः, विटविदूषकौ शकार-चेट-रजक-ताम्बूलिकगान्धिकादयस्तु अधमा सहायाः सन्ति ।

(३७) प्रश्नः—का नाम नायिका ? कतिविधा च सा ? इति नामतो निर्देश्या ।

उत्तरम्—नायकसामान्यगुणैर्युक्ता नायिका भवति । सा च प्रथमम्—'स्वीया-अन्या-साधारणी'-भेदात् त्रिविधा भवति । तासु स्वीयानायिकायाः—मुग्धा-मध्या-प्रगल्भा चेति त्रयो भेदाः । पुनः मध्याप्रगल्भे द्वेऽपि धीरा अधीरा-धीराधीरा चेति प्रत्येकं त्रैविध्येन षड्विधे कथिते । ततः मध्याप्रगल्भयोः । षड्भेदा अपि कनिष्ठा-ज्येष्ठा-भेदेन द्विधा भूत्वा द्वादशभेदाः मध्याप्रगल्भयोः । मुग्धा त्वेकैवेति स्वीया नायिका (१३) त्रयोदशभेदभिन्नेति वेदितव्यम् ।

अन्या तु परोढा-कन्यकाभेदेन प्रथमतो द्विधा, साधारणी चैकविधैव ।

तथा त्रयोदशविधा स्वीया, द्विविधा परकीया (अन्या); एका साधारणी चेति मिलित्वा षोडशभेदा एता नायिकाः । पुनश्च ताः प्रत्येकं स्वाधीनभर्तृका, खण्डिता, अभिसारिका, कलहान्तरिता, विप्रलब्धा, प्रोषितभर्तृका, वासक-सज्जा, विरहोत्कण्ठिता चेति अष्टविधा भूत्वा साऽष्टविंशतिशतभेदाः (१२८) भवन्ति । पुनः प्रत्येकम्–उत्तम-मध्यमाधमरूपेण चतुरशीतियुतशतत्रयभेदभिन्नाः (३८४) जायन्ते

(३८) प्रश्न —नार्या भावाभिव्यक्तेः साधनानि प्रदर्शयत ।

उत्तरम्—नार्यः लेखप्रस्थापनेन, सस्नेहविलोकनेन, मृदुवीक्षणेन, दूती-प्रेषणेन च भावाभिव्यक्तिं कुर्वन्ति । तत्र दूत्यः—सखी, नटी, दासी, धात्रेयी, प्रतिवेशिनी, वाला, प्रव्रजिता, रजकी, शिल्पिनी (चित्रकारस्त्री), ताम्बू-लिकस्त्री, गान्धिकस्त्रीप्रभृतयः ।

(३९) प्रश्नः—विभावानां परिचयो देयः ।

उत्तरम्—'रत्याद्युद्बोधका लोके विभावाः काव्यनाटययोः' ।

ये हि लोके रामादिगतरतिहासीनामुद्बोधकारणानि सीतादयस्ते एव काव्ये नाट्ये च निवेशिताः सन्तः, 'विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिः' इति विभावा उच्यन्ते । अर्थाद् ये वासनारूप-तयाऽतिसूक्ष्मरूपेण सामाजिकहृदयेऽवस्थितान् रत्यादीन् स्थायिनः विभावयन्ति= आस्वादयोग्यतां नयन्तीति विभावाः कथ्यन्ते ।

स च विभावो द्विविधः—आलम्बनविभावः, उद्दीपनविभावश्च । तत्र आलम्बनविभावः—

'आलम्बनो नायकादिस्तमालम्ब्य रसोद्गमात्' ।

आदिशब्दात् नायिकाप्रतिनायिकादयः ।

उद्दीपनविभावः—

'उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ।'

ये पदार्था आलम्बनविभावेनाङ्कुरितं रसम् (रत्यादिकं स्थायीभावमित्यर्थः) उद्दीपयन्ति=परिपोषातिशयं नयन्ति ते उद्दीपनविभावाः कथ्यन्ते । यथा—आलम्बनविभावस्य चेष्टा, रूपं भूषणं (भाषणं च), देशो विजनमुद्यानादिकम्, कालो वसन्तादिः, चन्द्रचन्दनकोकिलरवभ्रमरझङ्कारादयः ।

(४०) प्रश्नः—अनुभावानां परिचयो देयः ।

उत्तरम्—'उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।
लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥'

यः खलु लोके सीतादिचन्द्रादिभिः स्वैः स्वैरालम्बनोद्दीपनकारणै रामादेरन्तरुद्बुद्धं रत्यादिकं बहिः प्रकाशयन् कार्यमुच्यते, स एव काव्यनाट्ययोः पुनरनुभावः कथ्यते । रत्यादीन्, स्थायिनः, अनुभावयन्ति=अनुभवविषयीकुर्वन्तीति अनुभावाः । ते च स्त्रीणां त्रयः अङ्गजा भावादयः स्वभावजाश्च लीलादयोऽष्टादशालङ्काराः, अनुभावस्वरूपाः सात्त्विकभावास्तथा नेत्रविक्षेपादयश्चेष्टा अनुभावा सन्ति ।

(४१) प्रश्नः—व्यभिचारिणां किं स्वरूपम् ? कतिविधाश्च ते ? इति विशदं विवेचयत ।

उत्तरम्—'विशेषादाभिमुख्येन चरणाद् व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्विदाः ॥'

स्थिरतया वर्तमाने हि रत्यादौ निर्वेदादयः प्रादुर्भावतिरोभावाभ्याम्—विशेषाद्=विभावानुभावाऽपेक्षयाऽतिरेकात्, आभिमुख्येन=आस्वादव्यञ्जने सहायत्वेन, चरणात्=प्रवर्तनात्, व्यभिचारिणः कथ्यन्ते । विशेषेणाभितः (सर्वाङ्गव्यापितया) रत्यादीन् स्थायिनः काये चारयन्ति=सञ्चारयन्ति, मुहुर्मुहुरभिव्यञ्जयन्तीति वा व्यभिचारिणः । यद्वा विशेषेणाभितः=आभिमुख्येन=कार्यजनने आनुकूल्येन, चरन्तीति व्यभिचारिणः । ते च त्रयस्त्रिंशत् भेदाः आकरेषु लिखिताः । तत एव दृष्टव्याः ।

एवं रत्यादयोऽपि स्थायिभावत्वेन ये उक्तास्तेऽपि अनियते रसे व्यभिचारित्वं गच्छन्ति । यतो हि—

'रसावस्थः परं भावः स्थायितां प्रतिपद्यते ।' इति

यश्च रत्यादिको भावः प्रतिकूले विद्यमानः स न स्थायीभावः, किन्तु व्यभिचारितयैव निर्णीतो वेदितव्यः । यथा–शृङ्गारवीरयोः हासः, वीरे क्रोधः, शान्ते जुगुप्सा व्यभिचारित्वेन स्थिता । एवं हास्ये विस्मयो व्यभिचारी, करुणे भयम्, रौद्रे हासः, भयानके शोकश्च यथासम्भवं व्यभिचारी भवतीति । इदमत्र बोध्यम्—अल्पैर्विभावैरुत्पन्नास्ते एव रत्यादयो व्यभिचारिणः कथ्यन्ते । उक्तं च रत्नाकरे—

'रत्यादयः स्थायीभावाः स्युर्भूयिष्ठविभावजाः ।
स्तोकैर्विभावैरुत्पन्नास्त एव व्यभिचारिणः ॥' इति ॥

(४२) प्रश्नः—सात्त्विकभावानां परिचयो देयः ।

उत्तरम्—'विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्तिताः ।'

सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनान्तरो धर्मः । ते च सत्त्वमात्रोद्भवत्वात्, अनुभावतो 'गोबलीवर्दन्यायेन' भिन्नाः । ते च—स्तम्भः, स्वेदः, रोमाञ्चः, स्वरभङ्गः, वेपथुः, वैवर्ण्यम्, अश्रु, प्रलयश्चेति अष्टधा भवन्ति ।

(४३) प्रश्नः—को नाम भावः ? विमृश्य लिखत ।

उत्तरम्—देवमुनिगुरुनृपपुत्रादिविषया सर्वप्रकारा कान्तादिविषयाऽपि अपुष्टा रतिः, हासादयश्च अप्राप्तरसावस्थाः, विभावादिभिः प्राधान्येन व्यञ्जितो व्यभिचारी च भावः प्रोक्तः । उक्तं च विश्वनाथेन—

'सञ्चारिणः प्रधानानि देवादिविषया रतिः ।
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ॥'

देवविषया यथा—

'कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम् ।
अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते ॥'

अत्र महादेव आलम्बनम् । ईशप्रतिवाद्यव्याहतैश्वर्यमुद्दीपनम् । स्तवोऽनुभावः । धृतिमाहात्म्यस्मरणादयो व्यभिचारिणः । अत्रैतैरनुमितस्तावकरतीनां सामाजिकानां तैरेव विभावादिभिर्व्यञ्जिता रतिर्भाव एवेति बोध्यम् । न चास्याः कुतो न रसमिति वाच्यम् ? मुनेः स्वतन्त्रेच्छत्वात् । फलबलकल्प्य-

सामग्रीवैलक्षण्येन सहृदयसंवादेन चोत्कटानन्दांशाप्रकाशाच्चेति । एवमन्यदप्युदाहार्यम् ।

(४४) प्रश्नः– स्थायिभावानां परिचयो देयः ।

उत्तरम्—'अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः ।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः ॥' इति ॥

यः विरुद्धः अविरुद्धैश्च भावैर्न त्रिच्छिद्यते एवम्भूत आस्वादाङ्कुरकन्दः स्थायिभावः कथ्यते ।

ननु अन्तःकरणवृत्तिरूपस्य रत्यादेः आशुविनाशित्वेन यावद्रसमवस्थानासम्भवात् कथं स्थायित्वमिति चेत् ? उच्यते—

आप्रवन्धं संस्कारात्मना स्थिरत्वाद् यावद्रसप्रतीतिकालमनुसन्धीयमानत्वाच्च अमीषां भावानां स्थायित्वम् ।

अयं स्थायिभावः सर्वभावेषु प्रधानम् । यथा—नराणां नरपतिः, शिष्याणां गुरुः ।

अयं भावः—यथा समानलक्षणः समानाङ्गप्रत्यङ्गा अपि पुरुषा कुलशीलविद्याविचक्षणत्वयुक्ता राजत्वमाप्नुवन्ति, तथैव भावेषु ये प्राधान्यं भजन्ते ते स्थायिभावा उच्यन्ते । अपरे परिजनभूता व्यभिचारिभावाः कथ्यन्ते । ते च—

'रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च ॥'

इत्युक्तदिशा नवस्थायिभावा दर्पणकारसम्मता मन्तव्याः ।

तत्र मनोऽनुकूलेऽर्थे मनसः प्रेमार्द्रत्वं रतिः । वागादिविकारैश्चेतोविकासो हास । इष्टविनाशजन्मा चेतोविकारः शोकः । प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोधः । कार्यारम्भेषु स्थिर आवेश उत्साहः । रौद्रशक्तिदर्शनजन्यं चेतोवैक्लव्यं भयम् । विस्मयजनिता दोषदर्शनादिभिः पदार्थगर्हा जुगुप्सा । लोकसीमातिवर्तिषु विभिन्नेषु पदार्थेषु चेतसो विस्फारो विस्मयः । निःस्पृहदशायां स्वात्मविश्रामजन्यं सुखं शमः इति ।

(४५) प्रश्नः—रसभेदानुक्त्वा शृङ्गारस्य भेदौ चोपपाद्य करुणविप्रलम्भस्वरूपमुपपाद्यताम् ।

उत्तरम्–शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्साद्भुत-शान्त-भेदेन रसो नवविधः । तत्र शृङ्गारो द्विविधः—सम्भोगो विप्रलम्भश्चेति । तत्र—

'यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये।
विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः ॥'

यथा—कादम्बर्यां पुण्डरीकमहाश्वेतावृत्तान्ते करुणविप्रलम्भ एव रसः। पुनरलभ्ये शरीरान्तरेण वा लभ्ये तु करुणाख्य एव रसः।

किञ्चात्र कादम्बर्याम् आकाशसरस्वतीभाषातः पूर्वं करुण एव रसः, केवलशोकस्यैव स्थायिभावत्वात्, सरस्वतीभाषानन्तरन्तु करुणविप्रलम्भ-श्रृङ्गार इति अभियुक्ताः।

अत्र केचित् (आचार्यधनिकः)—कादम्बर्यामाकाशभाषणानन्तरमपि न करुणविप्रलम्भाख्यः श्रृङ्गारभेदः, किन्तु विप्रलम्भश्रृङ्गारस्य प्रवासाख्यो भेद एवेति वदन्ति। तदन्ये न मन्यन्ते मरणरूपविशेषसम्भवात् प्रवासाद् भिन्न-मेवेति।

ननु करुणे रसे करुणविप्रलम्भे च रसे को भेदः ? इति चेत्, श्रृणु—करुणे शोकः स्थायीभावः, विप्रलम्भे तु रतिः स्थायीभावः, पुनः सम्भोगहेतुकत्वात् इति करुणविप्रलम्भात् करुणस्य भेदः।

वस्तुतस्तु कादम्वर्यां करुणविप्रलम्भश्रृङ्गार एव। यतोऽत्र प्रथमं रतिमूल एव शोकः, महाश्वेताया आकाशसरस्वतीभाषणानन्तरं च पुनरेव रतिः, इत्यादावन्ते च समुत्पन्नाभ्यां रतिभ्यां मध्यवर्तिनः शोकस्य स्थायिरूपत्वेन दृढतया वर्तमानत्वाभावाद् शोकमूलकः करुणः क्वाप्यंशे नोपपद्यते। अपि चाद्यन्तवृत्तान्तज्ञानवतां सभ्यानां मानसेषु शोकमिलितरतिभावस्यैव स्थायि-त्वोपलम्भमानत्वात् करुणविप्रलम्भलक्षणस्य सम्बन्धात् सर्वांशे एव करुणविप्र-लम्भः, शोकमिलितरतिभावसत्त्वादेवास्य नाम करुणविप्रलम्भ इति ध्येयम्।

अनयैव दिशा उत्तररामचरिते कुवलयाश्वे चापि करुणविप्रलम्भ एव प्रधानरस इति बोध्यम्।

॥ इति साहित्यदर्पणालोके तृतीयः परिच्छेदः॥

चतुर्थः परिच्छेदः

(४६) प्रश्नः—ध्वनेः सामान्यलक्षणमभिधाय क्वचित्समन्वयं प्रदर्श्य ध्वनि-गुणीभूतव्यङ्ग्ययोर्भेदं युक्त्या संस्थाप्य च तद्भेदान् सङ्क्षेपेण प्रदर्शयत। (वा० सं० वि० वि० १९५५, ५७, ६२)

उत्तरम्—काव्यं द्विविधम्—ध्वनिर्गुणीभूतव्यङ्ग्यं च। ध्वनिपदमिदम् अनेकार्थवाचकम्। तद्यथा—ध्वन्यतेऽनयेति ध्वनिरिति करणव्युत्पत्त्या व्यञ्जनाशक्तेर्वाचकम्। ध्वन्यते इति ध्वनिरिति कर्मव्युत्पत्त्या रसादिव्यङ्ग्यस्य वाचकम्। ध्वन्यतेऽस्मिन्निति ध्वनिरिति अधिकरणव्युत्पत्त्या उत्तमकाव्यमर्थः। ध्वननं ध्वनिरिति भावव्युत्पत्त्या रसादिप्रतीतिरर्थः। वस्तुतस्तु ध्वनति व्यञ्जनया रसादीन् प्रत्याययतीति ध्वनिः शब्दार्थसमुदाय इत्यर्थः। तस्य लक्षणं च—

'वाच्यातिशायिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्।' इति।

यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थस्याधिकचमत्कारिता, 'ध्वन्यतेऽस्मिन्निति ध्वनिः' इति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम्। यथा—

'कदली कदली करभः करभः करिराजकरः करिराजकरः।
भुवनत्रितयेऽपि बिभर्त्ति तुलामिदमूरुयुगं न चमूरुदृशः॥'

इत्यत्र द्वितीयकदल्यादिशब्दाः पौनरुक्त्यभिया सामान्यकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादिगुणविशिष्टकदल्यादिरूपमर्थं बोधयन्ति, जाड्यातिशयश्च व्यङ्ग्यः। अत्र वाच्यात् कदल्याद्यर्थविशेषाद् अधिकचमत्कारी जाड्यातिशयरूपोऽर्थः, इति ध्वनिर्नामोत्तमकाव्यमिदम्।

ननु ध्वनिगुणीभूतव्यङ्ग्ययोः को भेदः? इति चेत्, श्रूयताम्—यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थोऽधिकचमत्कारी स ध्वनिः। यत्र तु व्यङ्ग्यार्थो वाच्यार्थापेक्षया नाधिकचमत्कारी किन्तु तुल्यचमत्कारी न्यूनचमत्कारी वा तत्र तु गुणीभूतव्यङ्ग्यम्। यथा—

'ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥'

अत्र 'वञ्जुललतागृहे दत्तसङ्केता नागता' इत्यपेक्षया वाच्यार्थस्यैवाधिकचमत्कारित्वमिति गुणीभूतव्यङ्ग्यमिदम्। एवं तुल्यचमत्कारित्वेऽपि बोध्यम्।

तत्र ध्वनिः द्विविधः—एकः लक्षणामूलः, अपरः अभिधामूलः। तत्र लक्षणामूलस्य ध्वनेः, अविवक्षितम्=अनुपयुक्तम्, अन्वयायोग्यं वा वाच्यं वाच्यार्थो यत्र स अविवक्षितवाच्य इति नामान्तरम्। विवक्षितम्—अन्वययोग्यम्, अन्यपरं=व्यङ्ग्योपमर्जनीभूतं, वाच्यं=वाच्यार्थो यत्र स विवक्षितान्यपरवाच्य इति अभिधामूलध्वनेः नामान्तरम्।

तत्र अविवक्षितवाच्यो ध्वनिः, अर्थान्तरसङ्क्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः।

विवक्षितान्यपरवाच्योऽपि द्विविधः—(१) असंलक्ष्यक्रमव्यङ्ग्यः (२) संलक्ष्यक्रमव्यङ्ग्यश्च।

तत्र असंलक्ष्यक्रमव्यङ्ग्यस्तु एक एव, तस्यानन्तत्वात् सङ्ख्यातुमशक्यत्वात्।

संलक्ष्यक्रमव्यङ्ग्यस्तु त्रिविधः—(१) शब्दशक्त्युत्थः, (२) अर्थशक्त्युत्थः, (३) उभयशक्त्युत्थः।

तत्र शब्दशक्त्युद्भवो द्विविधः—(१) वस्तुरूपः, (२) अलङ्काररूपः।

अर्थशक्त्युद्भवो द्वादशविधः—

(१) स्वतःसम्भविना वस्तुना वस्तुध्वनिः। (२) स्वतःसम्भविना वस्तुना अलङ्कारध्वनिः। (३) स्वतःसम्भविना अलङ्कारेण वस्तुध्वनिः। (४) स्वतःसम्भविना अलङ्कारेण अलङ्कारध्वनिः। (५) कविप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनिः। (६) कविप्रौढोक्तिसिद्धेन वस्तुना अलङ्कारध्वनिः। (७) कविप्रौढोक्तिसिद्धेन अलङ्कारेण वस्तुध्वनिः। (८) कविप्रौढोक्तिसिद्धेन अलङ्कारेण अलङ्कारध्वनिः। (९) कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनिः। (१०) कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना अलङ्कारध्वनिः। (११) कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन अलङ्कारेण वस्तुध्वनिः। (१२) कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन अलङ्कारेण अलङ्कारध्वनिः।

उभयशक्त्युत्थ एकविध एव।

एवं च अविवक्षितवाच्यस्य द्वौ भेदौ, विवक्षितान्यपरवाच्यस्य षोडशभेदाः, इत्येवं रीत्या अष्टादशभेदाः।

एषु, उभयशक्त्युद्भवो ध्वनिः वाक्यगत एवेत्येकविध एव सः। शेषाः पदगतत्वेन वाक्यगतत्वेन च द्विधा भूत्वा उभयशक्त्युद्भवेन सह मिलित्वा पञ्चत्रिंशद् भेदा भवन्ति। द्वादशविधो योऽर्थशक्त्युद्भवः स प्रबन्धगतोऽपि भवति, इति योजनेन सप्तचत्वारिंशद् (४७) भेदाः। रसभावादिरूपस्य असंलक्ष्यक्रमव्यङ्ग्यस्य पदांश वर्ण-रचना-प्रबन्धगतत्वेन चत्वारो भेदाः, इति मिलित्वा ध्वनिकाव्यस्य एकपञ्चाशद् (५१) भेदाः। ते च—

'सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया ।
वेदखाग्निशरा (५३०४) शुद्धैरिषुवाणाग्नि सायकाः (५३५५) ॥'

अर्थात् त्रिविधेन सङ्करेण एकविधया च संसृष्ट्या योजनेन वेदखाग्निशराः (५३०४) अर्थात् चतुरुत्तरशतत्रयाधिकपञ्चसहस्रसङ्ख्याका ध्वनयः, शुद्धैः एकपञ्चाशत्प्रकारैः सह योजनेन, इषुबाणाग्निसायकाः (५३५५) अर्थात् पञ्चपञ्चाशदुत्तरशतत्रययुतपञ्चसहस्रसङ्ख्याका ध्वनेर्भेदाः ।

(४७) प्रश्नः—अविवक्षितवाच्यस्य (लक्षणामूलस्य) ध्वनेः भेदौ सोदाहरणौ विवेचनीयौ । (वा० सं० वि० वि० १९५५, ७२)

उत्तरम्—'अर्थान्तरं सङ्क्रमिते वाच्येऽत्यन्तं तिरस्कृते ।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति ॥'

अविवक्षितवाच्यः=लक्षणामूलो नाम ध्वनिः अर्थान्तरसङ्क्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः ।

यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपेऽर्थान्तरे परिणमति तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसङ्क्रमित्वाद् अर्थान्तरसङ्क्रमितवाच्यत्वम् । यथा—

'कदली कदली करभः करभः करिराजकरः करिराजकरः ।
भुवनत्रितयेऽपि बिभर्त्ति तुलामिदमूरुयुगं न चमूरुदृशः ॥'

अत्र द्वितीयकदल्यादिशब्दाः पौनरुक्त्यभिया सामान्यदकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादिगुणविशिष्टकदल्यादिरूपमर्थं (जाड्यखर्वत्वपुरुषत्वगुणयुक्तकदलीकरभकरिराजकररूपमर्थम्) बोधयन्ति=उपादानलक्षणया प्रतिपादयन्तीत्यर्थः । जाड्याद्यतिशयश्च व्यङ्ग्यः ।

यत्र पुनः स्वार्थं सर्वथा परित्यजन् अर्थान्तरे परिणमति तत्र मुख्यार्थस्यात्यन्ततिरस्कृतत्वाद् अत्यन्ततिरस्कृतवाच्यम् । यथा—

'निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ।'

अत्र अन्धशब्दो दृष्टिहीनरूपे मुख्यार्थे (दृष्टिशक्तिरहितत्वस्याचेतने दर्पणेऽसम्भवत्वेन) बाधिते सति, अप्रकाशरूपमर्थम् (अस्वच्छरूपं वाच्यम्) बोधयति (लक्षणलक्षणयेति भावः) । अप्रकाशातिशयश्च=अस्वच्छतातिशयश्च व्यङ्ग्यः । अन्धत्वप्रकाशत्वयोः सामान्यविशेषभावाभावान्नार्थान्तिरसङ्क्रमितवाच्यत्वम् ।

(४८) प्रश्नः—'भ्रम धार्मिक विश्रब्धम्' इत्यादौ भ्रमणविधेः प्रकृतेऽनुपयुक्ततया निषेधपरत्वात् कथं न विपरीतलक्षणेति विचार्य लिखत। (वा० सं० वि० वि० १९५२, ५९, ७७)

उत्तरम्—'भम धम्मिअ वीसत्थो, सो सुणओ अज्ज मारिओ देण।
गोलाणइकच्छकुडंगवासिना दरिअसीहेण॥'
[भ्रम धार्मिक ! विश्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन॥]

ननु 'भ्रम धार्मिक' इत्यत्र 'भ्रम' इस्यस्य 'मा भ्रम' इत्यर्थे तात्पर्यात् भ्रमणस्य विधिः प्रकृतेऽनुपयुज्यमानतया भ्रमणनिषेधे पर्यवस्यतीति लक्षण-लक्षणारूपविपरीतलक्षणामूलकात्यन्ततिरस्कृतवाच्यध्वनिरस्तीति चेत् ? न।

यत्र खलु विधिनिषेधावुत्पत्स्यमानावेव निषेधविध्योः पर्यवस्यतस्तत्रैव विपरीतलक्षणमूलकात्यन्ततिरस्कृतवाच्यध्वनेः अवसरः सम्भवः। यत्र पुनः प्रकरणादिपर्यालोचने न विधिनिषेधयोः निषेधविधी अवगम्येते तत्राभिधामूलक-(वस्तु-)ध्वनिरेव। उक्तं च—

'क्वचिद् बाध्यतया ख्यातिः क्वचित्ख्यातस्य बाधनम्।
पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु॥'

अर्थात् क्वचित्=कुत्रचित्स्थले, बाध्यतया=विपरीतार्थपर्यवसानतया, ख्यातिः=अन्वयबोधो भवति। क्वचित्=कुत्रचित् स्थले च, ख्यातस्य=अन्वय-बोधविषयीभूतस्य, बाधनं=प्रकरणादिपर्यालोचनया विपरीतार्थपर्यवसानं भवति। पूर्वत्र लक्षणा=लक्षणामूलध्वनिरेव स्यात्। उत्तरत्र तु अभिधैव=अभिधामूलध्वनिरेव।

एवञ्च 'भम धम्मिअ' इत्यादौ प्रथमं भ्रमणविधिः शक्त्यैव प्रतीयते पश्चा-देव तस्याः कुलटात्वस्य प्रकरणादिना प्रतीतौ 'न भ्रम' इति भ्रमणनिषेधो व्यञ्जनयैव प्रतीयते। इत्थमत्र भ्रमणविधेः प्रकरणादिपर्यालोचनानन्तरमेव भ्रमणनिषेधे पर्यवस्यतीति अभिधामूलवस्तुध्वनिरेवाऽत्र न लक्षणामूलकात्यन्त-तिरस्कृतवाच्यध्वनिरिति दिक्।

(४९) प्रश्नः—'अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो !
अहितः सहितः साधु यशोभिरसतामसि॥'
अस्मिन् पद्ये व्यङ्ग्यार्थः प्रदर्शनीयः। (१९५३)

उत्तरम्—'अमितः समितः प्राप्तैरुत्कर्षैर्हर्षद प्रभो !
अहितः सहितः साधु यशोभिरसतामसि' ॥ इति ॥

इदं शब्दशक्त्या विरोधाभासालङ्कारस्योदाहरणम् ।

हे हर्षद !=शत्रुहर्षखण्डक ! मित्रहर्षदायक प्रभो ! त्वं समितः=युद्धात्, प्राप्तैरुत्कर्षैः=अतिशयैः विजयैरिति भावः । अमितः=अपरिमितः, असतां=खलानाम्, अहितः=दण्डविधायकत्वेन शत्रुरसि ।

अत्र यः, अमितः=मितरहितः, स समितः=मितसहितः कथम् ? यश्च अहितः=हितरहितः, स सहितः=हितसहितः कथमिति विरोधः । स च समितः=युद्धात्, प्राप्तैरुत्कर्षैः अमितः, तथा साधुयशोभिः सहितः, असतां चाहितः, इत्यर्थकरणेन निराक्रियते । विरोधाभासद्योतकाप्यादिशब्दाभावाच्चात्र विरोधाभासोऽलङ्कारो व्यङ्ग्यः ।

(५०) प्रश्नः—'धन्यः स एव तरुणो नयने तस्यैव नयने च ।
युवजनमोहनविद्या भवितेयं यस्य सम्मुखे सुमुखी ॥'

इति पद्यं कस्योदाहरणतयोपन्यस्तं दर्पणकारेण ? इति निर्णीय व्यङ्ग्यार्थः प्रदर्शनीयः । (वा० सं० वि० वि० १९५६)

उत्तरम्—'धन्यः स एव तरुणो नयने तस्यैव नयने च ।
युवजनमोहनविद्या भवितेयं यस्य सम्मुखे सुमुखी ॥'

इदं पद्यम् अर्थान्तरसङ्क्रमितवाच्यस्य ध्वनेः पदगतत्वेनोदाहृतम् । अत्र हि द्वितीयनयनशब्दो पौनरुक्त्यभिया सामान्यनयनरूपे मुख्यार्थे बाधितो भाग्यवत्तादिगुणविशिष्टनयनरूपमर्थं लक्षयति (उपादानलक्षणयेति भावः) । नायकस्योचितं व्यावहारिकत्वादिकं व्यङ्ग्यमुपादानलक्षणाया फलम् ।

(५१) प्रश्नः—'त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥'

इति पद्यं कस्योदाहरणतयोपन्यस्तं दर्पणकारेण ? इति निर्णीय व्यङ्ग्यार्थोऽत्र प्रदर्शनीयः । (वा० सं० वि० वि० १९५५ ई०)

उत्तरम्—'त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।
आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ॥'

अर्थान्तरसङ्क्रमितवाच्यस्य ध्वनेः वाक्यगतत्वेनोदाहृतं पद्यमिदम् ।

विद्वत्सभां गच्छन्तं प्रति कस्यचिदाप्तस्योक्तिरियम् । 'अस्मी'त्यहमर्थेऽव्ययम् । 'यत्' इत्यध्याहार्यम् । यतोऽत्र विदुषाम्=असाधारणज्ञानवताम्, समवायः=

एकवाक्यतापन्नः समुदायः, तिष्ठति, तत्=तस्मात् कारणात्, आत्मीयां=स्वकीयाम्, मतिम् आस्थाय=अवलम्ब्य, अत्र=सभायाम्, स्थितिं=सावधान-स्थितिम्, विधेहि=कुरु ! इति त्वाम्=उपदेशार्हम्, अस्मि (अहम्)=आप्तोऽहम् । वच्मि=उपदिशामीत्यर्थः ।

अत्र प्रतिपाद्यस्य सम्मुखीनत्वादेव लब्धे प्रतिपाद्यत्वे त्वामिति पुनर्वचनम् अन्यव्यावृत्तिविशिष्टं त्वदर्थं लक्षयति । 'त्वां वच्मि' यस्त्वं नानुभवी न च विशेषज्ञः, अत एवोपदेशार्होऽसि, इत्यादयो भावा लक्ष्यन्ते । तेन त्वया मम वचनमवश्यमेव पालनीयमिति व्यज्यते । एवं 'वच्मि' इत्यनेनैव कर्तरि लब्धे 'अस्मि' इति पुनर्वचनेन आप्तो हितचिन्तकश्चाहमिति लक्ष्यते । तथा विदुषां समवाय इत्यनेनैव वस्तुः प्रतिपादने सिद्धे पुनः 'वच्मि' इति वचनम्, उपदिशामीति वचनविशेषरूपमर्थं लक्षयति ।

एतानि 'त्वामस्मि वच्मि' इति त्रीणि पदानि स्वातिशयम्–त्वत्पदार्थस्य वादजल्पादिक्षमत्वम्, मत्पदार्थस्य अत्यन्तहितसाधनत्वम्, 'वच्मि' इत्यत्र च वचनीयस्यालङ्घनीयत्वम्, इत्येतान् अर्थान् व्यञ्जयन्ति । एवं विद्वत्पक्षेऽपि 'विदुषाम्' इति, आत्ममतेः सार्वकालिकत्वेऽपि 'आत्मीयाम्' इति च यथाक्रमं सर्वशास्त्रविशारदरूपेण प्रमाणपरतन्त्रतया च परिणतम् । एतेन मम वचनं तवाऽत्यन्तं हितं, तदवश्यमेव कर्त्तव्यम्, अन्यथाऽऽचरणे उपहसनीयत्वमिति व्यङ्ग्यमिति भावः ।

(५२) प्रश्नः—'तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥'

अत्र पद्ये व्यञ्जकनिर्देशपूर्वकं व्यङ्ग्यार्थं स्फुटीकुरु । (वा० सं० वि० वि० १९५४ ई०)

उत्तरम्—'तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥
चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका ॥'

अर्थात् श्रीकृष्णस्य अप्राप्त्या=वियोगेन हेतुना यन्महादुःखं तेन तद्-भोगेन, विलीनानि=नष्टानि, अशेषाणि=समस्तानि, पातकानि=अनेक-जन्मसञ्चितपापानि, यस्याः सा तथोक्ता, तथा तस्य=श्रीकृष्णस्य, चिन्तया=भावनया, अहर्निशं ध्यानेनेति भावः । यो विपुलो=महान्, आह्लादः=आनन्दः, तेन=तद्भोगेनैव, क्षीणः=नष्टः, पुण्यस्य चयः=समूहो, यस्याः सा तथोक्ता,

पापपुण्ययोः फलभोगनाश्यत्वात् । एतादृशी गोपिका श्रीकृष्णं चिन्तयन्ती = ध्यानेन साक्षात्कुर्वती निरुद्धप्राणतया मोक्षं प्राप्ता ।

अत्राशेषचयपदप्रभावाद् अनेकजन्मसहस्रभोग्यदुष्कृतसुकृतफलराशितादात्म्याध्यवसिततया भगवद्विरहदुःखचिन्ताह्लादयोः प्रत्यायनमित्यतिशयोक्तिद्वयप्रतीतिरशेषचयपदद्योत्या ।

अर्थादत्र श्रीकृष्णवियोगदुःखचिन्ताह्लादयोरशेषदुष्कृतसुकृतफलत्वेनाध्यवसिततयोरवगतिरित्यतिशयोक्तिद्वयम् अशेषचयपदप्राधान्येन व्यज्यते । साहित्यदर्पणकारेण च स्वतःसम्भविना वस्तुना पदगतालङ्कारध्वनेः उदाहरणत्वेनोपन्यस्तं पद्यमिदमिति दिक् ।

(५३) प्रश्नः–'काव्यार्थस्याखण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते कालान्तरे तु प्रकरणादिपर्यालोचनया भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशः, तस्यास्वादमात्रायत्तत्वात् ।' सङ्गतिपूर्वक व्याख्यातव्योऽयमंशः ।

(वा० सं० वि० वि० १९४२ ई०)

उत्तरम्--यत्र गुणीभूतव्यङ्ग्यं प्रधानरसे अङ्गं भवति स ध्वनिरेवोच्यते । यथा—'अयं स रसनोत्कर्षी' इत्यादौ शृङ्गारस्य करुणरसे गुणीभावेऽपि तं गौणभावमाश्रित्य मध्यमकाव्यव्यवहारो न कर्त्तव्यः, किन्तु प्रधानरसं करुणमाश्रित्य उत्तमकाव्यव्यवहार एव कर्त्तव्यः ।

यत्र च शृङ्गारादिरसानां नगरीवृत्तान्तादिवर्णनरूपवस्तुविषये अङ्गत्वं तत्र तेषां शृङ्गारादिरसानामतात्पर्यविषयत्वेऽपि = तात्पर्याविषयत्वेनाऽप्रधानत्वेऽपि तैर्गुणीभूतरसादिभिरेव काव्यव्यवहारः, मध्यमकाव्यव्यपदेशः कर्त्तव्यः । यथा—'यत्रोद्गमदानां प्रमदाजनानाम्' इत्यादौ पुरीप्रकर्षवर्णने कवेस्तात्पर्यात्, अनङ्गनेपथ्यविधिव्यञ्जयस्य शृङ्गारस्य नगर्युदन्तं प्रति अङ्गत्वात् तात्पर्यविषयत्वाभावेऽपि आपाततश्चमत्कारविधायकत्वेन शृङ्गारकाव्यरूप एव मध्यमकाव्यव्यवहारः कर्त्तव्यः, न तु नगर्युदन्तकाव्यव्यवहारः ।

अस्मिन्नर्थे विश्वनाथः स्वसगोत्रकविपण्डितमुख्यश्रीचण्डीदासपादानां सम्मतिं दर्शयति—काव्यार्थस्य = काव्यपरमार्थस्य, अखण्डबुद्धिवेद्यस्य = एकज्ञानसंवेद्यस्य, क्वचित्, 'अखण्डबुद्धिवेद्यतया' इति पाठस्तत्र, एकज्ञानसंवेद्यतयेत्यर्थः । तन्मयीभावेन = तन्मयत्वात्, अखण्डबुद्धिस्वरूपीभावेनेत्यर्थः ।

आस्वाददशायां=काव्यार्थानुभवावस्थायाम्। गुणप्रधानभावावभासः=अङ्गाङ्गिभावप्रतीतिः। तावत्=आदौ, तत्कालम्, आपातत इत्यर्थः। नानुभूयते=न ज्ञायते, काव्यार्थभावकैः सचेतोभिरिति भावः। कालान्तरे तु=आस्वादानन्तरकाले तु, प्रकरणादीनां=प्रसङ्गप्रभृतीनां विषयाणां पर्यालोचनया, भवन्नपि=जायमानोऽपि, असौ=गुणप्रधानभावावभास, काव्यव्यपदेशं=रसादिघटितकाव्यव्यवहारम्, व्याहन्तुं न ईशः=प्राधान्यज्ञानेनापि निवारयितुं न समर्थः। अत्र हेतुमाह—तस्य=काव्यव्यपदेशस्य, आस्वादमात्रायतत्वात्=आस्वादमात्राधीनत्वात्।

तथा च प्रकृते काव्यार्थः, अनङ्गनेपथ्यविधिव्यङ्ग्यः शृङ्गारः, तस्य विभावादिनानापदार्थघटितत्वेऽपि प्रपाणकरसन्यायेन अखण्डबुद्धिवेद्यत्वं बोद्धुस्तन्मयीभावेन आस्वाददशायां शृङ्गारो गुणः, पुरीप्रकर्षः प्रधानमित्यवभासः, तावद्=आदौ, तत्कालम् आपातत इति वा नानुभूयते। ततश्चापाततस्तदननुभवेऽपि उत्तरकालं प्रकरणादिपर्यालोचनया पुरीप्रकर्षप्राधान्यावगमो भवन्नपि काव्यस्य गुणीभूतव्यङ्ग्यव्यपदेशं निवारयितुं न समर्थ इत्यभिप्रायः।

(५४) प्रश्नः—चित्राख्यस्तृतीयः काव्यभेदः साहित्यदर्पणकृतोऽभिमतो न वा? सम्यगालोचनापूर्वकं सप्रमाणं स्वमतप्रदर्शनमप्यत्रापेक्षितम्।

उत्तरम्—साहित्यदर्पणकारो हि चित्रकाव्यं न मन्यते। तेन हि मम्मटमतमुपस्थाप्यैवं दूषितम्—'केचित् चित्राख्यं तृतीयं काव्यभेदमिच्छन्ति। तदाहुः—

'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्॥' इति॥

तन्न। यदि हि, अव्यङ्ग्यत्वेन व्यङ्ग्याभावस्तदा तस्य काव्यत्वमपि नास्तीति प्रागेवोक्तम्। ईषदव्यङ्ग्यत्वमिति चेत्, किं नामेषदव्यङ्ग्यत्वम्? आस्वादव्यङ्ग्यत्वम् अनास्वाद्यव्यङ्ग्यत्वं वा? आद्ये प्राचीनभेदयोरेवान्तःपातः, द्वितीये त्वकाव्यत्वम्। यदि चानास्वाद्यत्वं तदा क्षुद्रत्वमेव। क्षुद्रतायामनास्वाद्यत्वात्। तदुक्तं ध्वनिकृता—

'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।
उभे काव्ये ततोऽन्यद् यत्तच्चित्रमभिधीयते॥' इति॥

अत्र विचार्यते—चमत्कारजनकवर्णनस्यैव काव्यलक्षणत्वात्, चमत्कारस्य च रसभावालङ्कारेषु अनुगततया, गुणालङ्कारयुक्तमव्यङ्ग्यं काव्यं चित्रम्।

अव्यङ्ग्यमित्यस्य न व्यङ्ग्याभावोऽर्थः किन्तु स्फुटव्यङ्ग्यरहितत्वमर्थः। एवं वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वनिर्नाम उत्तमं काव्यम्, तुल्ये न्यूनतायां च गुणीभूतव्यङ्ग्यं नाम मध्यमं काव्यम्। अव्यङ्ग्यं त्वधमं चित्रं काव्यम्। तच्च शब्दचित्रं वाच्यचित्रं चेति द्विविधम्। यथा चाह मम्मटः—

'शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्।' इति।

किञ्च विश्वनाथेन स्वमतसमर्थने ध्वनिकारस्य येयं कारिका प्रस्तुता सापि तस्य (विश्वनाथस्य) सिद्धान्तस्य प्रतिकूलैव। यतो हि सापि त्रिविधमेव काव्यं साधयति। प्रधानव्यङ्ग्यगुणीभूतव्यङ्ग्यातिरिक्तं काव्यं चित्रमिति प्रकृतकारिकाया अर्थः। अत एवासौ तदनुपदमेव चित्रकाव्यं द्विधा विभज्य वदति—

'चित्रं शब्दार्थभेदेन द्विविधं च व्यवस्थितम्।
तत्र किञ्चिच्छब्दचित्रं वाच्यचित्रमतः परम्॥' इति॥

इत्थं चित्रकाव्यमिदम् आनन्दवर्धनाचार्यमम्मटप्रभृतीनां प्राचीनाचार्याणामपि सम्मतमतोऽवश्यमेव मन्तव्यम्।

(५५) प्रश्नः—गुणीभूतव्यङ्ग्यप्रभेदा नामतः प्रदर्शनीयाः।

उत्तरम्—गुणीभूतव्यङ्ग्यस्याष्टौ भेदाः भवन्ति। तद्यथा—

१. इतराङ्गम्, २. काक्वाक्षिप्तम्, ३. वाच्यसिद्ध्यङ्गम्, ४. सन्दिग्धप्राधान्यम्, ५. तुल्यप्राधान्यम्, ६. अस्फुटम्, ७. अगूढम्, ८. असुन्दरम्।

॥ साहित्यदर्पणालोके चतुर्थः परिच्छेदः॥

पञ्चमः परिच्छेदः

(५६) प्रश्नः—अभिधाया व्यङ्ग्यार्थबोधनाक्षमत्वं विविच्यताम्। (१९४६, ६४, ६७)

उत्तरम्—ननु अभिधाव्यापारेणैव अभिधामूलव्यङ्ग्यार्थस्यापि बोधः सम्भवति व्यञ्जनायाः काऽऽवश्यकतेति चेत्? न। सङ्केतितार्थमात्रबोधनसमर्थाया अभिधाया व्यङ्ग्यार्थबोधनासामर्थ्यात्। न च रसादिरपि सङ्केतित एवेति वाच्यम्। रसादीनां द्विविधः सङ्केतो भवितुमर्हति, विभावादिना, रसशब्देन

च। तत्र प्रथमः। न हि विभावादीनामभिधानमेव रसाभिधानम्, रसादीनां रसरूपत्वानङ्गीकारात्। न द्वितीयः। रसस्य रसशब्देन शृङ्गारादिशब्देन वाभिधाने दोष एवेति सप्तमपरिच्छेदे प्रतिपादितत्वात्। अपि च 'रसोऽयम्', 'शृङ्गारोऽयम्' इत्यादौ स्वशब्देनाभिधानेऽपि न रसप्रतीतिः तस्य स्वप्रकाशानन्दरूपत्वात्।

यच्च केचित् (भट्टलोल्लटप्रभृतयः)—'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' इत्याहुः। तन्न सङ्केतितार्थमात्रबोधनाद अभिधाया विरतत्वाद् विरतायाश्च पुनरुत्थानासम्भवात 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति नियमात्।

यदि च शब्दश्रुतेरनन्तरं यावानर्थो लभ्यते तावानभिधाव्यापारेणैवेति भवान् मन्यते चेत्, तर्हि लक्षणावृत्तिरपि किं स्वीकार्या ? दीर्घदीर्घतराभिधाव्यापारेणैव लक्ष्यार्थज्ञानसिद्धेः। अतो न लक्षणावृत्तिस्वीकारस्यावश्यकता, सापि भवद्भिः किं स्वीक्रियते ?

किञ्च दीर्घदीर्घतराभिधाव्यापारस्वीकारे 'ब्राह्मण ! पुत्रस्ते जातः', इति पुत्रोत्पत्तिश्रवणानन्तरं प्रोषितस्य ब्राह्मणस्य मुखप्रफुल्लतादिदर्शनेन हर्षः। 'कन्या ते गर्भिणी' इति वाक्यश्रवणानन्तरम् अविवाहितायाः कन्याया व्यभिचारबोधकत्वेन शोकः। इति द्वयोरपि हर्षशोकयोः किमिति नाभिधया बोध्यत्वम्।

किञ्च— 2054

'बोद्धृस्वरूपसङ्ख्यानिमित्तकार्यप्रतीतिकालानाम्।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः॥'

अयमर्थः—बोद्धृ-स्वरूप सङ्ख्या-निमित्त-कार्य-प्रतीति-कालाश्रय-विषयादीनां भेदात् व्यङ्ग्यः अभिधेयतो वाच्याद् भिन्न इति कारिकार्थः। तत्र—

१. बोद्धृभेदः—वाच्यार्थः पदपदार्थमात्रज्ञाननिपुणैः वैयाकरणैरपि संवेद्यो व्यङ्ग्यार्थस्तु सहृदयैरेवेति बोद्धृभेदः।

२. स्वरूपभेदः—'भ्रम धार्मिक' इत्यादौ 'हे धार्मिक भ्रम' इति वाच्ये विधिरूपे, 'मा भ्रम' इति व्यङ्ग्यस्य निषेधरूपतया, 'निःशेषच्युतचन्दनम्' इत्यादौ च 'न पुनस्तस्याधमस्यान्तिकम्' इति वाच्ये निषेधरूपे, 'तस्यान्तिकमेव रन्तुं गतासि' इति व्यङ्ग्यस्य विधिरूपतया च स्वरूपभेदः।

३. सङ्ख्याभेदः—'गतोऽस्तमर्कः' इत्यादौ 'सूर्यः अस्तं गतः' इत्येक एव वाच्यार्थः प्रतीयते, व्यङ्ग्यार्थस्तु तद्बोध्यादिभेदात् क्वचित् 'कान्तमभिसर' इति, 'गावो निरुध्यन्ताम्' इति, 'नायकस्यायमागमनावसरः' इति, 'सन्तापोऽधुना नास्ति' इति 'सान्ध्यो विधिरुपक्रम्यताम्' इति, 'दूरं मा गाः' इत्यादिरूपेणानेक इति सङ्ख्याभेदः।

४. निमित्तभेदः—वाच्यार्थः शब्दोच्चारणमात्रेण वेद्यः, व्यङ्ग्यार्थस्तु तथाविधप्रतिभानैर्मल्यादिनेति निमित्तभेदः।

५ कार्यभेदः—वाच्यार्थे केवलं वस्तुमात्रं प्रतीयते व्यङ्ग्यार्थे तु वस्तुज्ञानेन सह चमत्कार उत्पद्यते इत्यनयोः कार्यभेदः।

६. प्रतीतिभेदः—वाच्यार्थप्रतीतेः केवलरूपतया = पदार्थमात्रबाधनरूपतया व्यङ्ग्यार्थप्रतीतेस्तु सुखचमत्कारशब्दबोधस्वभावतया च प्रतीतिभेदः।

७. कालभेदः—पूर्वं हि वाच्यार्थप्रतीतिः पश्चाच्च व्यङ्ग्यार्थप्रतीतिरिति कालभेदः।

८. आश्रयभेदः—वाच्यार्थः शब्दाश्रयः व्यङ्ग्यार्थस्तु शब्दशब्दैकदेशवर्णसङ्घटनाश्रय इत्याश्रयभेदः।

९ विषयभेदः—'कस्य वा न भवति रोषः' इति वाक्ये वाच्यार्थबोधे सुखी उद्देश्या 'भ्रमरेणास्या अधरो दष्टो न पुनरुपपतिना' इति व्यङ्ग्यार्थबोधे तत्कान्त उद्देश्य इति विषयभेदः।

एवमेभिर्नवहेतुभिर्वाच्यार्थव्यङ्ग्यार्थयोर्भेदः सिद्धो भवति। तस्मान्नाभिधेयो व्यङ्ग्य इति सिद्धम्।

(५७) प्रश्नः—तात्पर्यवृत्त्या व्यञ्जनाया गतार्थत्वं निरस्यताम्। (१९४१, ५७)

उत्तरम्—ननु अभिहितान्वयवादिभिरङ्गीकृता तात्पर्याख्यावृत्तिरेव कथं न व्यङ्ग्यार्थबोधिनीति चेत्, न। अन्वयमात्रबोधने परिक्षीणायास्तस्या व्यङ्ग्यार्थबोधनाक्षमत्वात्। यच्च धनिकेनोक्तम्—

'तात्पर्याव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः।
यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम्॥' इति॥

तन्न साम्प्रतम्। तस्योपरि 'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः' इति वादिभिरेव पातनीयो दण्डः।

यत्पुनरुक्तम्—पौरुषेयमपौरुषेयं च वाक्यं सर्वमेव कार्यपरम्, अतत्परत्वेऽनुपादेयत्वादुन्मत्तवाक्यवत् (अप्रामाण्यं स्यादिति शेषः)। ततश्च काव्यार्थशब्दानां निरतिशयसुखास्वादव्यतिरेकेण प्रतिपाद्यप्रतिपादकयोः (श्रोतुर्वक्तुश्च) प्रवृत्त्यौपयिकप्रयोजनानुपलब्धेर्निरतिशयसुखास्वाद एव कार्यत्वेनावधार्यते। 'यत्परः शब्दः स शब्दार्थः' इति न्यायात्। इति।

तत्र प्रष्टव्यम्—किमिदं तत्परत्वं नाम, तदर्थत्वं वा, तात्पर्यवृत्त्या तद्बोधकत्वं वा ? आद्ये न विवादः, व्यङ्ग्यत्वेऽपि तदर्थानपायात्। द्वितीये तु केयं तात्पर्यवृत्तिः। अभिहितान्वयवादिभिरङ्गीकृता, तदन्या वा ? आद्ये संसर्गमात्रे (अन्वयबोधमात्रे) परिक्षीणायास्तस्या व्यङ्ग्यार्थबोधनाक्षमत्वम्। द्वितीये तु नाममात्रे विवादः। तन्मतेऽपि तुर्यवृत्तिसिद्धेः।

नन्वस्तु युगपदेव तात्पर्यशक्त्या विभावादिसंसर्गस्य रसादेश्च प्रकाशनम् इति चेत् ? न। तयोः, विभावादिसंसर्गबोधरसादिबोधयोः हेतुफलाभावाङ्गीकारात्। यदाह मुनिः—'विभावानुभावसञ्चारिसंयोगाद्रसनिष्पत्तिः' इति। सहभावे च कुतः सव्येतरविषाणयोरिव कार्यकारणभावः ? पौर्वापर्याभावात्। अतो न तात्पर्यवृत्त्या व्यञ्जनाया गतार्थत्वमिति दिक्।

(५८) प्रश्नः—लक्षणाभिधे रसस्य बोधिके न वा ? इति विचार्यताम्। (वा० सं० वि० वि० १९४३, ५८)

अथवा

'प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे।
किं च मुख्यार्थबाधस्य विरहादपि लक्षणा ॥'

इति कारिका व्याख्येया।

उत्तरम्—ननु लक्षणया अभिधया वा रसोदेर्बोधः कुतो नेति चेत् ? न। शब्दव्यापारात् पूर्वं रसस्य सत्तैव न स्वीक्रियते। अतो रसस्य लक्षणाभिधे न बोधिके अभिधया लक्षणया च विद्यमानवस्तुन एव बोधात्। 'गङ्गायां घोषः' इत्यत्र गङ्गातटश्च पूर्वसिद्धौ। अतो गङ्गापदम् अभिधया प्रवाहं लक्षणया च तटं बोधयति। असिद्धे वस्तुनि नैतयोः प्रयोगः। न हि रसनात्मकव्यापाराद् भिन्नो रसादिप्रतिपाद्यः कोऽपि पदार्थः प्रमाणसिद्धोऽस्ति यमिमे लक्षणाभिधे बोधयेताम्।

किञ्च मुख्यार्थस्य बाधदशायामेव लक्षणाया अवतारः। उक्तं चोदयनाचार्यैः—

'श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति ।
पदार्थान्वयवैधुर्यात्तदाक्षिप्तेन सङ्गतिः ॥'

अयमर्थः—साक्षाच्छ्रुतपदानां (पदानामर्थानामित्यर्थः) परस्परम् अन्वयबोधे जाते वाक्यं न किमपि अन्यदिच्छति । किन्तु यदि परस्परम् अन्वयस्य वैधुर्यम्=अनुपपत्तिः, भवति तदा आक्षिप्तेन=वान्यार्थसम्बन्धेन अर्थेन सङ्गतिः=अर्थाद् अन्वयो विधीयते ।

किन्तु 'शून्यं वासगृहम्' इत्यादिरसोदाहरणे न मुख्यार्थबाध इति न लक्षणाया अवसरः ।

न च 'गङ्गायां घोषः' इत्यत्र शीतत्वपावनत्वादिकं प्रयोजनं लक्ष्यम्=लक्षणया बोध्यम् । एवं सति गङ्गापदस्य तटरूपोऽर्थो मुख्यः स्वीकर्त्तव्यो भविष्यति । स च बाधितोऽपि भविष्यति । शीतत्वपावनत्वादेः प्रयोजनस्य लक्ष्यतया तस्यापि प्रयोजनान्तरम्, तस्यापि च लक्ष्यतया प्रयोजनानन्तरम् । एवं मूलक्षतिकरी (प्रकृताप्रतीतिकृत्) अनवस्था भवेत् ।

न प्रयोजनविशिष्टे तीरे लक्षणेति वाच्यम् । विषयप्रयोजनयोर्युगपत्प्रतीतिरनभ्युपगमात् । नीलादिसंवेदनानन्तरमेव हि ज्ञाततायाः अनुव्यवसायस्य वा सम्भवः । अतो न लक्षणाभिधे रसस्य बोधिके इति सिद्धम् ।

(५९) प्रश्नः—'नीलादिसंवेदनानन्तरमेव ज्ञाततायाः अनुव्यवसायस्य वा सम्भवः' इति पङ्क्तिः सोपष्टम्भं व्याख्येया ।

उत्तरम्—मीमांसकानां प्रस्थानत्रयं विद्यते—प्रभाकर-कुमारिल-मुरारिमिश्र-प्रस्थानमिति । तत्र ज्ञानस्य स्वप्रकाशतया (स्वविषयकतया) व्यवसायेनैव प्रामाण्यं गृह्यते प्रभाकराणां मते । अनुव्यवसायेन प्रामाण्यं गृह्यते मुरारिमिश्राणां मते । ज्ञानस्यातीन्द्रियतया ज्ञाततालिङ्गकानुमित्याप्रामाण्यं गृह्यते कुमारिलभट्टानां मते ।

तत्र गुरुमते (प्रभाकरमते) ज्ञानग्राहिका सामग्री व्यवसायात्मिका । यतस्तन्मते सर्वस्य ज्ञानस्य 'अयं घटः, घटविषयकज्ञानवानहम्' इत्येवंरूपेण ग्रहणात् ।

भाट्टमते च—ज्ञाततालिङ्गकानुमितिः । सा च ज्ञानजन्यविषयनिष्ठः प्राकट्यापरपर्यायो धर्मः । यथा—घटादिविषये ज्ञाने जाते सति 'मया ज्ञातोऽयं घटः' इति घटस्य ज्ञातता प्रतिसन्धीयते । तेन ज्ञाने जाते सति ज्ञातता नाम

कश्चिद् धर्मो जात इत्यनुमीयते। सा च ज्ञातता ज्ञाने जाते जाता। अतो ज्ञानजन्या इत्यनुमीयते। एवं च ज्ञानजन्योऽसौ ज्ञातता नाम धर्मो ज्ञानमन्तरेण नोपपद्यते कारणभावे कार्यानुत्पादात्।

प्रकृते यथा नीलज्ञानानन्तरमेव भाट्टमते ज्ञाततायाः, मिश्रमते अनुव्यवसायस्य सम्भवः, न नीलज्ञानसमकालमेव, तथैव न प्रयोजनविशिष्टे लक्षणा। विषयप्रयोजनयोः पौर्वापर्यस्य नियतत्वादिति दिक्।

(६०) प्रश्नः—व्यक्तिविवेककाराणां महिमभट्टानां मतेन रसादिव्यङ्ग्यस्य अनुमानगतार्थतां संसाध्य तत्खण्डनप्रकारः प्रदर्शनीयः। (१९५५, ५१, ६९)

उत्तरम्—ननु व्यञ्जनावृत्तेः, अनुमाने एवान्तर्भावः, तथा च 'काव्यं रसान्वितं विभावादिमत्वात्' इत्यनुमानेनैव रसादिव्यङ्ग्यज्ञानसम्भवे तदर्थं व्यञ्जनावृत्तेः स्वीकरणमनर्थकमेवेति व्यक्तिविवेककाराणां महिमभट्टानां मतम्।

तेषामयमभिप्रायः—'विभावानुभावसञ्चारिसंयोगाद्रसनिष्पत्तिः' इति भरतसूत्रम्। विभावादीनां प्रतीतिर्हि रसादिप्रतीतेः साधनमिष्यते। ते च विभावादयो रत्यादिभावानां कारणकार्यसञ्चारिणो भवन्ति। यथा—आलम्बनोद्दीपनरूपो विभावः रत्यादेः कारणम्, अनुभावः कटाक्षभुजाक्षेपादिः कार्यम्, लज्जादयश्च सञ्चारिणः। एते च विभावादयः रत्यादीननुमापयन्त एव रसादीन् निष्पादयन्ति। अनुमानप्रकारश्च—'सीता रामविषयकरतिमती, तस्मिन् विलक्षणस्मितकटाक्षवत्त्वात्, या नैवं सा नैवं, यथा मन्थरा' इति।

ते चानुमीयमाना रत्यादयः पुनः पुनरनुशीलनाद् आस्वादपदवीं (प्रत्यक्षविषयताम्) गताः सन्तः ज्ञानसम्बन्धेन सामाजिकनिष्ठरसतामापद्यन्ते। दुग्धमेव यथा अम्लयोगेन दधित्वं प्राप्नुवद् दध्नः कारणमुच्यते तथा विभावादिप्रतीतिः अनुमीयमानरत्यादियोगेन रसादिरूपतां प्राप्नुवती रसादेः कारणमुच्यते। इति महिमभट्टानामाशयः।

अत्रोच्यते—किं शब्दाभिनयसमर्पितविभावादिप्रत्ययानुमितरामादिगतरागादिज्ञानमेव रसत्वेनाभिमतं भवतः? शब्दाभिनयसमर्पितविभावादिप्रत्ययानुमितरामादिगतरागादिभावनया भावुकैः (सहृदयैः) भाव्यमानः (आस्वाद्यमानः) स्वप्रकाशानन्दो वा? आद्ये न विवादः। किन्तु रामादिगतरागादिज्ञानं रससंज्ञया नोच्यतेऽस्माभिः। अतोऽस्माभिरभिमतो रसो नानुमान-

गम्यः। द्वितीयस्तु व्याप्तिग्रहाभावाद् विलक्षणकटाक्षवत्त्वरूपहेतोराभासतया अनुमितिविषय एव न।

न च पूर्वं 'यत्र यत्र रामादिगतानुरागज्ञानं तत्र तत्र रसोत्पत्तिः' इति व्याप्तिं गृहीत्वा 'अयं सामाजिकः शृङ्गाररसवान् रामादिगतानुरागज्ञानवत्त्वात् सामाजिकान्तरवत्' इत्यनुमानेन रसज्ञानं भविष्यतीति वाच्यं व्याप्तिग्रहाभावात्। धूमाद् अग्नेरनुमानं तु धूमाग्न्योर्व्याप्तिं गृहीत्वैव भवति, न चात्र तथा अनुरागज्ञानरसयोर्व्याप्तिरस्ति। न हि अनुरागज्ञानं सदा रसेन सहाव्यभिचारेण तिष्ठति। यतो हि जरन्मीमांसकानां हृदये रागादिज्ञानसत्त्वेऽपि न रसलेशोऽपि उदेति। अतो हेतुर्व्यभिचारी एव।

अपि च सहृदयैः स्वहृदये यो रसास्वादः क्रियते स नानुमानविषयः किन्तु प्रत्यक्षविषयः।

यच्चोक्तं तेनैव—'यत्रैवंविधानां विभावानुभावसात्त्विकसञ्चारिणामभिधानमभिनयो वा तत्र तत्र शृङ्गारादिरसाविर्भावः' इति सुग्रहैव व्याप्तिः पक्षधर्मता च। यथा—

'योऽर्थान्तराभिव्यक्तौ वः सामग्रीष्टा निबन्धनम्।
सैवानुमितिपक्षे नो गमकत्वेन सम्मता॥' इति॥

अर्थाद् या विभावादिरूपा सामग्री व्यञ्जनावादिनां मते व्यङ्ग्यार्थाभिव्यक्तेः कारणं सैव मम (महिमभट्टस्य) अपि अनुमितेः साधनमिति।

अथ सिद्धान्तवादी समाधत्ते—इदं कथनमपि अस्माकं व्यञ्जनावादिनां न विरुद्धम्। न हि एवंविधा प्रतीतिः=अनुमानजनितं रत्यादिज्ञानम्, अथवा 'सभ्यो रसादिप्रतीतिमान् विभावादिप्रतीतिमत्त्वात्। इत्यनुमानगम्यो रसादिविषयकबोधः, नास्वाद्यत्वेनाऽभिमतोऽस्माभिः, किन्तु स्वप्रकाशमात्रविश्रान्तः सान्द्रानन्दनिर्भरः। तेनात्र सिषाधयिषितादर्थात्=रसादेरनुमेयत्वसाधनादर्थात्, अर्थान्तरस्य=रामादिगतस्य अनुरागस्य अनुमानेन साधनाद् हेतोराभासतेति दिक्।

(६१) प्रश्नः—महिमभट्टाभिमतं वस्त्वलङ्कारयोरनुमानगतार्थत्वं संसाध्य तस्य खण्डनप्रकारः प्रदर्शनीयः। (१९३५, ३९)

उत्तरम्—ननु 'भ्रम धार्मिक विश्रब्धम्' इत्यत्र यद् व्यज्यमानं वस्तु 'अभ्रमणरूपम्' तदपि अनुमेयमेव। तथा च 'गोदावरीतीरं भीरुभ्रमणायोग्यं सिंहवत्त्वात्, यन्नैवं तन्नैवं, यथा गृहम्।' अत्र 'यद् यद् भीरुभ्रमणम्, तत्तद् भय-

कारणानुपलब्धिपूर्वकम्' इति व्याप्तिः। अनेन गोदावरीतीरं भीरुभ्रमणायोग्यम् इत्यनुमीयते, इति चेत् ? न। हेतोर्व्यभिचारित्वात्, 'यद् यद् भीरुभ्रमणं तत्तद् भयकारणानुपलब्धिपूर्वकम्' इति व्यतिरेकव्याप्तेरेवासिद्धत्वात् भीरोरपि कार्य-गौरवेण गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण वा गमनस्य सम्भवात्। पुंश्चल्या वचनं प्रामाणिकं न वेति सन्देहाद् व्याप्तेः सन्दिग्धत्वाद् हेतोः सन्दिग्धत्वम् असिद्धत्वं च।

एवमेव 'जलकेलितरलकरतल' इत्यत्र 'राधिकावदनं चन्द्रः आत्मदर्शना-दर्शनाभ्यां चक्रवाकविघटनसङ्घटनकारित्वात्, गगनस्थचन्द्रवत्।' इत्यनुमानेन रूपकालङ्कारोऽनुमेय एवेत्यपि न वक्तव्यम्। न हि चन्द्र एव तयोः विघटन-सङ्घटनकारीति नियमः। व्याघ्रादिदर्शनादपि तत्सम्भवात्, रात्रौ चन्द्राभावेऽपि तद्वियोगस्य कविसम्प्रदायप्रसिद्धत्वाच्च, हेतोर्व्यभिचारित्वमिति। अतो नालङ्कार-व्यङ्ग्यस्याऽनुमाने गतार्थता।

एतेन—'अनुमानं नाम पक्षसत्त्व-सपक्षसत्त्व-विपक्षव्यावृतत्वविशिष्टाल्लि-ङ्गाल्लिङ्गिनो ज्ञानम्। ततश्च वाच्यादसम्बद्धोऽर्थस्तावन्न प्रतीयते। अन्यथा-ऽतिप्रसङ्गः स्यात्, इति बोध्यबोधकयोरर्थयोः कश्चित्सम्बन्धोऽस्त्येव। ततश्च बोधकोऽर्थो लिङ्गं बोध्यश्च लिङ्गी। बोधकस्य चार्थस्य पक्षसत्त्वं निबद्धमेव। सपक्षसत्त्वविपक्षव्यावृतत्वे अनिबद्धे अपि सामर्थ्यादवसेये। अस्मादत्र वाच्यार्था-ल्लिङ्गरूपाल्लिङ्गिनो व्यङ्ग्यार्थस्यावगमस्तदनुमाने एव पर्यवस्यति' इति यदुक्तं तदपि परास्तम्।

एवं 'दृष्टिं हे प्रतिवेशिनि' इत्यादौ तनूल्लिखनम् एकाकितया च स्रोतो-गमनम्, तस्याः परकामुकोपभोगस्य लिङ्गिनो लिङ्गम्। यथा—'इयम्, परकामुकोपभोगवती एकाकितया स्रोतोगमने सति तनूल्लिखनवत्त्वात्, कुलटा-न्तरवत्।' अयमपि हेतुर्व्यभिचारी। यतो हि 'यत्र यत्र एकाकितया स्रोतो-गमने सति तनूल्लिखनं तत्र तत्र परकामुकोपभोगः' इति व्याप्तिर्न सम्भवति, स्वकान्तस्नेहेनापि स्रोतोगमनस्य तनूल्लिखनस्य च सम्भवात्।

एवं 'निःशेषच्युतचन्दनं स्तनतटम्' इत्यादौ तैस्तैर्लिङ्गैः दूत्यास्तत्कामु-कोपभोगोऽनुमीयते। यथा—'प्रतिपाद्या दूती तत्कामुकोपभोगवती चन्दन-च्यवनादेः' इति तन्न युक्तम्। तथाहि—दूत्यास्तत्कामुकोपभोगः किं प्रतिपाद्यया दूत्या, तत्कालसन्निहितैर्वान्यैः तत्काव्यार्थभावनया वा सहृदयैरनुमीयते ?

आद्ययोर्न विवादः। तृतीये तु तथाविधाभिप्रायविरहस्थले व्यभिचारः, चन्दनच्यवनादीनां स्नानादिनापि सम्भवात्।

ननु वक्त्राद्यवस्थासहकृतत्वेन विशेष्यो हेतुरिति चेत्? तदपि न वाच्यम् एवंविधव्याप्त्यनुसन्धानस्याभावात्।

किञ्चैवंविधानां कविप्रतिभामात्रजन्मनां प्रामाण्यानावश्यकत्वेन हेतुः सन्दिग्धासिद्धः। व्यक्तिवादिना चाऽधमपदसहायानामेवैषां पदार्थानां व्यञ्जकत्वमुक्तम्। तेन च तत्कान्तस्याधमत्वं प्रामाणिकं न वेति सन्देह एव। तस्मान्नात्र अनुमानस्यावकाशः। अतो नानुमाने गतार्थत्वं व्यङ्ग्ययोर्वस्त्वलङ्कारयोरिति दिक्।

(६२) प्रश्नः—रसस्य अर्थापत्तिवेद्यत्वं निरस्य सूचनबुद्धिवेद्यत्वं स्मृतित्वं च खण्डनीयम्। (वा० सं० वि० वि० १९२१, ३४)

उत्तरम्—ननु रसस्य अर्थापत्त्यैव बोधे सिद्धे अलं व्यञ्जनयेति चेत्? न अर्थापत्तिर्हि व्याप्तिज्ञानमुपजीव्यैव प्रवर्तते। यथा—'जीवति चात्र गोष्ठयामविद्यमानैश्चैत्रः' इति व्याप्तिज्ञानं च व्यभिचारसन्देहे नहि भवत्येव, इति नार्थापत्ति प्रमाणवेद्यता रसस्येति।

न च वस्त्रविक्रयादौ तर्जनीतोलनेन दशसङ्ख्यादिवत् सूचनबुद्धिवेद्योऽप्ययं रसो भवतीति वाच्यम्। सूचनबुद्धेरपि सङ्केतादिलौकिकप्रमाणसापेक्षत्वेनानुमानप्रकारताङ्गीकारात्।

किञ्च संस्कारजन्यं ज्ञानं स्मृतिरिति स्मृतिलक्षणानुरोधेन संस्कारजन्यत्वाद् रसादिबुद्धिः स्मृतिरेव। तथा च—'रसज्ञानं स्मृतिः संस्कारजन्यज्ञानत्वात् स्मृत्यन्तरवत्' इति। इदमपि न वाच्यम्। प्रत्यभिज्ञायामनैकान्तिकतया हेतोराभासता। तथा हि—पूर्वदृष्टस्य देवदत्तस्य पुनर्दर्शने 'सोऽयं देवदत्तः' इति ज्ञानं प्रत्यभिज्ञा। अत्र 'सः' इत्यंशः स्मृतेः, 'अयम्' इत्यंशस्तु प्रत्यक्षस्य। प्रत्यभिज्ञाया अपि संस्कारजन्यत्वात् स्मृतिव्यतिरिक्तत्वाच्च नायं हेतुरव्यभिचारि। अतो न रसज्ञानं स्मृतिः।

॥ इति साहित्यदर्पणालोके पञ्चमः परिच्छेदः ॥

षष्ठः परिच्छेदः

(६३) प्रश्नः—रसात्मकवाक्यस्य काव्यत्वाङ्गीकारे, वाक्यस्य न दर्शनयोग्यता, इति कथं काव्यस्य दृश्यत्वसिद्धिरिति विचार्य लिखत ।

उत्तरम्—ननु वाक्यं रसात्मकं काव्यमिति काव्यलक्षणम् । तत्र वाक्यस्य काव्यत्वाङ्गीकारे, तस्य च वाक्यस्य दर्शनयोग्यत्वात् कथं काव्यस्य दृश्यभेदसिद्धिरिति चेत् ? न । वाक्यस्य पदसमूहत्वेन पदस्य च विभक्तिविशिष्टशब्दरूपत्वेन शब्दार्थयोश्चाभिन्नतया वाक्यस्यापि शब्दात्मकत्वार्थात्मकत्वस्वीकारेण तत्र शब्दतात्पर्येण श्रव्यभेदस्य अर्थतात्पर्येण च दृश्यभेदस्य सिद्धिरिति दिक् ।

(६४) प्रश्नः—काव्यस्य ध्वनिर्गुणीभूतव्यङ्ग्यदृश्यश्रव्यभेदैश्च चातुर्विध्यात् काव्यं चतुर्धा, इति कुतो नोक्तम् ? इति विचार्यताम् ।

उत्तरम्—ननु काव्यस्यैव चतुर्विधस्य सत्त्वात्, कथमेकत्र द्वयोः ध्वनिगुणीभूतव्यङ्ग्ययोः, अपरत्र दृश्यश्रव्ययोश्च पृथक् पृथक् निर्देश इति चेत् ? श्रूयताम्—काव्यस्य रसात्मकवाक्यत्वाद् रसस्य च चमत्कारसारत्वाद्, चमत्कारस्य च कुत्रचिदुत्तमत्वं कुत्रचिदधमत्वमिति चमत्कारद्वैविध्येन काव्यस्य ध्वनिर्गुणीभूतव्यङ्ग्यं चेति भेदद्वयं पृथक् निर्दिष्टम् ।

अपरं च काव्यं वाक्यम् । वाक्यं च पदसमूहः । पदं च शब्दरूपम् । 'घटः' इत्ययं शब्दः, 'घटः' इत्ययमर्थः, इति शब्दार्थयोरभेदव्यवहारदर्शनेन शब्दस्य श्रव्यत्वम्, अर्थस्य च दृश्यत्वं सिद्धयति । तत्र दृश्यकाव्येन अभिनयादिना काव्यार्थबोधः । श्रव्यकाव्येन उपदेशादिनेति उभयोर्भेदः । अतोऽयं काव्यशरीरनिर्धारको भेद इत्युभयोः पृथक् पृथक् परिगणनमिति दिक् ।

(६५) प्रश्नः—दृश्यकाव्यस्य स्वरूपमुल्लिख्य अभिनयस्य च लक्षणमभिधाय तद्भेदांश्च प्रदर्श्य रूपकाणि कति उपरूपकाणि च कति ? इति विवेचयत ।

उत्तरम्—दृश्यश्रव्यत्वभेदेन काव्यं द्विविधम् । दृश्यं दर्शनीयप्रधानम्, श्रव्यं श्रोतव्यमात्रम् । तत्राभिनययोग्यं काव्यं दृश्यं भवति । तदेव दृश्यं काव्यं नटे रामादिस्वरूपाणामारोपाद् रूपकमुच्यते । उक्तं च मन्दारमरन्दे—

'यथा मुखादौ पद्मादेरारोपो रूपकं मतम् ।
तथैव नायकारोपो नटे रूपकमुच्यते ॥' इति ।

ननु को नामाभिनयः ? अत्राह—नाटैरङ्गादिभिः रामयुधिष्ठिरादीनाम् अवस्थानुकरणम् अभिनयः। स च चतुर्विधो भवति—आङ्गिको, वाचिक, आहार्यः, सात्त्विकश्चेति। उक्तं च साहित्यदर्पणे—

'भवेदभिनयोऽवस्थानुकारः च चतुर्विधः।
आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा॥' इति।

तत्र अङ्गेन निष्पन्न आङ्गिकः, वचसा प्रतिपाद्यो वाचिकः, आहरणीयवेष-रचनानिष्पाद्य आहार्यः, स्तम्भस्वेदादिनिष्पाद्यः सात्त्विकः।

तच्च दृश्यं काव्यं रूपकोपरूपकभेदेन द्विविधम्। तत्र रूपकं दशविधम्। तद्यथा—नाटकम्, प्रकरणम्, भाणः, व्यायोगः, समवकारः, डिमः, ईहामृगः, अङ्कः, वीथी, प्रहसनं चेति। उपरूपकं चाष्टादशविधम्। तद्यथा—नाटिका, त्रोटकम्, गोष्ठी, सट्टकम्, नाट्यरासकम्, प्रस्थानम्, उल्लाप्यकम्, काव्यम्, प्रेङ्खणम्, रासकम्, श्रीगदितम्, शिल्पकम्, विलासिका, दुर्मल्लिका, प्रकरणी, हल्लीशः, भाणिका चेति।

(६६) प्रश्नः—नाटकस्य लक्षणं विलिख्य तत्र केषां केषां कार्याणां प्रतिपादनं दर्शनं वा निषिद्धम् ? इति विविच्य लिखत। (वा० सं० वि० वि० १९५२, ५८)

उत्तरम्—नाटकस्य वृत्तं रामायणादिप्रसिद्धं भवेत्। पञ्चसन्धियुक्तं विलासर्द्ध्यादिगुणैः नानाविभूतिभिश्च युतं नानारसैश्च व्याप्तं भवेत्। तत्र सुख-दुःखसमुत्पत्तिर्वर्णिता स्यात्। न्यूनात्न्यूनं पञ्चाङ्कम्, अधिकाधिकं च दशाङ्कं नाटकं भवति। नायकश्च तत्र रामायणमहाभारतादिप्रसिद्धो राजर्षिः, धीरोदात्तः, दिव्यो यथा—श्रीकृष्णः, अदिव्यो यथा—दुष्यन्तादिः, दिव्यादिव्यश्च यो दिव्योऽपि आत्मनि नराभिमानी यथा—श्रीरामचन्द्रः, इत्येतादृशो भवेत्। नाटके शृङ्गारवीरादिषु रसेषु एक एव प्रधानरसो भवति, अन्ये च रसास्तदङ्ग-भूताः। यथा—शाकुन्तले शृङ्गारः, वेणीसंहारे वीरः, उत्तररामचरिते करुण-विप्रलम्भः, प्रबोधचन्द्रोदये शान्तश्च। तच्च निर्वहणसन्धौ अद्भुतं कर्त्तव्यम्। चत्वारः पञ्च वा पुरुषास्तत्र कार्ये निरता भवेयुः। तस्य विरचनं च गोपुच्छ-समाग्रं भवितव्यम्। अत्र तु—क्रमेणाङ्काः सूक्ष्माः कर्त्तव्याः इति केचित्। अन्ये त्वाहुः—यथा गोपुच्छे केचिद् बाला ह्रस्वाः, केचिद् दीर्घास्तथेह कानिचित् कार्याणि मुखसन्धौ समाप्तानि कानिचित् प्रतिमुखे। एवमन्येष्वपि कानिचित्, कानिचित् इति।

नाटके च दूराह्वानं वधो युद्धं विवाहो, भोजनं शापो, मलमूत्रत्यागो मृत्यु रतिक्रिया ओष्ठादौ दन्ताघातो नखाघातः, अन्यच्च यद् यद् लज्जाजनकं शयना धरपानादि, नगरादिप्रतिरोधनं स्नानम् अनुलेपनम् इत्यादीनि न वर्णनीयानीति

(६७) प्रश्नः—अङ्कगर्भाङ्कयोर्लक्षणं प्रतिपाद्यताम् । (वा० सं० शि० वि० १९५९)

उत्तरम्—अङ्कः—अङ्कनिरुक्तिविषये नाटचशास्त्रे भरत एवमाह—

'अङ्क इति रूढिशब्दो भावैश्च रसैश्च रोहयत्यर्थान् ।
नानाविधानयुक्तो यस्मात्तस्माद् भवेदङ्कः ॥' इति ॥

अङ्के नायकस्य नायिकाया वा चरित्रं प्रत्यक्षवद् भासमानं भवति । अयं च रसैर्भावैश्च शोभितः स्पष्टार्थः, अदीर्घसमासगद्यपद्ययुक्तो भवेत् । अत्र व्यापकप्रसङ्गस्यैकदेशरूपोऽर्थः समाप्तः स्यात्, किन्तु बिन्दुः यथाकथञ्चित् प्रवृत्त एव भवेत् । अपि चायं बहुभिः कार्यैर्युक्तः स्यात् । बीजनामकस्यार्थ प्रकृतेः निर्वहणाख्यस्य सन्धेश्च विधानं तत्र न भवति । किञ्च बहुभिर्घटनाभि र्युक्तो नातिप्रचुरपद्यवान् गद्यपद्यानां तारतम्येन निवेशनीयः । तत्र सन्ध्या वन्दनादिकार्याणां परित्यागो न क्रियते । किञ्च स्वल्पदिनसम्पाद्यया उत्तरोत्तर भाविन्या कथया सम्प्रयोजितो भवेत् । तत्र त्रिभिश्चतुर्भिर्वा पात्रैर्नायक सन्निहितः स्यात् । भावरसपूर्णः देवीपरिजनामात्यवणिग्राजकुमारादीनां प्रत्यक्षचरितैश्च युक्तो भवेत् । अङ्कसमाप्तौ च निष्क्रान्तनिखिलपात्रः सोऽङ्क इति कीर्तितः । अत्र दूराह्वानवधयुद्धराजभ्रंशमृत्युनगरोपरोधनव्रीडाजनक दन्ताघातनखाघातादीनां प्रतिपादनं न क्रियते, इति ।

गर्भाङ्कः—प्रधानाङ्कमध्येऽवान्तरविच्छेदरूपोऽङ्को गर्भाङ्क इति कथ्यते । उक्तं च साहित्यदर्पणे—

'अङ्कोदरप्रविष्टो यो रङ्गद्वारामुखादिमान् ।
अङ्कोऽपरः स गर्भाङ्कः सबीजः फलवानपि ॥'

अर्थात् कस्यचित् प्रधानाङ्कस्य मध्ये गतो मङ्गलाचरणप्रस्तावनादियुक्तः सभापूजाविष्कम्भकप्रवेशकादियुक्तश्च योऽपरोऽङ्कः स गर्भाङ्क इति कथ्यते । यथा बालरामायणे रावणं प्रति कोहलः (कञ्चुकी)—

'श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः ।
भवदर्थमेव निबद्धं नाट्यं सीतास्वयंवरणम् ॥'

इत्यादिना विरचितः सीतास्वयंवरो नाम गर्भाङ्कः ।

(६८) प्रश्नः—पूर्वरङ्गस्य लक्षणमुल्लिख्य सूत्रधारस्य स्थापकस्य च स्वरूपं निर्दिश्यताम् । (वा० सं० वि० वि० १९५५, ५९)

उत्तरम्—पूर्वरङ्गः—सूत्रधारादिनटा नाट्यशालायां विघ्नानां निराकरणाय नाट्यवर्णनीयपदार्थात् पूर्वं=सर्वप्रथमं स्वसमाजनियमाद् यदाचरन्ति स पूर्वरङ्ग उच्यते । अर्थात् पूर्वरङ्गो नाम रङ्गोपद्रवनिवारको नान्दीपाठगीतवादित्रादिनानाविधाङ्गविशेषो नाट्यादौ सूत्रधारादिनटैरनुष्ठेयः कर्मविशेषः । उक्तं च साहित्यदर्पणे—

'यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥' इति ॥

सूत्रधारः—नाटकस्य प्रबन्धकर्ता सूत्रधारो भवति । सूत्रं च नाटकीयं वस्तु । उक्तं च—

'नाट्योपकरणादीनि सूत्रमित्यभिधीयते ।
सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते ॥' इति ॥

स्थापकः—काव्यार्थस्य स्थापनात् स्थापकः । सूत्रधारसदृशगुणाकारोऽयं नाटकरूपं काव्यं आस्थापयति=सभापूजादिपुरस्सरं सूचयति । स च स्थापको दिव्यं वस्तु दिव्यो भूत्वा, मर्त्यं मर्त्यो भूत्वा, मिश्रं च दिव्यमर्त्ययोऽन्यतरो भूत्वा वस्तु बीजं मुखं पात्रं वा सूचयेदिति । इत्थं च पूर्वरङ्गस्य प्रयोक्ता सूत्रधारः । नाटकरूपकाव्यार्थस्य सूचकश्च स्थापकः । उक्तं च साहित्यदर्पणे—

'पूर्वरङ्गं विधायैव सूत्रधारो निवर्तते ।
प्रविश्य स्थापकस्तद्वत्काव्यमास्थापयेत्ततः ॥' इत्यादि ।

इदानीं पूर्वरङ्गस्य सम्यक् प्रयोगाभावाद् एक एव सूत्रधारः सर्वं प्रयोजयतीति व्यवहारः ।

(६९) प्रश्नः—नान्द्याः लक्षणं सोदाहरणं सप्रपञ्चं च प्रतिपाद्यताम् । (वा० सं० वि० वि० १९५२, ६९)

उत्तरम्—नान्दी—देवद्विजनृपगुर्वादीनाम् आशीर्वादयुक्ता स्तुति=गुणकीर्तनं यस्माद् प्रवर्तते=सभासत्सु नटैः श्राव्यते तद्वचनमेव नान्दीति कथ्यते । नन्दयति देवादीन् सामाजिकान् कुशीलवांश्च या सा नान्दी । नाट्यप्रदीपे तु नान्दीपदव्युत्पत्तिरित्थमुक्ता—

'नन्दन्ति काव्यानि कवीन्द्रवर्गाः कुशीलवाः पारिषदाश्च सन्तः ।
यस्मादलं सज्जनसिन्धुहंसी तस्मादियं सा कथितेह नान्दी ॥' इति ॥

सा च मङ्गलद्योतकं शङ्खं चन्द्रं कमलं चक्रवाकं कैरवं च कयाचिदपि अभिधाद्यावृत्त्या प्रत्याययति। सा चाष्टाभिः द्वादशभिर्वा पदैर्युक्ता भवेत्। एतदुपलक्षणम्। तथा चाहाभिनवगुप्तपादः—'अनेन त्र्यस्रतालानुगता त्रिपदा षट्पदा द्वादशपदेति। चतुरस्रतालानुगता चतुष्पदा, अष्टपदा, षोडशपदेति त्रिविधैव न, अतः परमपि भूयस्त्वादादृतेति। उक्तं च साहित्यदर्पणे—

'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥
माङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत॥' इति॥

अत्र पदशब्देन श्लोकावयवभूतं सुबन्तं तिङन्तं वा श्लोकतुरीयांशरूपं वाऽवान्तरवाक्यरूपं वा ग्राह्यम्। उक्तं च नाटयप्रदीपे—

'श्लोकपादः पदं केचित् सुप्तिङन्तमथापरे।
परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे॥' इति॥

तत्र द्वादशपदा नान्दी यथोत्तररामचरिते—

'इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे।
विन्देम देवतां वाचममृतामात्मनः कलाम्॥' इति॥

एतन्नान्दीति कस्यचिन्मतानुसारेणोक्तम्। वस्तुतस्तु पूर्वरङ्गस्य रङ्गद्वार-नामकमङ्गम् इत्यन्ये। यदुक्तम्—

'यस्मादभिनयो ह्यत्र प्राथम्यादवतार्यते।
रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकम्॥' इति॥

उक्तप्रकारायाश्च नान्द्या रङ्गद्वारात्प्रथमं नटैरेव कर्तव्यतया न महर्षिणा निर्देशः कृतः। कालिदासादिमहाकविप्रबन्धेषु च—

'वेदान्तेषु यमाहुरेकपुरुषं व्याप्यस्थितं रोदसी,
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः॥'

एवमादिषु नान्दीलक्षणायोगात्। उक्तं च—'रङ्गद्वारमारभ्य कविः कुर्यात्–' इत्यादि। अत एव प्राक्तनपुस्तकेषु 'नान्द्यन्ते सूत्रधारः' इति लेखनम्, तस्यायमभिप्रायः—'नान्द्यन्ते सूत्रधार इदं प्रयोजितवान्'। 'इतः प्रभृति मया नाटकमुपादीयते इति कवेरभिप्रायः सूचितः' इति।

इत्थं च यत्र नान्द्यस्ति रङ्गद्वारं च नास्ति तत्र तन्त्रेण सैव रङ्गद्वारम्। यत्र रङ्गद्वारमेवास्ति न नान्दी तत्र सा फलबलादनुमेया। यथा—'वेदान्तेषु' इत्यादौ सूत्रधारस्यावश्यकर्त्तव्यत्वेन नान्दीपाठस्तत्रानुमेयः। यत्र त्वारम्भे बहवः श्लोकास्तत्र प्रथमं श्लोकद्वयं नान्दी, अपरे रङ्गद्वारमिति वागीशादयः। काव्येन्दुप्रकाशे तु—

'नीली शुद्धेति भेदेन सा नान्दी द्विविधा भवेत्।
उपादानं वर्णनं वा भवेद् यत्रेन्दुसूर्ययोः।
सा नीली स्यादन्या तु शुद्धेति परिगीयते॥'

इति नीली-शुद्धाभेदेन नान्द्या द्वैविध्यं स्वीकृत्य 'या स्रष्टुः सृष्टिराद्या' इत्यस्य 'निष्प्रत्यूहमुपास्महे—' इत्यस्य च नीलीत्वम्, 'वेदान्तेषु—' इत्यादेश्च शुद्धात्वं गणितम्।

(७०) प्रश्नः—आमुखस्य (प्रस्तावनायाः) लक्षणं निरूप्यताम्। (वा० सं० वि० वि० १९५२, ५६, ७१)

उत्तरम्—नटी विदूषकः पारिपार्श्विक एव वा सूत्रधारेण सम्मिलिताः सन्तो यत्र स्वस्वकर्त्तव्यविषयमाश्रित्य प्रस्तुतं दृश्यकाव्यं सूचयन्तीति तैस्तथोक्तैर्विचित्रैर्वाक्यैः परस्परं सम्भाषणं कुर्वते तत्तु आमुखं विज्ञेयम्। मुखे=प्रारम्भे विधेयत्वाद् आमुखम्। सैव प्रस्तावयति=प्रकृताभिनयविषयं सूचयतीति व्युत्पत्त्या प्रस्तावना कथ्यते। उक्तं च साहित्यदर्पणे—

'नटी विदूषको वापि पारिपार्श्विक एव वा।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनाऽपि सा॥' इति॥

(७१) प्रश्नः—को नामार्थोपक्षेपकः, कतिविधश्च सः? इति सोदाहरणं प्रतिपाद्यताम्।

उत्तरम्—अर्थान्=कथावस्तूनि, उपक्षिपति=उपस्थापयति, यः सोऽर्थोपक्षेपकः। स च पञ्चविधो भवति—विष्कम्भकः, प्रवेशकः, चूलिका, अङ्कावतारः, अङ्कमुखं चेति। तेषां क्रमेण स्वरूपमुच्यते—

विष्कम्भकः—अतीतानाम् आगमिनां च वृत्तान्तभागानां ज्ञापकः, रूपकांशविशेषः, सङ्क्षिप्तार्थः (स्वल्पं कथावस्तु) अङ्कस्य पूर्वभागे प्रयोजितो

विष्कम्भकः स्यात् । स चैकेन मध्यमपात्रेण द्वाभ्यां वा मध्यमपात्राभ्यां बहुभिर्वा मध्यमपात्रैः संविहितः संस्कृतात्मक शुद्धः स्यात् । अधममध्यमपात्राभ्यां प्रयोजितस्तु संस्कृतप्राकृतात्मकः मिश्रः स्यात् । तथा चैकजातीयपात्रप्रयुक्तत्वेन शुद्धत्वम्, विभिन्नजातीयपात्रप्रयुक्तत्वेन मिश्रत्वम्, इति । उक्तं च—

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
सङ्क्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः ।
शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः ॥' इति ॥

तत्र शुद्धो यथा—मालतीमाधवे अघोरघण्टस्य शिष्यया कपालकुण्डलया प्रयोजितः । मिश्रविष्कम्भो यथा—रामाभिनन्दे क्षपणककापालिकाभ्यां प्रयोजितः ।

प्रवेशकः—अङ्कद्वयस्य मध्ये अनुदात्तोक्त्या=संस्कृतेतरभाषया, एकेन नीचपात्रेण नीचाभ्यां वा पात्राभ्यां नीचैर्वा पात्रैः प्रयोजितः रूपकांशविशेषः अप्रत्यक्षान् अर्थान् सामाजिकहृदये प्रवेशयति=सूचयतीति प्रवेशको विज्ञेयः । अत्र नीचत्वं संस्कृतेतरभाषित्वादेव । तेन सङ्ख्यादिभिश्च प्रवेशकस्य प्रयोजितत्वम् । शेषं तु विष्कम्भकवद् विज्ञेयम् । उक्तं च—

'प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजितः ।
अङ्कद्वयान्तर्विज्ञेयः शेषं विष्कम्भके यथा ॥'

अङ्कद्वयस्यान्तरिति प्रथमाङ्केऽस्य प्रतिषेधः । यथा वेणीसंहारनाटके तृतीयाङ्के—राक्षस्या राक्षसेन च नीचोक्त्या सिन्धुराजवधः, भाविदुःशासनवधश्च सूचित इति भावः । अत्र पात्रवैलक्ष्यप्रतिपादनेन विष्कम्भादस्य वैलक्ष्यं प्रतिपादितम् ।

चूलिका—जवनिकान्तर्देशस्थितैः पात्रैः वस्तुविशेषस्य सूचना चूलिका कथ्यते । यथा वीरचरिते चतुर्थाङ्कस्यादौ—'(नेपथ्ये) भो भो वैमानिकाः, प्रवर्तन्तां रङ्गमङ्गलानि' इत्यादि । 'रामेण परशुरामो जितः' इति नेपथ्ये पात्रैः सूचितम् ।

अङ्कावतारः—यस्य कस्यचिदङ्कस्य अन्ते पात्रैस्तदङ्काभिन्नत्वेन कथ्यते । यथा—अभिज्ञानशाकुन्तलनाटके पञ्चमाङ्के पात्रैः सूचितः षष्ठोऽङ्कः तदङ्कस्याङ्गविशेष इवावतीर्णः ।

अङ्कमुखम्—यत्रैकस्मिन्नेवाङ्के समस्तानामङ्कानाम् अखिला सूचना
मालतीमाधवे प्रथमाङ्कादौ कामन्दक्यवलोकिते भूरिवसुप्रभृतीनां भाविभूमि-
कानां परिक्षिप्तकथाप्रबन्धस्य च प्रसङ्गात् सन्निवेशं सूचितवत्यौ ।

धनिकानुसारेण अङ्कमुखस्य लक्षणं त्वित्थम्—अङ्कान्ते प्रविष्टैः पात्रैः
अतीताङ्कस्य वृत्तान्तसूचनाद् अङ्कमुखं भवेत्। अन्ये तु अङ्कावतरणेनैवेदं
गतार्थमित्याहुः ।

(७२) प्रश्नः—का अर्थप्रकृतयः ? कति च तासां भेदाः ? सोदा-
हरणं लिखत । (वा० सं० वि० वि० १९४१, ४७)

उत्तरम्— प्रक्रियते प्रयोजनं साध्यते आभिरिति प्रकृतयो हेतवः । अर्थस्य=
प्रयोजनस्य, प्रकृतयः=सिद्धिहेतवः, इति अर्थप्रकृतयः। ताश्च पञ्चप्रकारा
भवन्ति—बीजम्, बिन्दुः, पताका, प्रकरी, कार्यम् इति ।

बीजम्—'अल्पमात्रं समुद्दिष्टं बहुधा यद् विसर्पति ।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ॥'

अर्थाद् यदादौ अङ्कुरितत्वमात्रेण प्रदर्शितं सत् पश्चाद् बहुधा=बहुभिः
प्रकारैः, विस्तारं प्राप्नोति=विविधावान्तरकार्याणि जनयति तद् 'बीजम्' इत्य-
भिधीयते । तच्च नायकमुख्योद्देश्यस्य आदिकारणं भवति । तद् धान्यबीजवत्
'बीजम्' इत्यभिधीयते कविभिः ।

यथा—रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुर्दैवानुकूल्यलालितो
यौगन्धरायणव्यापारः। यथा वा—वेणीसंहारनाटके द्रौपदीकेशसंयमनहेतु-
र्भीमसेनक्रोधोपचितो युधिष्ठिरोत्साहः ।

बिन्दुः—'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् ।'

अर्थाद् अवान्तरकथायाः समाप्तत्वेन लब्धविश्रामे प्रधानकथायाः अविच्छे-
दस्य यो हेतुः स बिन्दुः। जलतैलबिन्दुवत् प्रसारित्वात् बिन्दुरिति व्यपदेशः ।
बीजं केवलं मुखसन्धावेव निबध्यते, बिन्दुस्तु तदनन्तरमिति भेदः ।

यथा—रत्नावल्याम् अनङ्गपूजापरिसमाप्तौ कथार्थविच्छेदे सति 'उदयन-
स्येन्दोरिवोद्वीक्षते' इति सागरिका श्रुत्वा '(सहर्षम्) कधं एसो सो उदअ-
णरिन्दो' इत्यादिरवान्तरार्थहेतुः ।

पताका—'व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ।' इति ।

या प्रासङ्गिककथा सुदूरं निर्वहणसन्धिपर्यन्तं स्थायिनी सा पताकेति
कथ्यते ।

यथा—रामचरिते सुग्रीवादेः, वेणीसंहारे भीमादेः, शाकुन्तले विदूषकस्य चरितम् 'पताका' इति ।

प्रकरी—'प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता ।' इति ।

अर्थात् नायकचरिते प्रसङ्गादुपस्थितम् प्रदेशविशेषे स्थितं चरितं=वृत्तान्तः, प्रकरोति नायकवृत्तान्तस्य प्रकर्षं जनयतीति प्रकरी मता । पताकायां प्रासङ्गिकवृत्तस्य बहुदेशवृत्तित्वम्, अस्यां तु प्रदेशविशेषवृत्तित्वमिति भेदः ।

यथा—कुलपत्यङ्के रावणजटायुसंवादः ।

पताकानायकस्य प्रकरीनायकस्य वा स्वकीयं फलान्तरं न भवति, किन्तु तयोः सर्वाश्चेष्टाः प्रधाननायकस्य फलसिद्ध्यर्थमेव भवन्ति ।

कार्यम्—'अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनः ।
समापनं तु यत्सिद्ध्यै तत्कार्यमिति सम्मतम् ॥' इति ॥

अर्थात् यत्प्रधानं साध्यम्, यदुद्देश्यकश्च आरम्भः=उपाये प्रथमप्रवृत्तिः, यस्य सिद्ध्यै च सामग्रीसंग्रहः, तत् 'कार्यम्' इत्युच्यते ।

यथा—रामचरिते रावणवधः ।

(७३) प्रश्नः—कार्यस्य का अवस्थाः ? कति च ताः ? किं च तासां स्वरूपम् ? सोदाहरणं निरूपयत । (हि० प्र० यू० ८०, ८१)

उत्तरम्—फलेच्छुभिः प्रारब्धस्य कार्यस्य पञ्चावस्था भवन्ति—आरम्भः, यत्नः, प्राप्त्याशा, नियताप्तिः, फलागमश्चेति ।

आरम्भः—'भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये ।' इति ।

अर्थात् नायकप्रधानप्रयोजनस्य निष्पत्तये या उत्कटरागः स आरम्भो भवेत् ।

यथा—रत्नावल्यां रत्नावल्यन्तःपुरनिवेशार्थं यौगन्धरायणस्यौत्सुक्यम् एव नायकनायिकादीनामौत्सुक्यम् ।

यत्नः—'प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः ।' इति ।

अर्थात् फलप्राप्त्यर्थम् अतित्वरा युक्ता पात्रमात्रस्य या क्रिया सा प्रयत्नो भवेत् । यथा—रामचरिते समुद्रबन्धनादिः ।

प्राप्त्याशा—'उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः ।' इति ।

उपायः=फलसिद्धेः हेतुसद्भावः, अपायस्य=प्रतिबन्धकस्य शङ्का

च, ताभ्यां प्राप्तिसम्भवः=उद्देश्यप्राप्तिसम्भावना, प्राप्तेः=प्रधानफललाभस्य आशा--प्राप्त्याशा भवेत् ।

यथा—रत्नावल्यां तृतीयाङ्के सागरिकाया वासवदत्तावेषकरणम्, तेन च राज्ञः समीपे तस्या अभिसरणम् । राज्ञः सागरिकासङ्गमोपायाद् वासवदत्तारूपप्रतिबन्धकशङ्कया अनिश्चिता=संशयिता, या एकान्ते उदयनसङ्गमरूपफलस्य प्राप्तिः, तस्या आशा 'प्राप्त्याशा' इति । एवमन्यत्र ।

नियताप्तिः—'अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता ।' इति ।
अर्थात् अन्तरायस्याभावात् निश्चिता फलप्राप्तिः नियताप्तिर्भवेत् ।

यथा रत्नावल्याम्—'राजा—देवी प्रसादनं त्यक्त्वा नान्यमुपायं पश्यामि ।' इति देवीवासवदत्तारूपान्तरायस्य प्रसादनेन निवारणात् नियतफलप्राप्तिः सूचिता ।

फलागमः—'सावस्था फलयोगः स्याद्यः समग्रफलोदयः ।'

अर्थात् यः सम्पूर्णप्रयोजनानाम् उद्भवः, सावस्था 'फलागमः' इति कथ्यते ।

यथा—रत्नावल्यां रत्नावलीलाभश्चक्रवर्तित्वलक्षणफलान्तरसहितः । एवमन्यत्र ।

(७४) प्रश्नः—के नाम नाटकोक्ताः सन्धयः ? के च ते ? इति सोदाहरणं विवेचयत । (वा० सं० वि० वि० १९५४, ६४, ६९, हि० प्र० यू० १९८०, ८१)

उत्तरम्—सन्धिः—'अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति ।' इति ।

एकेन प्रयोजनेनान्वितानां कथांशानाम् अवान्तरैकप्रयोजनसम्बन्धः सन्धिः । स च मुखम्, प्रतिमुखम्, गर्भः, विमर्शः, निर्वहणम् (उपसंहृतिः) इति पञ्चधा । क्रमाल्लक्षणमुच्यते—

मुखम्—यत्र सन्धौ अनेकैः वृत्तान्तैः शृङ्गारादिभिः रसैश्च व्यञ्जिता तथोत्साहरूपप्रारम्भावस्थायुक्ता बीजनामकार्यप्रकृतेः समुत्पत्तिर्भवति । यथा—रत्नावल्यां प्रथमेऽङ्के ।

प्रतिमुखम्—यत्र सन्धौ मुखसन्धिप्रवेशिनः प्रयोजनमुख्यकारणस्य किञ्चिज्ज्ञेय इव विकासो भवति तत् प्रतिमुखम्=मुखस्य अभिमुख्येन वर्तते इति प्रतिमुखम्, तन्नामा सन्धिः कथ्यते ।

यथा—रत्नावल्यां द्वितीयाङ्के वत्सराजसागरिकासमागमहेतोरनुरागबीजस्य प्रथमाङ्कोपक्षिप्तस्य सुसङ्गताविदूषकाभ्यां ज्ञायमानतया किञ्चिल्लक्ष्यस्य वासवदत्तया चित्रफलकवृत्तान्तेन किञ्चिदुन्नीयमानस्योद्देशरूप उद्भेदः ।

गर्भः—पूर्वसन्धिद्वये किञ्चित् प्रकाशं प्राप्तस्य प्रयोजनमुख्यकारणस्य यत्र सन्धौ वारं वारं तिरोभावानुसन्धानयुक्ताऽभिव्यक्तिर्भवति, स गर्भनामा सन्धिः । फलस्य गर्भीकरणाद् गर्भः ।

यथा रत्नावल्यां द्वितीयेऽङ्के—'सुसङ्गता—सहि अदक्खिण···न मुञ्चसि' इत्यादौ समुद्भेदः । पुनर्वासवदत्ताप्रवेशे ह्रासः । तृतीयेऽङ्के—'तद्वार्ताऽन्वेषणाय गतः कथं चिरयति वसन्तकः' इत्यन्वेषणम् इत्यादि ।

विमर्शः—यत्र सन्धौ प्रधानप्रयोजनस्य हेतुः गर्भसन्धेरपेक्षयाधिकः प्रकाशितस्तथा शापभयादिभिश्च विघ्नाश्लिष्टो भवति स विमृष्यते पात्रैः कर्त्तव्यं विविच्यते अस्मिन्निति विमर्शस्तन्नामा सन्धिः स्मृतः ।

यथा शाकुन्तले चतुर्थाङ्कादौ–'अनसूया—पिअंवदे जहवि गन्धव्वेण विवाहेण' इत्यत आरभ्य सप्तमाङ्कोपक्षिप्ताच्छकुन्तलाप्रत्यभिज्ञानात्प्रागर्थसञ्चयः शकुन्तलाविस्मरणरूपविघ्नलिङ्गितः ।

निर्वहणम्—यथानियमं कविना यथास्थानम् उपन्यस्ता बीजनामकार्थप्रकृतियुक्ता मुखादिसन्धिचतुष्टयविषया यत्र सन्धौ केवलप्रधानप्रयोजननिमित्तम् उपस्थाप्यन्ते तत् निर्वहति = प्रधानप्रयोजनं जायतेऽस्मिन्निति निर्वहणम् ।

निर्वहणम् उपसंहारः उपसंहृतिरिति पर्यायवाचका इति नार्थान्तरम् ।

यथा—शाकुन्तले सप्तमाङ्के शकुन्तलाभिज्ञानादुत्तरोऽर्थराशिः ।

(७५) प्रश्नः—वृत्तीनां परिचयो देयः । (१९४२, ४८, ५३, ६८)

उत्तरम्—वृत्तः—वर्तते रसोऽनयेति नायिकादिचेष्टाविशेषो वृत्तिः ।

अभिनवगुप्तपादास्तु—वर्तन्तेऽनुप्रासभेदा आसु इति वृत्तयः । ताश्च कैशिकी (कौशिकी), सात्त्वती, आरभटी, भारती चेति चतुर्धा भवन्ति । तत्र—

कैशिकी—'या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसङ्कुला पुष्कलनृत्यगीता ।
कामोपभोगप्रभवोपचारा सा कैशिकी चारुविलासयुक्ता ॥' इति

या मनोहरनायिकादिभूषणविशेषाद्भुता, नारीबहुला, प्रचुरनृत्यगीता शृङ्गारादिनिमित्तभूतव्यवहारा, मनोरमशृङ्गारचेष्टायुक्ता शृङ्गारप्रतिपादिका वृत्तिः सा 'कैशिकी' इति कथ्यते ।

यथा शाकुन्तले राजानं प्रति शकुन्तला—'असंतुट्ठो उण किं करिस्सदि ।
राजा—इदम् । (इति व्यवसितः शकुन्तला वक्त्रं ढौकते ।)'

सात्त्वती—'सात्त्वती बहुला सत्त्वशौर्यत्यागदयार्जवैः ।
सहर्षा क्षुद्रश्रृङ्गारा विशोका साद्भुता तथा ॥'

अर्थाद् अध्यवसायशूरतादानदयार्जवहर्षयुक्ता स्वल्पश्रृङ्गारा शोकरहिता अद्भुतरसयुक्ता वीररसप्रतिपादिका च वृत्तिः सात्त्वती ।

यथा—'आनन्दाय च विस्मयाय च मया दृष्टोऽसि दुःखाय वा,
वैतृष्ण्यं तु कुतोऽद्य सम्प्रति मम त्वद्दर्शने चक्षुषः ।
यन्माङ्गल्यसुखस्य नास्मि विषयः किं वा बहुव्याहृतै-
रस्मिन्विस्मृतजामदग्न्यविजये बाहो धनुर्जृम्भताम् ॥'

अत्र रामस्योत्तेजनकरवाक्यत्वादुत्थापकः सात्त्वती भेदः । वीरो रसः ।

आरभटी—'मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितैः ।
संयुक्ता वधबन्धाद्यैरुद्धतारभटी मता ॥'

मायेन्द्रजालयुद्धकोपस्वपरज्ञानराहित्यादिचेष्टाभिः हननबन्धनप्रभृति-व्यापारैः सहितौद्धत्योपेता वृत्तिरारभटी । इयं रौद्रबीभत्सरसप्रतिपादिका वृत्तिरस्ति । यथोदात्तराघवे—

'जीयन्ते जयिनोऽपि सान्द्रतिमिरव्रातैर्वियद्व्यापिभि-
र्भास्वन्तः सकला रवेरपि करा कस्मादकस्मादमी ।
एते चोग्रकबन्धकण्ठरुधिरैराध्मायमानोदरा,
मुञ्चन्त्याननकन्दरानलमुचस्तीव्रान् रवान् फेरवाः ॥'

अत्र परस्परविरुद्धालीकतिमिररविकिरणादि प्रदर्शनरूपमिन्द्रजालादीनां वस्तूनां माययोत्थापितम् । अत्र रौद्रो रसः ।

भारती—'भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः ।'

संस्कृतबहुलः पुरुषविशेषप्रयोज्यो वाक्प्रधानो व्यापारो भारती वृत्तिः । भरतस्तु नाट्यशास्त्रे एवमाह—

'या वाक्यप्रधाना पुरुषप्रयोज्या स्त्रीवर्जिता संस्कृतवाक्ययुक्ता ।
स्वनामधेयैर्भरतैः प्रयुक्ता सा भारती नाम भवेत्तु वृत्तिः ॥'

यथा रत्नावल्याम्—

'श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी,
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीहवाञ्छितफलप्राप्तेः पदं, किं पुन-
र्मंदभाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥'

अत्र सर्वेषां प्रशंसया प्रकृतनाटकाभिनये श्रोतृणां प्रवृत्त्युन्मुखीकरणात् प्ररोचना नाम भारतीभेदः ।

(७६) प्रश्नः—निम्नाङ्कितानां नाटचोक्तीनां परिचयो देयः—स्वगतम्, प्रकाशम्, अपवारितम्, जनान्तिकम्, आकाशभाषितम् । (वा० सं० वि० वि० १९३८)

उत्तरम्—स्वगतम्—'अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ।' अर्थाद् यद् वाक्यम् अन्यस्य श्रवणायोग्यं तदिह दृश्यकाव्ये स्वस्मिन्नात्ममात्रे गतं=प्रत्यक्षत्वेन स्थितमिति स्वगतं मतम् । अर्थात् तद्वाक्यं पात्रोऽन्यं न वदति किन्तु स्वमनस्येव इत्थं वदति येन सामाजिकास्तच्छृण्वन्ति । 'आत्मगतम्' इत्यस्यैव नामान्तरम् ।

यथा स्वप्नवासवदत्ते—'वासवदत्ता—(आत्मगतम्) एदं पि मए कत्तव्वं आसी । अहो अकरुणा खु इस्सरा ।'

प्रकाशम्—'सर्वश्राव्यं प्रकाशं स्यात् ।' इति ।

यद् वस्तु सर्वैः श्रवणयोग्यं तत् सर्वेषु प्रकाशते प्रत्यक्षीभवतीति 'प्रकाशम्' कथ्यते ।

यथा स्वप्नवासवदत्ते–'वासवदत्ता—हला ! किं दिट्ठो जामादुओ ?' इति ।

अपवारितम्—'तद्भवेदपवारितम् । रहस्यं यदन्यस्य परावृत्त्य प्रकाश्यते ।' इति ।

यद् गोपनीयं वस्तु एकस्मात् पात्रात् सङ्गोप्य स्थानान्तरं गत्वा परस्य जनस्य समक्षे प्रतिपाद्यते तद् 'अपवारितम्' इत्युच्यते ।

यथा स्वप्नवासवदत्ते—'राजा—अये पद्मावती (अपवार्य) वसन्तक ? किमिदम्' ?

जनान्तिकम्—'त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।
अन्योऽन्यामन्त्रणं यत्स्यात् तज्जनान्ते जनान्तिकम् ॥'

यः कश्चिदर्थो यस्माद् गोपनीयस्तस्यान्तरत ऊर्ध्वं सर्वाङ्गुलिनामितानामिकं त्रिपताकलक्षणं करं कृत्वाऽन्येन सह मन्त्र्यते तज्जनान्तिकम् ।

यथा शाकुन्तले—'शकुन्तला—हला ! पेक्ख णलिणी पत्तन्तरिदं वि सहअरं अदेक्खन्ती आदुरा चक्कवाई आरडदि—दुक्करं अहं करोमि त्ति ।'

आकाशभाषितम्—

> किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते ।
> श्रुत्वेवानुक्तमप्यर्थं तस्मादाकाशभाषितम् ।।' इति ।।

अभिनये पात्रं विना जनमन्तरेण अकथितमपि विषयं श्रुत्वेव=श्रवणाभिनयं कृत्वा 'किं ब्रवीषि' इति यद् अभिधीयते तत् आकाशे=शून्ये लक्ष्यपात्राभावात् भाषितम् 'आकाशभाषितम्' स्यात् ।

यथा स्वप्नवासवदत्ते—'चेदी—कुञ्जरिए कुञ्जरिए ! कहिं कहिं ? भट्टिदारिआ पदुमावदी ? किं भणासि 'ऐसा भट्टिदारिआ माहवीलदा मंडवस्स पस्सदो कंदुएण कीलदि'त्ति । जाव भट्टिदारिअं उवसप्पामि ।'

(७७) प्रश्नः—किं नाम श्रव्यं काव्यम् ? कतिविधं च तदिति विलिख्य पद्यस्य स्वरूपं भेदांश्च विशदं विवेचयत ।

उत्तरम्—'श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा ।

> छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।।
> द्वाभ्यां तु युग्मकं सान्दानितकं त्रिभिरिष्यते ।
> कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ।।'

केवलश्रवणयोग्यं श्रव्यं काव्यम् । तच्च श्रव्यं काव्यं द्विप्रकारकं भवति—पद्यमयं गद्यमयं चेति । तत्र—।

छन्दसा बद्धानि=नियन्त्रितानि, पदानि यत्र तथोक्तं काव्यं पद्यम् । तच्च मुक्तेन=समाप्तिबोधकक्रियान्वये पद्यान्तरनिरपेक्षेण एकेन तेन=पद्येन 'मुक्तकम्' ज्ञेयम् । तेनेति अभेदे तृतीया । मुक्तमेव मुक्तकम्, स्वार्थे संज्ञायां वा कन् । एवमग्रेऽपि । समाप्तिबोधकक्रियाऽन्वये परस्परैकवाक्यतापन्नाभ्यां द्वाभ्यां पद्याभ्यां युग्मकम् । समाप्तिबोधकक्रियाऽन्वये परस्परैकवाक्यतापन्नैः त्रिभिः पद्यैः सन्दानं=सम्मेलनमस्य सञ्जातमिति सान्दानितकमिष्यते । अस्यैवान्यत्र 'विशेषकम्' इति, 'तिलकम्' इति च नामान्तरद्वयमुपलभ्यते । समाप्तिबोधकक्रियान्वये परस्परैकवाक्यतापन्नैश्चतुर्भिः पद्यैः कलापकं मतं समाप्तिबोधकक्रियान्वये पञ्चभिस्ततोऽधिकैर्वा कुलकं मतम् ।

उक्तं चाऽन्यत्र—

'द्वाभ्यां युग्मकमिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् ।
कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम् ।।' इति ।।

(७८) प्रश्नः—महाकाव्यस्य लक्षणं सोदाहरणं प्रतिपाद्यताम् । (हि० प्र० यू० १९७८)

उत्तरम्—महाकाव्यम्—सर्गबन्धत्वे सति रसवत्पद्यसमूहविन्यासवत्वं महाकाव्यस्य लक्षणम् ।

तत्रैको देवप्रकृतिको नायको भवति । यथा—शिशुपालवधे कृष्णः, कुमारसम्भवे कार्तिकेयः । अथवा—सद्वंशोद्भवः क्षत्रियो धीरोदात्तो नायको भवति । यथा—नैषधे नलः । क्वचिदेकवंशसमुत्पन्ना बहवोऽपि भूपा नायका भवन्ति । यथा—रघुवंशे दिलीपादयः । शृङ्गारवीरशान्तेषु एकोऽङ्गी रसो भवति । अन्ये च रसा अङ्गानि भवन्ति । यथा—नैषधे शृङ्गारः, शिशुपालवधे वीरः, महाभारते शान्तश्च । क्वचित् करुणेऽपि अङ्गी, यथा—रामायणे ।

इदं हि—इतिहासप्रसिद्धवृत्तान्तं चतुर्वर्गवर्णनयुतं च भवति । धर्मार्थकाममोक्षेषु च तत्रैकं प्रयोजनं मुख्यं भवति । इदं हि सर्वनाटकसन्धिभिर्युक्तं भवेत् । आदौ आशीर्वादः, नमस्कारः, वस्तुनिर्देशो वा निबद्धयते । क्वचित् खलानां निन्दा, सज्जनानां च प्रशंसा क्रियते । अत्र हि नातिस्वल्पाः, नातिदीर्घाः, अष्टाधिकाः सर्गा भवन्ति । ते च एकवृत्तमयैः पद्यैः अन्ते चान्यवृत्तकैर्पद्यैर्युक्ता भवेयुः । क्वापि सर्गः नानावृत्तमयोऽपि दृश्यते । सर्गान्ते च भाविसर्गस्य कथायाः सूचनं भवेत् ।

अत्र सन्ध्यारजनीप्रदोषसूर्येन्दुध्वान्तवासरप्रातर्मध्याह्नमृगयाशैलर्तुवनसागरादीनां वर्णनं क्रियते । अपि च सम्भोगविप्रलम्भौ शृङ्गारौ वीररसप्रधानेऽपि काव्ये वर्णनीयौ । तथा च मुनिः, यज्ञः, सङ्ग्रामः, यात्रा, विवाहः, उपायचतुष्टय-मन्त्रणा, पुत्रादिजन्म, नृपामात्यसेनाप्रभृतिश्च साङ्गोपाङ्गा वर्णनीयाः ।

अस्य महाकाव्यस्य नाम च वर्णनीयचारित्रस्य, कवेर्वा, नायकस्य वा नाम्ना कर्त्तव्यम् । तत्र कविनामकं महाकाव्यम्—माघप्रभृति, वृत्तनामकं महाकाव्यम्—कुमारसम्भवम्, कीचकवधादि, नायकनामकम्—रघुवंशादि । सर्गस्य नाम तु सर्गे वर्णनीयया कथया वक्तव्यम् ।

आर्षेऽस्मिन् महाकाव्ये 'आख्यान'-संज्ञकाः सर्गा भवन्ति। यथा—महाभारतम्। प्राकृतभाषापद्यैर्विनिर्मिते तस्मिन् 'आश्वास'-संज्ञकाः सर्गाः। यथा—सेतुबन्धः। अपभ्रंशभाषानिबद्धे तु 'कुडवक'-संज्ञकाः सर्गा भवन्तीति विज्ञेयम्। यथा—कर्णपराक्रमः।

(७९) प्रश्नः—गद्यकाव्यस्य लक्षणं सोदाहरणं प्रतिपाद्यताम्। तद्भेदांश्च विलिख्य कथाख्यायिकयोः स्वरूपं परस्परं भेदं च निरूपयत। (१९५२, ६४, ७२)।

उत्तरम्—छन्दोंऽशरहितं श्रव्यकाव्यं गद्यम्। तच्च चतुर्विधम्—मुक्तकम्, वृत्तगन्धि, उत्कलिकाप्रायम्, चूर्णकं चेति।

तत्र समासरहितं गद्यं मुक्तकम्, वृत्तस्य = छन्दसः, गन्धेन = भागेन, लवेनेत्यर्थः, युतं गद्यं वृत्तगन्धि, दीर्घसमासयुक्तम् उत्कलिकाप्रायम्, अल्पसमासकं च चूर्णकं विज्ञेयम्।

ननु कथाख्यायिकयोः को भेद इति चेत्? श्रूयताम्–गद्यनिर्मितस्य सरसस्य वस्तुनः 'कथा' इति संज्ञा। तत्र च मध्ये मध्ये क्वचिद् आर्या छन्दः, क्वचिद् वक्त्रापवक्त्र नामकं छन्दः स्यात्। आदौ च नमस्कारश्लोकाः खलादीनां च कीर्तनं कथायां भवति। यथा—कादम्बरी।

गद्यनिर्मितस्य जातिवंशवर्णनसहितस्य सरसस्य वस्तुनो वर्णनम् 'आख्यायिका' इति कथ्यते। अस्याम् अन्यकविनिबद्धानामपि वृत्तानां क्वचित् क्वचित् निवेशः। कथानां व्यवच्छेदको यः स च 'आश्वास'-संज्ञकः स्यात्। आर्याछन्दोभिः केनाप्यपदेशेन आश्वासमुखे भाव्यर्थसूचनं क्रियते। यथा—शिवराजविजयः।

एतेनेदं सिद्धं यद् आश्वासशून्या कथा, आश्वासयुक्ता च आख्यायिका। कथायां स्वनिर्मितपद्यानामेव प्रवेशः। आख्यायिकायां तु अन्यनिर्मितपद्यानामपि, इति विशेषः।

न च पञ्चतन्त्रीयादीनां कथानां का व्यवस्थेति वाच्यम्? कथा द्विविधा—एक विशेषलक्षणयुक्ता, अपरा च—कथ्यते या सा कथा, इति व्युत्पत्तिमात्रशरणा। तत्र गद्यकाव्यलक्ष्यभूता कथा तु कादम्बरी एका। या व्युत्पत्तिनिष्पन्ना कथा सा लोके 'कहानी'-रूपेणोच्यमाना कथैव।

न च आख्यायिकोक्तलक्षणहीनानाम् आख्यायिकापदव्यवहारो न युक्त इति वाच्यम् 'अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः' इति वचनात्, तासामपि आख्यायिकामेव गतार्थत्वात्। अत इदं सिद्धं यदेकं सरसं वस्तु यदि आश्वासादिभेदैः कृतं स्यात्तदा 'आख्यायिका' यदा च आश्वास-हीनं तदा 'कथा' इति।

(८०) प्रश्नः—खण्डकाव्यम्, चम्पूकाव्यम्, विरुदम्, करम्भकम्, एते व्याख्येयाः। (हि० प्र० यू० १९८०, ८१, ८२)

उत्तरम्—खण्डकाव्यम्—खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च।" काव्यस्य अर्थाद् महाकाव्यस्य, एकदेशानुसारिं यत्किञ्चिल्लक्षणहीनम् एकांशानुरूपमित्यर्थः, संस्कृतपद्यैर्निर्मितं काव्यं खण्डकाव्यं भवेत्। यथा—ऋतु-संहार-मेघदूत-चौरपञ्चाशिकादि।

चम्पूकाव्यम्—'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते।' इति।

गद्यपद्योभयात्मकं काव्यं चमत्कृत्य पुनाति सामाजिकानिति चम्पूरिति नाम्ना कविभिः कथ्यते। काव्यं चात्र समग्रलक्षणक्रान्तमेवेति बोध्यम्। कथांश-विच्छेदास्तूच्छ्वासाभिधेया भवन्ति। यथा—देशराजचरितम्।

विरुदम्—'गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते।' इति।

गद्यपद्यात्मकं भूपालगुणकीर्तनं 'विरुदम्' इत्युच्यते। यथा—विरुद-मणिमाला।

करम्भकम्—'करम्भकं तु भाषाभिर्विविधाभिर्विनिर्मितम्।' इति।

अनेकप्रकाराभिर्भाषाभिर्विनिर्मितं काव्यं 'करम्भकम्' इत्यभिधीयते। इति शम्।

॥ इति साहित्यदर्पणालोके षष्ठः परिच्छेदः॥

सप्तमः परिच्छेदः

(८१) प्रश्नः—दोषस्य सामान्यलक्षणमभिधाय, कतिविधश्च सः इति विविच्यताम् (१९४७, ७२, ७६, हि० प्र० यू० १९८०, ८१)

उत्तरम्—'रसापकर्षका दोषाः' इति।

श्रुतिदुष्टापुष्टार्थत्वादयः काणत्वखञ्जत्वादय इव शब्दार्थद्वारेण देहद्वारेण व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात्काव्यस्यात्मभूरसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते। अर्थात् साक्षात् परम्परया रसापकर्षकत्वं दोषत्वमित्यर्थः।

स च द्विविधो नित्योऽनित्यश्च। प्रकारान्तरेणाऽपि समाधातुमशक्यः सचेतसा वा नित्यं हेयो दोषो नित्यः। यथा—च्युतसंस्कारत्वादिः। अनित्यः पुनः क्वचिदुपादेयः, यथा—दुःश्रवत्वादिः। तस्य रौद्रादौ उपादेयत्वात्। शृङ्गारादौ च हेयत्वस्यापि दुःश्रवत्वस्य अप्रयुक्तत्वस्य च रौद्रे श्लेषे वा उपादेयत्वात्।

प्रयोजनवशात् तस्य पञ्च प्रकारा भवन्ति—१. पददोषः, २. पदांशदोषः, ३. वाक्यदोषः, ४. अर्थदोषः, ५. रसदोषश्चेति।

(८२) प्रश्नः—अविमृष्टविधेयांशभावस्य दोषत्वं प्रतिपाद्य उदाहरणे सङ्गमयत।

उत्तरम्—अविमृष्टः=प्राधान्येनानिर्दिष्टः, विधेयांशो यत्र सः, अविमृष्टविधेयांशः। अस्यैव विधेयाविमर्श इति नामान्तरम्। अर्थात् विधेयस्य प्राधान्येनानिर्दिष्टतया गुणीभूतत्वम् अविमृष्टविधेयांशत्वम्। अतो वाक्ये तस्य प्राधान्येन निर्देश एवोचितः। प्राधान्यं च पदार्थानां मध्ये विधेयांशस्योपादेयत्वेन ग्राह्यम्। विधेयांशप्राधान्यस्य विपर्ययः (गुणीभूतत्वम्) च क्वचित् समासेन क्वचिदुद्देश्यविधेयवाचकपदयोः पौर्वापर्यविपर्ययेण। तत्रापि यत्र समासेन प्राधान्यविपर्ययस्तत्र पददोषः। यत्र चोद्देश्यविधेययोः पौर्वापर्यविपर्ययः तत्र वाक्यदोषः। उक्तं च—

'अनुवाद्यमनु .वैव न विधेयमुदीरयेत्।
न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति॥'

अनुवाद्यम्=उद्देश्यम्। तत्र पददोषो यथा—

'स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः।'

अत्र वृथात्वं विधेयम्। तच्च समासे गुणीभावादनुवाद्यत्वप्रतीतिकृत्। अर्थात् अत्र उच्छूनत्वमुद्दिश्य वृथात्वस्य विधेयता उचिता। किन्तु तत्पुरुष-समासे वृथात्वम् उच्छूनत्वे विशेषणीभूतमिति गुणीभूतं सत् विधेयतया न प्रतीयते इति दोष एव। यथा वा—'रक्षांसि पुरः स्थातुमलं रामानुजस्य मे।' अत्र 'रामस्य' इति वाच्यम्। यथा वा 'आसमुद्रक्षितीशानाम्।' अत्र 'आस-मुद्रम्' इति वाच्यम्। यथा वा—'यत्र ते पतति सुभ्रु! कटाक्षः षष्ठबाण इव पञ्चशरस्य।' अत्र षष्ठ इवेत्युत्प्रेक्ष्यम्। यथा वा 'अमुक्ता भवता नाथ मुहूर्तमपि सा पुरा।' अत्र 'अमुक्ता' इत्यत्र नञः प्रसज्यप्रतिषेधत्वमिति विधेयत्वमेवो-चितम्। अत्र सर्वत्र उदाहरणेषु विधेयस्य समासे गुणीभावात् विधेयत्वे-नाऽप्रतीतिरेव दोषः।

वाक्यगतो यथा—'न्यक्कारो ह्ययमेव मे यदरयः।' इत्यादिः। अत्र 'अयमेव मे न्यक्कारः' इति न्यक्कारस्य विधेयत्वं विवक्षितम्। तच्च शब्द-रचनावैपरीत्येन गुणीभूतम्। रचना च पदद्वयस्य विपरीतेति वाक्यदोषः।

(८३) प्रश्नः—'अमुक्ता' इत्यत्र अविमृष्टविधेयांशत्वं प्रतिपा-दयत। (वा० सं० वि० वि० १९४६, ५१, ५८, ६५, ८०)।

उत्तरम्—'अमुक्ता भवता नाथ मुहूर्तमपि सा पुरा।'

अत्र 'अमुक्ता' इत्यत्र नञः प्रसज्यप्रतिषेधत्वमिति विधेयत्वमेवोचितम्।

इदमत्रावधेयम्—नञ् द्विप्रकारको भवति—पर्युदासः प्रसज्यश्चेति। पर्युदासः सदृशस्य ग्राहको भवति; प्रसज्यस्तु निषेधकः। उक्तं च—

'द्वौ नञौ समाख्यातौ पर्युदासः प्रसज्यकौ।
पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्॥'

यथा—'अब्राह्मणमानय' इत्यत्र अब्राह्मणपदेन ब्राह्मणजातिभिन्नः किन्तु तत्सदृश एव कोऽपि क्षत्रियादिः गृह्यते न तु लोष्टादिकम्। अतः 'अब्राह्मणम्' इत्यत्र नञ् पर्युदासोऽस्ति। प्रसज्यप्रतिषेधस्तु तत्र भवति यत्र साक्षात् निषेधः क्रियते। यथा—'न गच्छेज्जैनमन्दिरम्' इति। प्रसज्यप्रतिषेधे नञः क्रिययैव सह सम्बन्धो भवति। निषेध एव तत्र प्रधानतया प्रतीयते। स एव विधेयो भवति। अतोऽस्यान्यैः पदैः सह समासो न जायते। एवम्—'अमुक्ता' इत्यत्रापि निषेध एव विधेयोऽस्ति, अतोऽत्रापि नञा सह समासो न भवितव्यः। समासे तु नञः पर्युदासतया निषेधस्य विधेयतयाऽनवगमः। अत्रोऽत्र अविमृष्टविधे-यांशदोषः स्फुट एव। यदाहुः—

'अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥'

यथा—'नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः ।'

'अमुक्ता' इत्यत्र तु तत्पुरुषसमासे गुणीभावे नञः पर्युदासतया निषेधस्य विधेयतयाऽनवगमः ।

'प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥'

तेन—'जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ॥'

अत्राऽत्रस्तत्वाऽनातुरत्वाऽगृध्नुत्वाऽसक्तत्वानि अनूद्य आत्मगोपनधर्मसेवनाऽर्थादानसुखानुभवा विधेयत्वेनोक्ता इति नञः पर्युदासतया गुणीभावो युक्तः ।

ननु 'अश्राद्धभोजी ब्राह्मणः', 'असूर्यम्पश्या राजदारा' इत्यादिवत् 'अमुक्ता' इत्यत्रापि प्रसज्यप्रतिषेधो भवतीति चेत् ? न । अत्रापि यदि भोजनदर्शनरूपक्रियांशेन नञः सम्बन्धः स्यात् तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यम् । न च तथा 'प्रधानेन हि सम्बन्धाः', 'गुणानां च परार्थत्वादसम्बन्धः', इति नियमेन कर्त्रा (प्रत्ययार्थेन) सह नञः सम्बन्धो भवति यतः स एव प्रधानम्, 'प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थः प्रधानम्' इति नियमात् ।

'अश्राद्धभोजी' इत्यत्र 'असूर्यम्पश्या' इत्यत्र च प्रत्ययार्थत्वात् कर्ता प्रधानम् । यदाहुः—

'श्राद्धभोजनशीलो हि यतः कर्त्ता प्रतीयते ।
न तद्भोजनमात्रं तु कर्तरीनेर्विधानतः ॥' इति ॥

अत्र 'अश्राद्धभोजी' इति पदेन श्राद्धभोजनशीलः कर्ता प्रतीयते न तु भोजनमात्रम् । यतो हि अत्र 'सुप्यजातौ णिनिस्ताच्छील्ये' (३।२।७८) इति सूत्रेण ताच्छील्यार्थको णिनिः प्रत्ययः कर्तरि भवति । अतोऽत्र कर्त्रा सहैव नञः सम्बन्धात् न कोऽपि दोषः । 'अमुक्ता' इत्यत्र तु क्रिययैव सह सम्बन्ध इति दोष एवेति दिक् ।

(८४) प्रश्नः— यत्-तत्-शब्दस्थले अविमृष्टविधेयांशभावव्यवस्थां वर्णयत (१९४५, ५९, ६८ ई०)

उत्तरम्—'आनन्दयति ते नेत्रे योऽसौ सुभ्रु समागतः ।'

इत्यादिषु 'यत्तदोर्नित्यसम्बन्धः' इति न्यायादुपक्रान्तस्य यच्छब्दस्य निराकाङ्क्षत्वप्रतिपत्तये तच्छब्दसमानार्थतया प्रतिपाद्यमाना इदमेतददःशब्दा विधेया एव भवितुं युक्ताः। 'आनन्दयति—' इत्युदाहरणे 'योऽसौ' इत्यत्र तु यच्छब्दनिकटस्थतया अनुवाद्यत्वप्रतीतिकृत् अदः शब्दः। अतोऽत्राऽविमृष्टविधेयांशो दोषः।

तच्छब्दस्यापि (तच्छब्दोऽयम् इदमेतच्छब्दयोरप्युपलक्षणम्) यच्छब्दनिकटस्थितस्य प्रसिद्धपरामर्शित्वमात्रम्=केवलप्रसिद्धार्थबोधकत्वमेव, न तु विधेयत्वबोधनेन निराकाङ्क्षत्वप्रतिपादकत्वम्।

तदुक्तम्—

'ख्यातमनुभूतार्थं प्रक्रान्तार्थं च तत्पदम्।
यत्पदापेक्षया हीनं न विधेयत्वबोधकृत्॥' इति॥
यः स ते नयनानन्दकरः, सुभ्रू ! स आगतः।

यत्र यच्छब्दसमीपस्थितस्य स इत्यस्य प्रसिद्धार्थबोधकत्वम्'।

यच्छब्दव्यवधाने स्थितास्तु इदमेतददःशब्दा यच्छब्दस्य निराकाङ्क्षत्वमवगमयन्ति। अतस्तत्र न दोषः। यथा—

'आनन्दयति ते नेत्रे योऽधुनाऽसौ समागतः'।'

एवमिदमादिशब्दोपादानेऽपि। यत्र च यत्तदोरेकस्यार्थत्वं सम्भवति। तत्रैकस्योपादानेऽपि निराकाङ्क्षत्वप्रतीतिरिति न दोषः। तथाहि—यच्छब्दस्योत्तरवाक्यगतत्वेनोपादाने सामर्थ्यात् पूर्ववाक्ये तच्छब्दस्यार्थत्वम्। यथा—

'आत्मा जानाति यत्पापम्।'

एवम्—

'यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम्॥'

इत्यत्र उत्तरवाक्ये यच्छब्दस्यावस्थानात् 'अस्त्युत्तरस्यां दिशि देवतात्मा' इति पूर्ववाक्ये 'सः अस्ति' इति तच्छब्दस्यार्थत्वम्।

तच्छब्दस्य प्रक्रान्तप्रसिद्धानुभूतार्थत्वे तच्छब्दस्यार्थत्वम्।

तत्र तच्छब्दस्य प्रक्रान्तार्थवाचित्वे यथा—

'स हत्वा बालिनं वीरस्तत्पदे चिरकाङ्क्षिते।
धातोः स्थान इवादेशं सुग्रीवं सन्न्यवेशयत्॥'

अत्र 'स' इति तच्छब्दः प्रक्रान्तरामरूपार्थवाचित्वात् यच्छब्दोपादानं नापेक्षते। एवञ्च प्रक्रान्तार्थकेन तच्छब्देन 'यः सुग्रीवप्रियकारी' इति यच्छब्दाक्षेपादन्वयबोध इति।

प्रसिद्धार्थत्वे यथा—

'स वः शशिकलामौलिस्तादात्म्यायोपकल्पताम्।'

अत्र 'सः' इति तच्छब्दः प्रसिद्धार्थवाचित्वात् यच्छब्दाक्षेपात् तदन्वयबोध इति यच्छब्दं नोपेक्षते।

अनुभूतार्थत्वे यथा—

'तामिन्दुसुन्दरमुखीं हृदि चिन्तयामि।'

अत्र तामिति तच्छब्दस्य स्वयमनुभूतार्थवाचित्वात् न यच्छब्दमपेक्षते।

समानलिङ्गविभक्तिका एव यच्छब्दनिकटस्थिताः तदादिशब्दाः प्रसिद्धपरामर्शकत्वेन दोषाधायकाः, बिभिन्नलिङ्गविभक्तिकानां तु निकटस्थितानामपि निराकाङ्क्षत्वप्रत्यायकतया अदोषत्वम्।

तत्र भिन्नलिङ्गत्वे यथा—

'विभाति मृगशावाक्षी येदं भुवनभूषणम्।'

अत्र यच्छब्दः स्त्रीलिङ्गः, इदं शब्दः नपुंसकलिङ्गः, इति भिन्नलिङ्गत्वेन इदं शब्दः 'या' इत्यस्याकाङ्क्षां निवर्तयतीति न दोषः।

विभिन्नविभक्तिकत्वे यथा—

'इन्दुर्विभाति यस्तेन दग्धाः पथिकयोषितः।'

अत्र यच्छब्दः प्रथमान्तः तन्निकटस्थितोऽपि तच्छब्दः तृतीयान्त इति निराकाङ्क्षत्वप्रत्यायकतया न दोषाय।

क्वचिद् द्वयोरनुपादानेऽपि सामर्थ्याद् द्वयोरपि अवगमः। यथा—

'न मे शमयिता कोऽपि भारस्येत्युर्वि मा शुचः।
नन्दस्य भवने कोऽपि बालोऽस्त्यद्भुतपौरुषः॥'

अत्र यः नन्दस्य भवने अद्भुतपौरुषः बालः अस्ति स ते भारस्य शमयितेति बुध्यते। अत्र यत्तदोः द्वयोरप्यार्थत्वम्।

ननु 'यद् यद् विरहदुःखं मे तत्को वाऽपहरिष्यति।' इत्यत्र पूर्ववाक्ये 'यद्-यद्' इति पदद्वयम्, उत्तरवाक्ये चैकं तत्पदमित्येकस्य यच्छब्दस्य साकाङ्क्षत्वमिति चेत्? न। तथाहि—अत्र 'यद् यद्' इत्यनेन सामान्येन सर्वात्मकं विरहदुःखं विवक्षितम्, तथाभूतस्य तस्य तच्छब्देन परामर्शः।

इत्थं यत्र समानलिङ्गविभक्तिभ्याम् अव्यवधानेन स्थितौ यत्तच्छब्दौ तत्र तदादिशब्दानां प्रसिद्धपरामर्शित्वात् साकाङ्क्षतया दोषत्वम् । यथोक्तोदाहरणेषु इति दिक् ।

(८५) प्रश्नः—'गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः' इत्यत्र पदपदांशदोषो वेति विविच्यताम् । (वा० सं० का० या० २४९, ५२, ६१, ६४, हि० प्र० यू० १९७८, ८० ई०)

उत्तरम्—'गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः ।'

'आङो यमहनः' (१।३।२८), 'स्वाङ्गकर्मकाच्च' इत्यनुशासनबलाद् आङ्पूर्वस्य हनः स्वाङ्गकर्मकस्यैवात्मनेपदं नियमितम् । इह तु तल्लङ्घितमिति व्याकरणलक्षणहीनत्वात् च्युतसंस्कारत्वम् ।

नन्वत्र 'आजघ्ने' इति पदस्य स्वतो न दुष्टता अपि तु 'विषमविलोचनस्य वक्षः' इति पराङ्गवाचकपदान्तराकाङ्क्षयैवेति वाक्यघटकाऽनेकपदप्रयोज्यत्वादस्य वाक्यदोषतेति चेत् ? मैवम् । तथाहि—गुणदोषालङ्काराणां शब्दार्थगतत्वेन व्यवस्थितेस्तदन्वयव्यतिरेकाऽनुविधायित्वं हेतुः । इह तु दोषस्य 'आजघ्ने' इति पदमात्रस्यैवाऽन्वयव्यतिरेकाऽनुविधायित्वम् । पदान्तराणां परिवर्तनेऽपि अर्थात् 'विषमविलोचनस्य वक्षः' इत्यस्य स्थाने 'त्रिनेत्रस्योरः' इति पाठे कृतेऽपि, तस्य च्युतसंस्कारतादोषस्य तादवस्थ्यादिति पददोष एवायं न पुनर्वाक्यदोषः ।

अपि च यथेहात्मनेपदस्य परिवृत्तौ 'आजघ्ने' इत्यस्य स्थाने आत्मनेपदं विहाय 'आजघान' इति परस्मैपदपाठे कृतेऽपि न दोषः, तथा हन्प्रकृतेरपि परिवृत्तौ 'आजघ्ने' इत्यस्य स्थाने 'प्रजहार' इति कृतेऽपि न दोषः । प्रकृतिप्रत्ययमेलनेन दोषत्वात् पददोष एवायं न पदांशदोषः ।

अयमभिप्रायः—अत्र हि दोषस्य प्रकृतिपत्यययोरुभयोरेवाऽन्वयव्यतिरेकाऽनुविधायित्वात् प्रकृतिप्रत्ययोभयांशस्यैव च पदरूपत्वात् पददोष एवायमिति मर्वमवदातम् ।

(८६) प्रश्नः—अभवन्मतसम्बन्धस्य दोषस्य स्वरूपमुदाहरणद्वारा स्फोटनीयम् ।

उत्तरम्—अभवन्=अनुपपद्यमानः, मतः=अभिलषितः, सम्बन्धः=अन्वयो यत्र सः अभवन्मतसम्बन्धः। पदविशेषस्य इष्टान्वयाऽनुपपत्तिमद्वाक्यत्वम् अभवन्मतसम्बन्धत्वम्। अभवन्मतसम्बन्धत्वं च क्वचिद् विभक्तिभेदनिबन्धनम्, क्वचिन्न्यूनतादिनिबन्धनम्, क्वचित्समासाच्छन्नतयाभिमतसम्बन्धाभावनिबन्धनञ्च।

तत्राद्यमुदाहरति—

'या जयश्रीर्मनोजस्य यया जगदलङ्कृतम्।
यामेणाक्षीं विना प्राणा विफला मे कुतोऽद्य सा॥'

अत्र यच्छब्दनिर्दिष्टानां वाक्यानां परस्परनिरपेक्षत्वात् तदेकान्तःपातिना=तेषु वाक्येषु मध्ये एकस्य वाक्यस्य, अन्तःपातिना=अन्तर्भूतेन एणाक्षीशब्देन अन्येषां वाक्यानां सम्बन्धः कवेरभिमतो नोपपद्यते एव।'

'यां विनाऽमी वृथा प्राणा विफला मे कुतोऽद्य सा।'

इति तच्छब्दनिर्दिष्टवाक्यान्तःपातित्वे तु यच्छब्दनिर्दिष्टवाक्यैः सम्बन्धो घटते।

न्यूनतादिनिबन्धनं यथा—

'ईक्षसे यत्कटाक्षेण तदा धन्वी मनोभवः।'

अत्र यदित्यस्य तदेत्यनेन सम्बन्धो विवक्षितः स च न सम्भवति। तच्छब्दस्य प्रथमान्तत्वात् कालार्थकसप्तम्यन्तेन 'तदा' इत्यनेन सह भिन्नविभक्तिकत्वात् तत्सम्बन्धो न घटते इति भावः। 'ईक्षसे चेत्' इति युक्तः पाठः। चेदित्यस्य यद्यर्थकत्वेनान्वयलाभस्य सुलभत्वात्।

समासाच्छन्नतयाऽभिमतसम्बन्धाभावनिबन्धनं यथा—

'ज्योत्स्नाचयः पयःपूरस्तारकाः कैरवाणि च।
राजति व्योमकासारराजहंसः सुधाकरः॥'

अत्र व्योमकासारशब्दस्य राजहंसशब्देन सह समासे गुणीभावात् तदर्थस्य न सर्वैः संयोगः।

विधेयाविमर्शे यदेवाऽविमृष्टं तदेव दुष्टम्। इह तु प्रधानस्य कासारपदार्थस्य प्राधान्येनाऽप्रतीते सर्वोऽपि पयःपूरादिपदार्थः तदङ्गतया न प्रतीयते इति सर्वेषां वाक्यानामर्थस्य विरोधावभासः=निराकाङ्क्षत्वेन प्रतीतिरित्यर्थः, इत्युभयोर्भेदः।

काव्यप्रकाशकारादिभ्यः स्वविमतिमुदाहरणद्वारा दर्शयति—

'अनेन च्छिन्दता मातुः कण्ठं परशुना तव ।
बद्धस्पर्द्धः कृपाणोऽयं लज्जते मम भार्गव ॥'

अत्र भार्गवनिन्दायां प्रयुक्तस्य मातृकण्ठच्छेदनकर्तृत्वस्य अचेतनेन परशुना सह सम्बन्धो न युक्तः । अर्थात् कवेरभिलषितो परशौ कर्तृत्वसम्बन्धोऽचेतनत्वात् न घटते, इत्यभवन्मतसम्बन्धत्वदोष इति प्राञ्च्याः ।

परशोः निन्दाद्वारा भार्गवस्याधिकनिन्दा (कर्त्री) वैदग्ध्यं = कविरचना-नैपुण्यमेव द्योतयतीत्याधुनिकाः ।

(८७) प्रश्नः—भग्नप्रक्रमदोषस्य स्वरूपं भेदांश्च सोदाहरणं निरूपयत । (वा० सं० वि० वि० १९५५, ५८, ६३, हि० प्र० वि० वि० ६८, ७२, ७५ ई०) ।

उत्तरम्—भग्नप्रक्रमता – भग्नः = विच्छिन्नः, प्रक्रमः = प्रस्तावः, उपक्रमः, यत्र वाक्ये तस्य भावः, सा तथोक्ता भग्नप्रक्रमता । एवञ्च 'येन रूपेणोपक्रमः, तेनैवोपसंहारः' इति नियमस्य भङ्गो भग्नप्रक्रमत्वमिति । अयमेव दोषः प्रक्रमभङ्ग इति नाम्ना व्यपदिश्यते । भग्नप्रक्रमत्वं च प्रकृतिपर्यायादिविषयत्वादनेकधा ।

तत्र धातुरूपप्रकृतेर्भग्नप्रक्रमत्वं यथा—

'एवमुक्तो मन्त्रिमुख्यैः रावणः प्रत्यभाषत ।'

अत्र वचधातुना प्रक्रान्तं प्रतिवचनमपि तेनैव वक्तुमुचितम् । तेन 'रावणः प्रत्यवोचत' इति पाठो युक्तः । एवं सति न कथितपदत्वदोषः । तस्योद्देश्यप्रतिनिर्देशव्यतिरिक्तविषयत्वात् । यथा—

'उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।
सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥'

इत्यत्र हि यदि पदान्तरेण = रक्तशब्देन, स एव = ताम्ररूप एवार्थः, प्रतिपाद्यते तदान्योऽर्थ इव प्रतिभासमानः, प्रतीतिम् = ऐक्यज्ञानम्, स्थगयति = तिरोधत्ते ।

'एवमुक्तो मन्त्रिमुख्यैः रावणः प्रत्यवोचत' इत्यत्र तु वचनप्रतिवचनयोरुद्देश्यप्रतिनिर्देशत्वम् ।

प्रातिपदिकात्मकसर्वनामप्रकृतेः भग्नप्रक्रमत्वं यथा—

'ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम् ।
सिद्धं चाऽस्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥'

अत्र 'अस्मै' इतीदमाप्रक्रान्तस्य तेनैव तत्समानाभ्यामतदद.शब्दाभ्यां वा परामर्शो युक्तो न तु 'तद्विसृष्टाः' इत्यत्र पठितेन तच्छब्देन ।

पर्यायस्य भग्नप्रक्रमत्वं यथा—

'उदन्वच्छिन्ना भूः स च पतिरपां योजनशतम् ।'

अत्र 'मिता भूः पत्यापां स च पतिरपां योजनशतम्' इति युक्तः पाठः ।

प्रत्ययस्य प्रत्ययभेदेन भग्नप्रक्रमत्वं यथा—

'यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसङ्ख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥'

अत्र तुमुन् प्रत्ययस्य 'लिप्सया' इति सन् प्रत्ययस्योपादानात् प्रत्ययभेदेन भग्नप्रक्रमत्वम् । अतः 'सुखलिप्सया' इत्यस्य स्थाने 'सुखमीहितुम्' इति वक्तुमुचितम् । एवं कारकोपसर्गवचनादिष्वपि ज्ञेयम् ।

(८८) प्रश्नः—नियमपरिवृत्ति-वाच्यानभिधानयोः को भेदः ? इति विविच्य लिखत । (रा० सं० का० वा० १९४४, ५८, ६३, ७४ ई०)

उत्तरम्—नियमः=निश्चयः, तेन वक्तव्ये, अनियमेनाभिधानं नियमे अनियमः, नियमपरिवृत्तिर्दोष इत्यर्थः । यथा—

'आपातसुरसे भोगे निमग्नाः किन्न कुर्वते ।'

अत्र 'आपाते एव सुरसे' इति नियमो वाच्यः ।

ननु वाच्यस्यानभिधाने 'व्यतिक्रमलवं कं मे वीक्ष्य वामाक्षि कुप्यसि ?' इत्यत्र 'व्यतिक्रमलवमपि' इत्यपरेभाव 'आपातसुरसे भोगे निमग्नाः किन्न कुर्वते' इत्यत्र चैवकारस्येति कोऽनयोर्भेदः ?

अत्राह—नियमस्य वचनमेव पृथग्भूतं नियमपरिवृत्तेर्विषयः' इति । तन्न । तथा सत्यपि द्वयोः शब्दार्थदोषतायां नियामकाभावात् । एवं वाच्यानभिधानस्य शब्ददोषत्वे नियमानियमदोषस्य चार्थदोषत्वे नियामको न भविष्यति ।

तत् का गतिरिति चेत् ? शृणु—'व्यतिक्रमलवं कं मे वीक्ष्य' इत्यादौ शब्दोच्चारणानन्तरमेव दोषप्रतिभासः । इह त्वर्थप्रत्ययानन्तरमिति भेदः ।

एवं च शब्दपरिवृत्तिसहत्वासहत्वाभ्यां पूर्वैरादृतोऽपि शब्दार्थदोषविभाग एवं पर्यवस्यति—यो दोषः शब्दपरिवृत्त्यसहः स शब्ददोष एव । यश्च पदार्थान्वयप्रतीतिपूर्वबोध्य सोऽपि शब्ददोषः किन्तु योऽर्थप्रतीत्यनन्तरं बोध्यः सोऽर्थदोषः ।

एवं चाधिकपदत्वस्य शब्ददोषत्वम्, अनियमे नियमरूपाया नियमपरिवृत्तेस्तु अर्थदोषत्वमिति ।

(८९) प्रश्नः—रसदोषाः सोदाहरणं स्फुटीक्रियन्ताम् । (वा० सं० का० वा० १९४७, १९४९, ६४) ।

उत्तरम्—ये साक्षाद्रसमपकर्षयन्ति ते रसदोषाः । साक्षाद्रसापकर्षकत्वं रसदोषत्वमिति भावः । अत्र रसशब्दो रसाभासादीनामप्युपलक्षणम् । ते च रसदोषाः चतुर्दश भवन्ति । उक्तं च साहित्यदर्पणे—

'रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि ॥
परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः ।
आक्षेपः कल्पितः कृच्छ्रादनुभावविभावयोः ॥
अकाण्डे प्रथनच्छेदौ तथा दीप्तिः पुनः पुनः ।
अङ्गिनोऽननुसन्धानमनङ्गस्य च कीर्तनम् ॥
अतिविस्तृतिरङ्गस्य प्रकृतीनां विपर्ययः ।
अर्थानौचित्यमन्यच्च दोषा रसगता मताः ॥'

१. रसस्य स्वशब्दो रसशब्दः शृङ्गारादिशब्दश्च ।

तत्र रसस्य सामान्यतो रसशब्देन वाच्यत्वं दोषो यथा—

'तामुद्वीक्ष्य कुरङ्गाक्षीं रसो न कोऽप्यजायत ।'

अत्र द्वितीयपादे रसशब्दोपादानात् रसस्य सामान्यतः स्वशब्दवाच्यतादोषः । रसस्य विशेषतः शृङ्गारशब्देन वाच्यत्वं दोषो यथा—

'चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम् ।'

अत्र रसस्य विशेषतः शृङ्गारशब्दोपादानात् स्वशब्दवाच्यत्वं दोषः ।

२. स्थायिभावस्य स्वशब्दवाच्यत्वं यथा—

'अजायत रतिस्तस्यास्त्वयि लोचनगोचरे' ।

अत्र रतिशब्दोपादानात् शृङ्गारस्थायिभावस्य स्वशब्दवाच्यत्वं दोषः ।

३. व्यभिचारिभावस्य स्वशब्दवाच्यत्वं यथा—

'जाता लज्जावती मुग्धा प्रियस्य परिचुम्बने ।'

अत्र लज्जाशब्दोपादानात् व्यभिचारिभावस्य स्वशब्दवाच्यत्वं दोषः ।

४. परिपन्थिरसाङ्गविभावपरिग्रहो यथा—

'मानं मा कुरु तन्वङ्गि ज्ञात्वा यौवनमस्थिरम् ।'

अत्र यौवनाऽस्थैर्यनिर्वेदनं शृङ्गाररसस्य परिपन्थिनः शान्तरसस्याङ्गं शान्तस्यैव च विभाव इति शृङ्गारे तत्परिग्रहो न युक्तः, दोष एवेत्यर्थः ।

५. कष्टाक्षिप्तानुभावत्वं दोषो यथा—

'धवलयति शिशिररोचिषि लोकलोचनानन्दे ।
ईषत्क्षिप्तकटाक्षा स्मेरमुखी सा निरीक्ष्यतां तन्वी ॥'

अत्र रसस्यालम्बनोद्दीपनविभावौ अनुभावपर्यवसायिनौ (अनुभावं नायककर्तृकनायिकानिरीक्षणजन्यमानभङ्गसनाथीकृताह्लादं पर्यवसायतः=प्रकरणाद्यनुसन्धानानन्तरं विलम्बेन बोधयत इत्यनुभावपर्यवसायिनौ) स्थिताविति कष्टकल्पना ।

६. कष्टाक्षिप्तविभावत्वं यथा—

'परिहरति रतिं मतिं लुनीते स्खलतितरां परिवर्तते च भूयः ।
इति बत विषमा दशाऽस्य देहं परिभवति प्रसभं किमत्र कुर्मः ॥'

अत्र रतिपरिहारादीनाम् अनुभावानां करुणादावपि सम्भवात् कामिनीरूपो विभावः कृच्छ्रादाक्षेप्यः ।

७. अकाण्डे रसप्रथनं यथा—वेणीसंहारे द्वितीयाङ्के प्रवर्तमानाऽनेकवीरसंक्षये काले दुर्योधनस्य भानुमत्या सह शृङ्गारप्रथनम् ।

८—अकाण्डे रसच्छेदो यथा—वीरचरिते राघवभार्गवयोः धाराधिरूढेऽन्योऽन्यसंरम्भे कङ्कणमोचनाय गच्छामीति राघवस्योक्तिः ।

९—पुनः पुनः रसोद्दीप्तिर्यथा—कुमारसम्भवे रतिविलापे ।

१०. अङ्गिनोऽननुसन्धानं यथा—रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सागरिकाया विस्मृतिः ।

११. अनङ्गस्य कीर्तनं यथा—कर्पूरमञ्जर्यां राजनायिकयोः स्वयङ्कृतं वसन्तस्य वर्णनमनादृत्य वन्दिवर्णितस्य प्रशंसनम् ।

१२. अङ्गस्यातिविस्तृतिर्यथा—किराते सुराङ्गनाविलासादिः ।

१३. प्रकृतिविपर्ययमुदाहर्तुमाह—प्रकृतयो दिव्या अदिव्या दिव्याऽदिव्याश्च तेषां धीरोदात्तादिता । तेषामप्युत्तमाधममध्यमत्वम् । तेषु च यो यथाभूतस्तस्यायथावर्णने प्रकृतिविपर्ययो दोषः । यथा —धीरोदात्तस्य रामस्य धीरोद्धतवच्छद्मना बालिवधः । यथा वा—कुमारसम्भवे उत्तमदेवतयोः पार्वतीपरमेश्वरयोः सम्भोगशृङ्गारवर्णनम् । 'इदं पित्रोः सम्भोगवर्णनमिवाऽत्यन्तमनुचितम्' इति काव्यप्रकाशकारा आहुः ।

१४. अन्यदनौचित्यं देशकालादीनामन्यथा यद् वर्णनम् । तथा सति हि काव्यस्याऽसत्यताप्रतिभासेन विनेयानामुन्मुखीकाराऽसम्भवः ।

(९०) प्रश्नः—रसानां परस्परविरोधस्य परिहारः सङ्क्षेपेण निरूपणीयः ।

'विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा ।
भवेद्विरोधो नाऽन्योऽन्यमङ्गिन्यङ्गत्वमाप्तयोः ॥'

इत्येषा कारिका सोदाहरणं वैशद्येन व्याख्येया ।

(वा० सं० वि० वि० १९४८, ५५, ५८, ६८ ई०)

उत्तरम्—'विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा ।
भवेद्विरोधो नाऽन्योऽन्यमङ्गिन्यङ्गत्वमाप्तयोः ॥'

अर्थाद् विरुद्धस्य रसस्य भावस्य वा स्मरणे=व्यञ्जनयावबोधे, सादृश्येन कथने वा, यद्वाङ्गिनि कस्मिंश्चिद्रसे भावादौ वा मुख्यत्वेन स्थिते सति तस्य अङ्गत्वं लब्धयोः कयोश्चिद् विरोधिनो रसयोः मिथो विरोधो नाम दोषो न भवेदित्यर्थः । आप्तयोरिति द्विवचनं बहूनामुपलक्षणम् ।

विरोधिनः स्मरणे विरोधाभावो यथा—

'अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः ॥'

अत्र आलम्बनस्य नायकस्य विच्छेदे=मरणे जाते सति रतेरसात्मतया स्मर्यमाणानां तदङ्गानां=रत्यङ्गानाम्, अनुभावानां रसनोत्कर्षणादीनां शोकोद्दीपकतया करुणाऽनुकूलता । एवं स्मर्यमाणस्य शृङ्गारस्य अङ्गतया (करुणपोषकतया) अनुभूयमानेन करुणेन सह न विरोधः ।

विरोधिनः साम्येन वचने विरोधाभावो यथा—

'सरागया स्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया ।
मुहुर्मुहुर्दशनविलङ्घितोष्ठया रुषा नृपाः प्रियतमयेव भेजिरे ॥'

अत्र सम्भोगशृङ्गारो वर्णनीयवीरव्यभिचारिणः क्रोधस्य अनुभावस्य साम्येन=सादृश्येन, विवक्षितः कविना । अतो न दोषः ।

एकस्मिन्नङ्गिनि भावे अङ्गत्वमाप्तानां रसानां मिथो विरोधाभावो यथा—

'एकं ध्याननिमीलनान्मुकुलितप्रायं द्वितीयं पुनः,
पार्वत्या वदनाम्बुजस्तनभरे सम्भोगभावालसम् ।

अन्यद् दूरविकृष्टचापमदनक्रोधानलोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥'

अत्र भगवद्विषयकरतिभावे कवेस्तात्पर्यात् स एव प्रधानम् । शान्तशृङ्गार-रौद्ररसास्तत्राङ्गतां प्राप्ता इति स्वभावतो विरुद्धानामपि अङ्गभूतानां शान्तादीनां सम्भाव्यमानो मिथो विरोधो मिथः सम्बन्धाभावान्न सम्पद्यत इति न दोषः । यथा वा—

'क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतीभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥'

अत्र कविनिष्ठा भगवद्विषया रतिः प्रधानम् । तस्याः परिपोषकतया भगवतस्त्रिपुरध्वंसं प्रति उत्साहस्यापरिपुष्टतया रसपदवीं (वीररसत्वम्) । अप्राप्ततया केवलस्थायिभावरूपेण विद्यमानस्य करुणोऽङ्गम् । तस्य च करुणस्य कामी वेति साम्यबलाद् आयातः=स्मृतिविषयतां प्राप्तः ईर्ष्यामानाख्यविप्रलम्भ-शृङ्गारोऽङ्गम् । एवञ्च करुणस्यापि अन्तिमास्वादस्य अविषयत्वाद् (अविश्रान्तिधामतया) उत्साहाङ्गतयैवेति द्वयोरपि करुणशृङ्गारयोः भगवदुत्साह-परिपुष्टतद्विषयकरतिभावास्वादप्रकर्षकतया यौगपद्यसद्भावादङ्गत्वेन न विरोधः ।

(९१) प्रश्नः—समूहालम्बनात्मकस्य पूर्णघनानन्दरूपस्य रसस्य तादृशेनेतररसेन कथं परस्परं विरोधः सम्भावनीयः ? इति सयुक्तिकं विवेचयत । (वा० सं० वि० वि० १९४२, ४८, ५७ ई०)

उत्तरम्—ननु समूहालम्बनात्मकस्य पूर्णघनानन्दरूपस्य रसस्य तादृशेनैवेतररसेन कथं परस्परं विरोधः सम्भावनीयः ? यतो हि एकस्मिन् वाक्ये व्यञ्जकतासम्बन्धेन निवेश(वृत्ति-)प्रादुर्भावयौगपद्यं यदि स्यात्तदैव परस्परोपमर्दकतया विरोधः सम्भवेत्, अथवा अङ्गाङ्गिभावे विरोधः सम्भवेत् । तच्च नास्ति । एकस्मिन् वाक्ये निवेशप्रादुर्भावयौगपद्याभावात् । क्रमेण द्वयोः प्रतीतेः । सत्यनाप्यङ्गाङ्गिभावः । द्वयोरपि पूर्णतया स्वातन्त्र्येण विश्रान्तेरिति चेत् । सत्य-मुक्तम् । अत एवात्र==अनेकरसानामेकत्र वृत्तिविषये प्रधानो हि रसो वाक्यार्थाकाङ्क्षापूर्तिपर्यन्तस्थायी भवति, अप्रधानस्तु वाक्यार्थाकाङ्क्षापूर्तिपूर्वमेव विश्रान्तः । तथा च प्रधानेतरेषु रसेषु स्वातन्त्र्यविश्रामराहित्याद् पूर्णरसभाव-

मात्राच्च विलक्षणतया सञ्चारिरसनाम्ना व्यपदेशः प्राच्यानाम् । मुख्यरसस्योपकाराय सञ्चरणात् सञ्चारिरस इति व्यवह्रियते प्राचीनैः । चण्डीदासपादैस्तु खण्डरसनाम्ना व्यवहारः कृतः । यदाहुः—

'अङ्ग बाध्योऽथ संसर्गी यद्यङ्गी स्याद्रसान्तरे ।
नास्वाद्यते समग्रं तत्तत: खण्डरसः स्मृतः ॥' इति ॥

(९२) प्रश्नः—रसानां विरोधप्रकाराः के ? तत्समावेशश्च एकस्मिन् पद्ये कया कर्तुं युक्तया शक्यत इति लिखत ।

उत्तरम्—ननु 'आद्यः करुणरौद्रवीरभयानकैः' इत्युक्तनयेन विरोधिनोर्वीरशृङ्गारयोः कथमेकत्र—

'कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोड्डमरपुलकं वक्त्रकमलम् ।
मुहुः पश्यन् शृण्वन् रजनिचरसेनाकलकलं
जटाजूटग्रन्थि द्रढयति रघूणां परिवृढः ॥'

इत्यादौ समावेशः ?

अत्रोच्यते—इह=एवं मीमांसाव्यतिकरसमये, खलु रसानां विरोधिताया अविरोधितायाश्च त्रिधा व्यवस्था—(१) कयोश्चिदालम्बनैक्येन, (२) कयोश्चिदाश्रयैक्येन, (३) कयोश्चिन्नैरन्तर्येण । तत्र वीरशृङ्गारयोरालम्बनैक्येन विरोधः । तथा=आलम्बनैक्येनैव हास्यरौद्रवीभत्सैः सम्भोगशृङ्गारस्य, वीरकरुणरौद्रभयानकवीभत्सैः विप्रलम्भशृङ्गारस्य । आलम्बनैक्येन आश्रयैक्येन च वीरभयानकयोः । नैरन्तर्यविभावैक्याभ्यां शान्तशृङ्गारयोः । त्रिधाऽप्यविरोधो वीरस्याद्भुतरौद्राभ्याम्, शृङ्गारस्य अद्भुतेन, भयानकस्य वीभत्सेनेति ।

तेनाऽत्र 'कपोले जानक्याः' इत्यस्मिन् पद्ये वीरशृङ्गारयोः भिन्नालम्बनत्वान्न विरोधः । एवं च वीरस्य नायकनिष्ठत्वेन भयानकस्य प्रतिनायकनिष्ठत्वेन निबन्धे भिन्नाश्रयत्वेन न विरोधः । यच्च नागानन्दे प्रशमाश्रयस्यापि जीमूतवाहनस्य मलयवत्यनुरागो दर्शितः, तत्र 'अहो गीतमहो वादित्रम्' इत्यद्भुतस्यान्तरा निवेशनान्नैरन्तर्याभावान्न शान्तशृङ्गारयोर्विरोधः । एवमन्यदपि ज्ञेयम् ।

॥ इति साहित्यदर्पणालोके सप्तमः परिच्छेदः ॥

अष्टमः परिच्छेदः

(९३) प्रश्नः—गुणालङ्कारयोः भेदप्रदर्शनपूर्वकं गुणस्य लक्षणं प्रतिपाद्यताम् । (वा० सं० वि० वि० १९४४, ६७, ७२, ८२)

उत्तरम्—ननु लोके गुणाः शौर्यादयः समवायेन आत्मनिष्ठा अलङ्कारा हारादयः शरीरे संयोगसम्बन्धेन सम्बद्धा इति लोके गुणालङ्कारयोः भेदो भवतु नाम काव्ये पुनर्माधुर्यादीनां गुणानाम् उपमादीनाम् अलङ्काराणां समवायेनैव वृत्त्या गुणालङ्कारयोर्न भेद इति न वाच्यम् । यथा हि लोके अङ्गित्वमाप्तस्य आत्मन उत्कर्षहेतुत्वाच्छौर्यादयोः गुणशब्दवाच्यास्तथा काव्येऽपि अङ्गित्वमाप्तस्य रसस्य धर्माः स्वरूपविशेषा माधुर्यादयोऽपि स्वाश्रयरसव्यञ्जकवाक्यस्य काव्यव्यपदेशस्यौपयिकानुगुण्यभाज इत्यर्थः । एवं काव्यव्यवहारप्रयोजकत्वे सति रसधर्मत्वं गुणत्वमिति । रसत्वादावतिव्याप्तिवारणाय सत्यन्तम् । अलङ्कारेऽतिव्याप्तिवारणाय विशेष्यदलम् । एतेनेदं सिद्धं यद् रसमात्रधर्मत्वं गुणत्वम्, शब्दार्थधर्मत्वम् अलङ्कारत्वमिति ।

अपि च यथात्मनः धर्माः शौर्यदयः नियता अपरिहार्याश्च तथैव काव्यस्य आत्मभूते रसे गुणानां स्थितिः नियता अपरिहार्या च । एवञ्च अलङ्काराणामपरिहार्यता नेत्यपि सिद्धम् ।

(९४) प्रश्नः—को नाम गुणः ? कतिविधश्च सः ? किं तेषां लक्षणम् ? कस्मिन् रसे के गुणा नियता ? इति विविच्य प्रतिपादयत । (१९८०, ८१, ८२)

उत्तरम्—लोके यथात्मन उत्कर्षहेतुत्वात् शौर्यादयो गुणशब्दवाच्यास्तथा काव्ये अङ्गित्वमाप्तस्य रसस्य उत्कर्षाधायका धर्माः=स्वरूपविशेषाः, माधुर्यादयो गुणा इत्युच्यन्ते । समवायेन रसमात्रधर्मत्वं गुणत्वमित्यर्थः । ते च त्रयः सन्ति—माधुर्यम्, ओजः, प्रसादश्चेति । उक्तं च साहित्यदर्पणे—

'रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादियो यथा । गुणाः' इति । तथा—

'माधुर्यमोजः प्रसाद इति ते त्रिधा ।' इति च ।

माधुर्यम्—तत्र चित्तद्रवीभावरूपो ह्लादो माधुर्यं गुणो भवति । ह्लादः सुखसंवलिता प्रतीतिः । उक्तं च—

'चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।' इति ।

तच्च सम्भोगश्रृङ्गारे, करुणे, विप्रलम्भश्रृङ्गारे शान्ते च क्रमाद् अधिकं तिष्ठति । अत्र सम्भोगादिशब्दा उपलक्षणानि । तेन सम्भोगाभासादिष्वपि माधुर्यस्य स्थितिर्ज्ञेया । यथा—

'लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ।।'

अत्र प्रथमे पादे नकारजकाराः, द्वितीये ङकारगकाराः, तृतीयचतुर्थयोः नकारदकारा माधुर्यं गुणं व्यञ्जयन्ति । प्रथमे चतुर्थे च पादे अल्पवृत्तिः, द्वितीये तृतीये च पादेऽवृत्तिरेव ।

ओजः—चित्तस्य विस्ताररूपं दीप्तत्वमोजः । वीरे बीभत्से रौद्रे च क्रमेणास्याधिक्यं भवति । अत्रापि वीरादिशब्दा उपलक्षणानि । तेन वीराभासादावपि अस्य स्थितिः । उक्तं च साहित्यदर्पणे—

'ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ।
वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु ।।' इति ।।

यथा—

'चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः ।।'

अत्र 'द्भु' इति 'द्ध' इति 'ण्ड' इति च, 'भ्रमित' इत्यत्र च सरेफो वर्णः, अन्ये च संयुक्ता वर्णा ओजोव्यञ्जकाः ।

प्रसादः—शुष्केन्धनमनल इव यश्चित्तं झटिति व्याप्नोति स प्रसादः । अयं सर्वेषु रसेषु सर्वासु रचनासु च तिष्ठति । उक्तं च साहित्य दर्पणे—

'चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।
स प्रसादः समस्तेषु रसेषु रचनासु च ।।'

यथा—

'सूचीमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप लुठसि स्तनयोः प्रियायाः ।
बाणैः स्मरस्य शतशो विनिकृत्तमर्मा
स्वप्नेऽपि तां कथमहं न विलोकयामि ।।'

अत्र श्रुतिमात्रत एवार्थप्रतिपादकशब्दव्यङ्ग्यत्वेन झटित्येव चित्तव्यापनात् प्रसादगुणः।

(९५) प्रश्नः—के वर्णाः कस्य रसस्य प्रतिपादकाः ? इति सोदाहरणं प्रतिपादयत। (ग० सं० का० वाराणसी, १९२७, ३१, ४३, ४७, ५१, ६९ ई०)

उत्तरम्—माधुर्यगुणव्यञ्जका वर्णाः—टठडढवर्जिताः कादयो मावसानाः निजवर्गान्त्ययुक्ता रेफणकारौ ह्रस्वान्तरितौ समासाभावो मध्यमः समासो वा, समासः=पदान्तरयोगे माधुर्यवती रचना, माधुर्यस्य व्यञ्जका। उक्तं च साहित्यदर्पणे—

'मूर्ध्नि वर्णान्त्यवर्णेन युक्ताष्टठडढान्विता।
रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः॥
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा॥'

यथा—

'अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः।
जनयन्ति मुहुर्यूनामन्तःसन्तापसन्ततिम्॥'

अत्र प्रथमार्द्धे अग्रभागस्थितैः ङकारैः सह सम्बद्धास्तकारा माधुर्यगुणं व्यञ्जयन्ति। वृत्तिश्चात्राल्पा।

ओजोगुणव्यञ्जका वर्णाः—वर्गाणां प्रथमैः वर्णैः क-च-ट-त-प-रूपैः सह तदन्तिमा वर्णाः ख-छ-ठ-थ-भ-रूपाः, तथा वर्गाणां तृतीयवर्णैः ग-ज-ड-द-ब-रूपैः सह तदन्तिमा वर्णाः घ-झ-ढ-ध-भ-रूपाः युक्ता ओजोगुणं व्यञ्जयन्ति। एवं रेफस्योपरि अध उभयत्र वा प्रयोगः टठडढैः सह शकारः षकारश्च ओजसः व्यञ्जकाः। दीर्घसमासः, औद्धत्यशालिनी सङ्घटना च ओजसो व्यञ्जिका। उक्तं च साहित्यदर्पणे—

'वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ।
उपर्यधो द्वयोर्वा सरेफाष्टठडढैः सह।
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः।
तथा समासो बहुलो घटनौद्धत्यशालिनी॥'

यथा—

'चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः॥'

अत्र 'द्भु' इति, 'द्ध' इति 'ण्ड' इति च संयुक्ता वर्णाः, 'भ्रमित' इत्यत्र सरेफो वर्णः 'शो शो' इति तालव्यशकारौ, अन्ये च संयुक्ता वर्णा ओजोव्यञ्जकाः।

प्रसादगुणव्यञ्जका वर्णाः—श्रुतिमात्रेण अर्थबोधकाः शब्दाः प्रसादस्य व्यञ्जकाः। अयं सर्वेषु रसेषु सर्वासु रचनासु च तिष्ठति। उक्तं च साहित्यदर्पणे—

'शब्दास्तद्व्यञ्जका अर्थबोधकाः श्रुतिमात्रतः।'

यथा—

'सूचीमुखेन सकृदेव कृतव्रणस्त्वं मुक्ताकलाप लुठसि स्तनयोः प्रियायाः।
बाणैः स्मरस्य शतशो विनिकृत्तमर्मा स्वप्नेऽपि तां कथमहं न विलोकयामि॥'

अत्र श्रुतिमात्रतः अर्थबोधकाः शब्दाः प्रसादगुणव्यञ्जकाः।

(९६) प्रश्नः—प्राचीनोक्तानां दशशब्दगुणानां दशार्थगुणानां च केषु गुणेषु कथं चाऽन्तर्भावः? इति निरूपयत। (१९४४, ५०, ५३, हि० प्र० यू० १९८०, ८१)

उत्तरम्—ननु प्राचीनैः वामनादिभिः गुणानां शब्दार्थधर्मत्वं स्वीकृतम्। तथा च दशशब्दगुणाः दश चार्थगुणाः कथिता इति न तेषां त्रिषु गुणेषु अन्तर्भावो भवितुमर्हतीति न वाच्यम्। तथाहि—

बहूनां पदानामेकपदवद् भासनात्मा श्लेषः ओजसि अन्तर्भवति। आरोहावरोहक्रमः समाधिः। अथवा—उत्कर्षापकर्षयोः वैरस्यताऽनावहो विन्यासः समाधिः। स च बन्धगाढत्वादोज एव। पदानां नृत्यत्प्रायत्वं उदारता सापि ओज एव। ओजोमिश्रितशैथिल्यात्मा प्रसाद ओज एव। पृथक्पदत्वं माधुर्यं यत्तन्नु गुणत्रयमध्ये स्वीकृतं माधुर्यमेव। पदानां झटिति अर्थसमर्पणरूपाया अर्थव्यक्तेः प्रसादेऽन्तर्भावः। कान्तिः औज्वल्यम्। सा च ग्राम्यत्वदोषाभावरूपा। अपारुष्यं सुकुमारता। सा च दुःश्रवत्वाभावरूपेति नोभयोर्गुणत्वम्। मार्गाभिदस्वरूपिणी समता तु क्वचित् अनुचिते स्थाने प्रयोगे दोष एव। यत्र नु औचित्यं तत्र सुकुमारतायाः समताया माधुर्ये प्रौढायास्तस्या ओजस्यन्तर्भावः। उक्तं च विश्वनाथेन—

'श्लेषः समाधिरौदार्यं प्रसादा इति ये पुनः।
गुणाश्चिरन्तनैरुक्ता ओजस्यन्तर्भवन्ति ते॥

माधुर्यव्यञ्जकत्वं यदसमासस्य दर्शितम् ।
पृथक्पदत्वं माधुर्यं तेनैवाङ्गीकृतं पुनः ॥
अर्थव्यक्तेः प्रसादाख्यगुणेनैव परिग्रहः ।
अर्थव्यक्तिः पदानां हि घटित्यर्थसमर्पणम् ।
ग्राम्यदुःश्रवतात्यागात् कान्तिश्च सुकुमारता ॥
क्वचिद् दोषस्तु समता मार्गभेदस्वरूपिणी ।
अन्यथोक्तगुणेष्वस्या अन्तःपातो यथायथाम् ॥'

एवं प्राचीनोक्तानां दशशब्दगुणानां त्रिपु गुणेष्वन्तर्भावान्न दशशब्दगुणाः पृथक् ।

अर्थगुणेषु साभिप्रायत्वमोजः, तच्च अपुष्टार्थत्वदोषाभावरूपम् । अर्थवैमल्यं प्रसादः, स च अधिकपदत्वदोषाभावरूपः । उक्तिवैचित्र्यं माधुर्यं तच्च अनवीकृतत्वदोषाभावरूपम् । अपारुष्यं सौकुमार्यम् । तच्च अमङ्गलरूपाश्लीलदोषाभावरूपम् । अग्राम्यत्वम् उदारता, सा च ग्राम्यत्वदोषाभावरूपा । एवं दोषाभावरूपा एवैते प्राचीनोक्ताः पञ्च अर्थगुणाः । वस्तुस्वभावस्फुटत्वरूपायाः अर्थव्यक्ते स्वभावोक्त्यलङ्कारे संग्रहः । दीप्तरसत्वरूपायाः कान्तेः रसध्वनौ गुणीभूतव्यङ्ग्ये चान्तर्भावः । क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा श्लेषः विचित्रतामात्रम् । प्रक्रान्तप्रकृतिप्रत्ययाविपर्यासेनार्थस्य विसंवादिताविच्छेदः समता प्रक्रमभङ्गाभावरूपा । अर्थदर्शनरूपः समाधिः न गुणः, किन्तु काव्यस्य शरीरमात्रनिर्वर्तकः । एवमेव समासः व्यासश्च चमत्कारमात्रं न गुणः, रसस्यासाधारणतयाऽनुपकारित्वात् । उक्तं च विश्वनाथेन साहित्यदर्पणे—

'ओजः प्रसादो माधुर्यं सौकुमार्यमुदारता ।
तदभावस्य दोषत्वात् स्वीकृता अर्थगाः गुणाः ॥
अर्थव्यक्तिः स्वभावोक्त्यलङ्कारेण तथा पुनः ।
रसध्वनिगुणीभूतव्यङ्ग्यानां कान्तिनामकः ॥
श्लेषो विचित्रतामात्रमदोषः समता परम् ।
न गुणत्वं समाधेश्च·········॥' इति ॥

एवं पृथक् दशार्थगुणस्वीकारस्यावश्यकतैव नास्तीति दिक् ।

॥ इति साहित्यदर्पणालोकेऽष्टमः परिच्छेदः ॥

नवमः परिच्छेदः

(९७) प्रश्नः—रीतिः कतिविधा ? किञ्च तासां लक्षणम् ? इति सोदाहरणं प्रतिपादयत । (वा० सं० वि० वि० १९४६, ५०, ५३, ६१, हि० प्र० यू० १९८०, ८१, ८२)

उत्तरम्—रीयते ज्ञायते गुणानां निवेशोऽनयेति रीतिः । सा च पदसङ्घटनैव । यथा अङ्गसङ्घटना आत्मन उपकर्त्री तथैव पदसङ्घटना रसस्योपकर्त्री । सा च रीतिश्चतुर्विधा—वैदर्भी, गौडी, पाञ्चाली, लाटी चेति । उक्तं च साहित्यदर्पणे—

'पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।
उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा ॥
वैदर्भी चाऽथ गौडी च पाञ्चाली लाटिका तथा ।' इति ।

वैदर्भी—तत्र माधुर्यव्यञ्जकैः वर्णैः ललितात्मिका=सुकुमारबन्धात्मिका अल्पसमासवती असमासवती वा रचना वैदर्भी रीतिः कथ्यते । उक्तं च—

'माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥' इति ॥

यथा—

'अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः ।
जनयन्ति मुहुर्यूनामन्तःसन्तापसन्ततिम् ॥'

रुद्रटस्तु वैदर्भ्या लक्षणमेवमाह—

'असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी ।
वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया ॥'

गौडी—ओजोगुणप्रकाशकैः वर्णैः आडम्बरः बन्धः, समासबहुला रचना गौडी रीतिर्भवति । उक्तं च साहित्यदर्पणे—

'ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ।
समासबहुला गौडी ।' इति ।

यथा --

'चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः ॥'

पुरुषोत्तमस्तु गौड्या लक्षणमेवमाह—

'बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौडी या ।
रीतिरनुप्रासमहिमपरतन्त्रा स्तोकवाक्या च ॥' इति ॥

पाञ्चाली—वैदर्भीगौड्योर्व्यञ्जकवर्णातिरिक्तैः वर्णैः, समस्तपञ्चषपदो बन्धः पाञ्चाली वृत्तिः । उक्तं च विश्वनाथेन—

'वर्णैः शेषैः पुनर्द्वयोः ।
समस्तपञ्चषपदो बन्धः पाञ्चालिका मता ।'

यथा—

'मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥' इति ॥

भोजस्तु पाञ्चाल्या लक्षणमेवमाह—

'समस्तपञ्चषपदामोजःकान्तिसमन्विताम् ।
मधुरां सुकुमारां च पाञ्चालीं कवयो विदुः ॥'

लाटी—वैदर्भीमिश्रिता पाञ्चाली एव लाटी । तथा चोक्तं दर्पणे—

'लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरे स्थिता' । इति ।

यथा—

अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन् कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥'

कश्चिल्लाटी लक्षणमेवमाह—

'मृदुपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा ।
उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ॥'

अन्ये तु—

'गौडी डम्बरबद्धा स्याद् वैदर्भी ललितक्रमा ।
पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः ॥'

(९८) प्रश्नः—रीतिनियतानां रचनादीनां व्यत्ययः कथं भवति ? इति सोदाहरणं प्रतिपादयत । अथवा—'क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादय.' इति कारिका व्याख्येया । (वा० सं० वि० वि० १९५६, ६२, ६९ ई०)

उत्तरम्—यद्यपि रचना, वृत्तिः, वर्णाश्च गुणाधीनास्तथापि वक्त्रौचित्यात्, वाच्यौचित्यात्, प्रबन्धौचित्याच्च क्वचिदन्यथाभावो भवति रचनादीनाम् । तत्र वक्त्रौचित्याद् यथा—

'मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटाऽन्योऽन्यसङ्घट्टचण्डः ।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः,
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः,
केनाऽस्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् ।।'

अत्र वाच्यार्थे प्रश्नरूपे प्रबन्धे च वेणीसंहारनाटकरूपे दीर्घसमासा, उद्धता रचना, अभिनयप्रतिकूलत्वेन, दीर्घसमासेन अर्थप्रतीतौ विलम्बाच्च अनुचितैव, किन्तु वक्ताऽत्र क्रोधी भीमसेनः, अतस्तस्य औद्धत्यद्योतनाय उद्धता रचना कृता ।

वाक्यौचित्याद् यथा—

'मूर्धव्याधूयमानध्वनदमरधुनीलोलकल्लोलजालो-
द्धूताम्भःक्षोददम्भात्प्रसभमभिनभः क्षिप्तनक्षत्रलक्ष्म् ।
ऊर्ध्वन्यस्ताङ्घ्रिदण्डभ्रमिभररभसोद्यन्नभस्वत्प्रवेग-
भ्रान्तब्रह्माण्डखण्डं प्रवितरतु शिवं शाम्भवं ताण्डवं वः ।।'

अत्र मृदुप्रकृतिः सूत्रधारो वक्ता, प्रबन्धश्च नाटकः । तत्र दीर्घसमासमयी उद्धता रचना नोचिता । किन्तु अत्र लोकसंहारकस्य शम्भोः उद्धतं ताण्डवं वाच्यम् । अतः तादृशस्य उद्धतताण्डवस्य प्रतिपादनाय या उद्धता रचना कृता सोचितैव ।

प्रबन्धौचित्याद् यथा नाटकादौ रौद्रेऽपि अभिनयप्रतिकूलत्वेन न दीर्घसमासादयो निबध्यन्ते । एवमाख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः, किन्तु विकटबन्धत्वमेव गद्यप्राधान्यात्, गद्ये च विकटबन्धस्यैवौचित्याद् । अपि च तत्र वक्ता कविर्भवति न तु रागी, कोमला रचना च रागीमुखादेव शोभते । कथायां रौद्रेऽपि नाऽत्यन्तम् उद्धताः रचनादयो विधीयन्ते, यतो हि तत्र वक्ता क्रोधाविष्टो न भवति वर्णनीयस्य सुखप्रतिपत्तेरेवोद्देश्यत्वात् । एवमन्यदपि औचित्याद् अनुसर्त्तव्यम् ।

।। इति साहित्यदर्पणालोके नवमः परिच्छेदः ।।

दशमः परिच्छेदः

(९९) प्रश्नः—निर्दुष्टालङ्कारलक्षणं निरूप्य तस्य काव्ये किं प्रयोजनम् ? इति प्रतिपाद्यताम् ।

उत्तरम्—अलङ्क्रियतेऽनेनेति अलङ्कारः। अर्थाद्रसाद्युत्कर्षजनकत्वे सति अतिशयशोभातिशायिकाव्यधर्मत्वम् अलङ्कारत्वम्। उक्तं च साहित्यदर्पणे—

'शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ॥' इति ॥

यथा अङ्गदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति, तथाऽनुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरुपकारकाः। अलङ्कारा अस्थिरा इति नैषां गुणवदावश्यकी स्थितिः। अर्थात्—गुणा अपि रसोत्कर्षका सन्ति किन्तु ते रसस्य स्थिरा धर्माः स्वरूपविशेषाः सन्ति। अलङ्काराश्च शब्दार्थयोरस्थिरा धर्माः शब्दार्थद्वारेण च रसमुत्कर्षयन्ति। इदमेव चैषां प्रयोजनं यत् शब्दार्थद्वारेण रसादेरुपकारकत्वम्।

(१००) प्रश्नः–पुनरुक्तवदाभासस्य शब्दालङ्कारत्वम्, अर्थालङ्कारत्वम्, उभयालङ्कारत्वं वेति सप्रमाणं निरूपयत। (वा० सं० वि० वि० १९५८, ६४, ७२)

उत्तरम्—'आपाततो यदर्थस्य पौनरुक्त्येन भासनम्।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः ॥' इति ॥

श्रवणमात्रेणैव झटिति न तु तात्पर्यालोचनात् परमपि अभिधेयस्य यत्पुनरुक्ततया प्रतीतिः, भिन्नाकारशब्दस्थितः स पुनरुक्तवदाभासो नामालङ्कार उच्यते। यथा—

'भुजङ्गकुण्डलीव्यक्तशशिशुभ्रांशुशीतगुः।
जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः ॥'

अत्र भुजङ्गकुण्डलीति सर्पार्थकयोः शब्दयोः शशिशुभ्रांशुशीतगुरिति चन्द्रार्थकानां शब्दानाम्, हरशिवेति महादेवार्थकयोः शब्दयोः, पायादव्यादिति रक्षणार्थकक्रिययोश्च श्रुतिमात्रेणैव तत्तदर्थस्य पुनरुक्तत्वेन प्रतीतेः पर्यवसाने भुजङ्गरूपं कुण्डलं विद्यते यस्य, तथा व्यक्तः=प्रकाशितः, शशि=शशयुक्तः, शुभ्रांशुः=श्वेतकिरणः, शीतगुः=चन्द्रो यत्र तादृशः, चेतोहरः=मनोहरः, शिवः=महादेवः, अपायात्=विघ्नात्, जगन्ति=लोकान्, अव्यात्=रक्ष्यात्, इत्यादिरूपभिन्नार्थप्रतीतेः पुनरुक्तवदाभासोऽलङ्कारः। 'पायादव्यात्' इत्यत्र क्रियागतोऽयमलङ्कारः।

ननु शब्दगतोऽयमलङ्कारोऽर्थगतो वोभयगतो वेति चेत्? श्रूयताम्। भुजङ्गकुण्डलीति शब्दयोर्मध्ये प्रथमस्य=भुजङ्गशब्दस्यैव परिवृत्तिसहत्वं न तु

कुण्डलीशब्दस्य । अतः शब्दपरिवृत्तिसहत्वासहत्वाभ्यां 'भुजङ्ग' इत्यत्र पुनरुक्तवदाभासस्य आर्थत्वम्, कुण्डलीत्यंशे पुनरुक्तवदाभासस्य शाब्दत्वम् । हरशिवेतिशब्दयोर्मध्ये द्वितीयस्य शिवस्यैव परिवृत्तिसहत्वं न तु प्रथमस्य हरस्येति । अतः 'हरः' इत्यत्र पुनरुक्तवदाभासस्य शाब्दत्वम्, शिवेत्यंशे च आर्थत्वम् । 'शशिशुभ्रांशुशीतगुः' इत्यत्र त्रयाणामपि परिवृत्तिसहत्वम् । तेन द्वितीयपादे पुनरुक्तवदाभासस्य केवलम् आर्थत्वम् । एवं शब्दपरिवृत्तिसहत्वासहत्वाभ्यामस्योभयालङ्कारत्वम् ।

(१०१) प्रश्नः—श्लेषः शब्दालङ्कारोऽर्थालङ्कारो वा ? कश्चात्र पूर्वपक्षः, कश्चात्र सिद्धान्तपक्षः ? इति सप्रमाणं निरूपयत । (वा० सं० वि० वि० वाराणसी १९५३, ५७, ६४ हि० प्र० यू० १९८३)

उत्तरम्—'शिलष्टैः पदैरनेकार्थाऽभिधाने श्लेष इष्यते' इति । अनेकेनार्थेन सम्मिलितैः=एकोच्चारणेनैव युगपदनेकार्थबोधकैः पदैरभिधयाऽनेकार्थबोधने सति श्लेषोऽलङ्कारः । स च श्लेषः सभङ्गाभङ्गोभयात्मकत्वात्त्रिविध । तत्र 'येन ध्वस्तमनोभवेन–' इत्यादौ सभङ्गः शब्दश्लेषः । 'अन्धकक्षयकरः' इत्यादौ अभङ्ग. शब्दश्लेषः । अनयोश्चैकत्र सम्भवात् सभङ्गाभङ्गात्मकश्च शब्दश्लेषः । अतस्त्रिविध एव श्लेषः शब्दालङ्कारो नार्थालङ्कार इति साहित्यदर्पणकारस्य हृदयम् ।

अत्रालङ्कारसर्वस्वकारादयः—ननु सभङ्ग एव शब्दश्लेषविषयः, यत्रोदात्तादिस्वरभेदाद् भिन्नप्रयत्नोच्चार्यत्वेन भिन्नयोः शब्दयोर्जतुकाष्ठन्यायेन श्लेषः । अभङ्गस्तु अर्थश्लेष एव । यत्र स्वराभेदादभिन्नप्रयत्नोच्चार्यतया शब्दाभेदादर्थयोरेकवृन्तफलद्वयन्यायेन श्लेषः । यो हि यदाश्रितः स तदलङ्कार एव । अलङ्कार्यालङ्करणभावस्य लोकवदाश्रयाश्रयिभावेनोपपत्तिरिति वदन्ति ।

(सिद्धान्तपक्ष.–) परन्तु मतमिदमन्ये (काव्यप्रकाशकारादयः) न मन्यन्ते । तथा हि अत्र ध्वनिगुणीभूतव्यङ्ग्यदोषगुणालङ्काराणां शब्दार्थगतत्वेन व्यवस्थितेरन्वयव्यतिरेकानुविधायित्वेन नियम इति । अर्थात् शब्दार्थयोर्मध्ये यस्मिन् शब्दे अर्थे वा सति ये ध्वनिगुणीभूतव्यङ्ग्यदोषगुणालङ्काराः सन्ति असति च न सन्ति, ते तदधीनस्वरूपतया तदीया इति व्यवस्थाप्यन्ते । एवं च शब्दभङ्गाभङ्गोभयविधस्थलेऽपि तत्तच्छब्दसत्त्वे एव श्लेषसत्त्वात्, तदसत्त्वे च तदसत्त्वात् तदुभयस्थलेऽपि शब्दश्लेष एव ।

न च 'अन्धकक्षयकरः—' इत्यादौ शब्दाभेदः। अर्थभेदेन शब्दभेद इति दर्शनात्। 'प्रत्यर्थं शब्दनिवेशः' इति सिद्धान्तादित्यर्थः।

किञ्चाऽत्र शब्दस्यैव मुख्यतया वैचित्र्यबोधोपायत्वेन कविप्रतिभोट्टङ्कनात् शब्दालङ्कारत्वमेव। विसदृशशब्दद्वयस्य बन्धे चैवंविधवैचित्र्यभावात् वैचित्र्यस्यैव चाऽलङ्कारत्वात्। अर्थमुखप्रेक्षितया अलङ्कारत्वे अर्थानुप्रासादीनामपि रसादिपरत्वेनार्थमुखप्रेक्षितया अर्थालङ्कारत्वप्रसङ्गः।

शब्दस्याभिन्नप्रयत्नोच्चार्यत्वेनाऽर्थालङ्कारत्वमिति चेत्? तदा 'प्रतिकूलतामुपगते हि विधौ' इत्यादौ शब्दभेदेऽपि अर्थाऽलङ्कारत्वं तवापि प्रसज्येत। तस्मादुभयत्रापि शब्दालङ्कारत्वमेव। यत्र च शब्दपरिवर्तनेऽपि न श्लेषत्वखण्डना तत्र 'स्तोकेनोन्नतिमायाति—' इत्यादौ अर्थश्लेष एव।

इदमत्रावधेयम्—सभङ्गस्थले शब्दश्लेषः। अभङ्गस्थले स्वभावादनेकार्थैः शब्दैरनेकार्थाभिधाने शब्दश्लेषः। स्वभावादेकार्थैः शब्दैरनेकार्थाभिधाने अर्थश्लेष इति साहित्यदर्पणकारस्य मतम्। तथा चोक्तमर्थश्लेषनिरूपणप्रसङ्गे— 'शब्दैः स्वभावादेकार्थैं श्लेषोऽनेकार्थवाचनम्' इति।

(१०२) प्रश्नः—निम्नाङ्किता अलङ्काराः सलक्षणोदाहरणं व्याख्येयाः—अनुप्रासः लाटानुप्रासः, यमकम्, वक्रोक्तिः, शब्दश्लेषः, उपमा (पूर्णोपमा), मालोपमा, अनन्वयः, रूपकम् (परम्परितम्, साङ्गम्, निरङ्गम्), परिणामः, उल्लेखः, उत्प्रेक्षा (वस्तु-हेतु-फलोत्प्रेक्षा,), अपह्नुतिः, अतिशयोक्तिः, तुल्ययोगिता, दीपकम्, प्रतिवस्तूपमा, दृष्टान्तः, निदर्शना, व्यतिरेकः, समासोक्तिः, अप्रस्तुतप्रशंसा, अर्थान्तरन्यासः, काव्यलिङ्गम्, विभावना, विशेषोक्तिः, विरोधाभासः (विरोधः), असङ्गतिः, एकावली, परिसंख्या, स्वभावोक्तिः, संसृष्टिः, सङ्करः।

उत्तरम्—

॥ अनुप्रासः ॥

स्वरस्य वैषम्येऽपि यत् शब्दसाम्यं सोऽनुप्रासः। उक्तं च साहित्यदर्पणे— 'अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्।' इति।

उदाहरणं यथा—

'निवर्त्य सोऽनुव्रजतः कृतानतीनतीन्द्रियज्ञाननिधिर्नभसदः।
सभासदत्सादितदैत्यसम्पदा पदं महेन्द्रालयचारुचक्रिणः॥'

अत्र 'नती नती', 'ननि', 'सदत् सादित', 'चारु च'; इत्यादौ वर्णपदैकदेशानां साम्यादनुप्रासः। 'नती नती' इत्यत्र स्वरसाम्यम्। अन्यत्र वैषम्यम्।

॥ लाटानुप्रासः ॥

'शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः। लाटानुप्रास इत्युक्तः।' इति। तात्पर्यमात्रतः शब्दार्थयोर्भेदे सति शब्दार्थयोर्यत् पुनः कथनं स लाटानुप्रास उच्यते।

यथा—'नयने तस्यैव नयने च'।

अत्र द्वितीयनयनशब्दो भाग्यवत्त्वादिगुणविशिष्टत्वरूपतात्पर्यमात्रेण भिन्नार्थः।

यथा वा—

'यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य॥'

अत्रानेकपदानां पौनरुक्त्यम्। पूर्वार्द्धे तुहिनदीधितिरुद्देश्यम्, दवदहनो विधेयम्। उत्तरार्द्धे तु दवदहन उद्देश्यम्, तुहिनदीधितिर्विधेयम्। एवमुद्देश्यविधेयभावविपर्यासेन शाब्दबोधरूपान्वयभेदात् तात्पर्यभेद इत्यवगन्तव्यम्।

॥ यमकम् ॥

'सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते॥' इति॥

अर्थे सति भिन्नार्थस्य स्वरव्यञ्जनसमुदायस्य पूर्वोपात्तक्रमेणैव आवृत्तिर्यमकं कथ्यते। यथा—

'नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत्स सुरभिं सुरभिं सुमनोभरैः॥'

अत्र पदावृत्तिः। 'पलाश-पलाश' इति 'सुरभिं सुरभिम्' इत्यत्र च द्वयोः सार्थकत्वम्। 'लतान्त-लतान्त' इत्यत्र प्रथमस्य निरर्थकत्वम्। 'पराग-पराग' इत्यत्र द्वितीयस्य। एवमत्र यमकालङ्कारः।

॥ वक्रोक्तिः ॥

एकेन=वक्त्रा, अन्यतात्पर्येण उक्तं यद् वाक्यम्, अन्येन=श्रोत्रा, यदि श्लेषेण काक्वा वा, अन्यतात्पर्यार्थकत्वेन कल्पितं तदा वक्रोक्तिरलङ्कारः। सा च वक्रोक्तिः श्लेषवक्रोक्तिः, काकुवक्रोक्तिश्चेति द्विधा। तत्र श्लेषवक्रोक्तिर्यथा—

'के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रयः,
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ।
वामा यूयमहो विडम्बरसिकः कीदृक् स्मरो वर्तते,
येनाऽस्मासु विवेकशून्यमनसः पुंस्वेव योषिद्भ्रमः ॥'

अत्र वक्त्राऽन्याभिप्रायेणोक्तस्य वाक्यस्य श्रोत्रा श्लेषेण अन्यार्थकतया योजितत्वाद् वक्रोक्तिरलङ्कारः ।

काकुवक्रोक्तिर्यथा—

'काले कोकिलवाचाले सहकारमनोहरे ।
कृतागसः परित्यागात् तस्याश्चेतो न दूयते ॥'

अत्र कयाचित्सख्या निषेधार्थे प्रयुक्तो नञ् 'तस्याश्चेतो न दूयते' इति ध्वनिविकारेण (काक्वा) विध्यर्थे=भावार्थे, योजितः । ततो दूयत एवेति विध्यर्थकतया काक्वा योजितत्वाद् वक्रोक्तिरलङ्कारः ।

॥ श्लेषः ॥

अनेकेनार्थेन सम्मिलितैः=एकोच्चारणेनैव युगपदनेकार्थबोधकैः पदैरभिधयाऽनेकार्थबोधने सति श्लेषोऽलङ्कारः । स च (शब्दश्लेषः) वर्ण-प्रत्यय-लिङ्ग-प्रकृति-पद-विभक्ति-वचन-भाषाणां श्लेषाद् अष्टधा भवति । यथा चोक्तं साहित्यदर्पणे—

'श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते ।
वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि ।
श्लेषाद् विभक्ति-वचनभाषाणामष्टधा च सः ॥' इति ॥

तत्र वर्णश्लेषो यथा—

'प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥'

अत्र 'विधौ' इति विधुविधिशब्दयोः उकारेकारयोः औकाररूपत्वाद् श्लेषः ।

प्रत्यययोः वचनयोश्च श्लेषो यथा—

'किरणा हरिणाङ्कस्य दक्षिणश्च समीरणः ।
कान्तोत्सङ्गजुषां नूनं सर्व एव सुधाकिरः ॥'

अत्र 'सुधाकिरः' इति क्विप्-क-प्रत्यययोः श्लेषः । किञ्चाऽत्र बहुवचनैकवचनयोः ऐकरूप्याद् वचनश्लेषोऽपि विद्यते ।

लिङ्गश्लेषो यथा—

'विकसन्नेत्रनीलाब्जे तथा तन्व्याः स्तनद्वयी ।
तव दत्तां सदामोदं लसत्तरलहारिणी ॥'

अत्र नपुंसकलिङ्गस्त्रीलिङ्गयोः श्लेषो वचनश्लेषोऽपि वर्तते ।

प्रकृतिश्लेषो यथा—

'अयं सर्वाणि शास्त्राणि हृदि ज्ञेपु च वक्ष्यति ।
सामर्थ्यकृदमित्राणां मित्राणां च नृपात्मजः ॥'

अत्र 'वक्ष्यति' इति वहि-वच्योः, 'सामर्थ्यकृत्' इति कृन्तति-करोत्योः प्रकृत्योः श्लेषः ।

पदश्लेषो यथा—

'पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव ।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ॥'

अत्र पदभङ्गे विभक्तिसमासयोरपि वैलक्षण्यात् पदश्लेषः, न तु प्रकृतिश्लेषः ।

विभक्तिश्लेषो यथा—

'सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः ।
नयोपकारसाम्मुख्यमायासि तनुवर्तनम् ॥'

अत्र 'हर' इत्येकस्मिन् पक्षे शिवसम्बोधनमिति सुप्, परस्मिन् पक्षे हृधातोस्तिङिति विभक्तेः । एवं यथाऽत्र सुप्तिङोः श्लेषस्तथा 'भव-नय-आयासि-तनु' इत्येतेषु ज्ञेयम् ।

भाषाश्लेषो यथा—

'महदे सुरसन्धं मे तमव समासङ्गमागमाहरणे ।
हरबहुसरणं तं चित्तमोहमवसर उमे सहसा ॥'

अत्र संस्कृत-महाराष्ट्रयोः भाषयोः श्लेषः ।

अष्टविधोऽयं श्लेषः सभङ्गाभङ्गोभयात्मकत्वात् पुनस्त्रिविधः ।

॥ उपमालङ्कारः ॥

एकस्मिन्नेव वाक्ये उपमानोपमेययोः वैधर्म्यरहितम् इवादिप्रतिपादितं साम्यमुपमालङ्कारः । सा चोपमा, सामान्यधर्मः—द्वयोः सादृश्यहेतू गुणक्रिये मनोज्ञत्वादि, औपम्यवाचकमिवादि, उपमेयं मुखादि, उपमानं चन्द्रादि यदि वाच्यं भवेत्तदा पूर्णोपमा विज्ञेया । उक्तं च—

'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः ।' इति ।
तथा—'सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च ।
उपमेयं चोपमानं भवेद्वाच्यम्......॥' इति ॥

यथा—

'इति विरचितवाग्भिर्वन्दिपुत्रैः कुमारः,
सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार ।
मदपटुनिनदद्भिर्बोधितो राजहंसैः,
सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥'

अत्र सुरगज उपमानम्, कुमार उपमेयम्, निद्रापगमपूर्वकस्तल्पत्यागः सामान्यधर्मः, इव शब्दः सादृश्यवाचकः, इति पूर्णोपमोदाहरणम् ।

सा च श्रौती आर्थी चेति द्विधा । द्विविधाऽपि सा तद्धिते समासे वाक्ये चेति षट्प्रकारा पूर्णोपमा । उक्तं च—

'श्रौती यथेव-वा-शब्दा इवार्थो वा वतिर्यदि ।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा यतिः ॥
द्वे तद्धिते समासेऽथ वाक्ये..............॥' इति ॥

तत्र श्रौती यथा—

'सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले ॥'

अत्र क्रमेण त्रिविधा श्रौती ।

आर्थी यथा—

'मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः ।
चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः ॥'

अत्र क्रमेण त्रिविधा आर्थी ।

॥ मालोपमा ॥

एकस्योपमेयस्य यत्र बहूनि उपमानानि उच्यन्ते तत्र मालोपमाऽलङ्कारः ।

उक्तं च—

'मालोपमा यदेकस्योपमानं बहु दृश्यते ।' इति ।

उदाहरणं यथा—

'वारिजेनेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनितां नयेन श्रीर्मनोहरा ॥'

अत्रोपमेयभूतायाः श्रियाः सरसी-निशीथिनी-वनितारूपानेकोपमानत्वात् मालोपमालङ्कारः ।

॥ अनन्वयः ॥

एकस्मिन् वाक्ये एकस्यैव वस्तुनः उपमानत्वम् उपमेयत्वं च भवति चेत् तदा अनन्वयालङ्कारः । उक्तं च साहित्यदर्पणे—

'उपमानोपमेयत्वमेकस्यैव त्वनन्वयः ।' इति ।

यथा—

'रामरावणयोर्युद्धं रामरावणयोरिव' । इति ।

अत्र उपमानमुपमेयं च रामरावणयोर्युद्धमेव, इति अनन्वयालङ्कारः ।

॥ रूपकम् ॥

निषेधरहिते विषये=उपमेये, उपमानस्य आरोपस्तत्त्वेन प्रतीतिरेव रूपकमेवालङ्कारः । उक्तं च साहित्यदर्पणे—

'रूपकं रूपितारोपो विषये निरपह्नवे' । इति ।

तच्च रूपकं परम्परितं साङ्गं निरङ्गमिति च त्रिधा भवति ।

परम्परितम्—यत्र रूपके कस्यचिदेकस्य आरोप परारोपस्य कारणं भवति, तत्परम्परितं कथ्यते । उक्तं च—

'यत्र कस्यचिदारोपः परारोपणकारणम् । तत्परम्परितम्–।' इति ।

दिङ्मात्रमुदाह्रियते—

'आहवे जगदुद्दण्डराजमण्डलराहवे ।
श्रीनृसिंहमहीपाल, स्वस्त्यस्तु तव बाहवे ॥'

अत्र राजमण्डलं नृपसमूह एव चन्द्रबिम्बमित्यारोपो राजबाहौ राहुत्वारोपे निमित्तम् ।

साङ्गम्—साङ्गोपमेये साङ्गोपमानस्याभेदारोपः साङ्गरूपकम् ।

उक्तं च—

'अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् ॥' इति ॥

यथा—

'रावणावग्रहक्लान्तमिति वागमृतेन सः ।
अभिवृष्य मरुत्सस्यं कृष्णमेघस्तिरोदधे ॥'

अत्र कृष्णस्य मेघत्वारोपे विधेये [illegible] तदङ्गानाम् अमृतत्वादिकमारोपितम् । अतोऽस्य साङ्गत्वम् ।

निरङ्गम्—केवलस्य अङ्गिन एव न तु साङ्गस्य उपमानस्य निरङ्गे उपमेये अभेदारोपणम्, निर्गतान्यङ्गानि यत्र तत् निरङ्गं रूपकमुच्यते । उक्तं च—

'निरङ्गं केवलस्यैव रूपणम्……।' इति ।

उदाहरणं यथा—

'निर्माणकौशलं धातुश्चन्द्रिका लोकचक्षुषाम् ।
क्रीडागृहमनङ्गस्य सेयमिन्दीवरेक्षणा ॥'

अत्रैकस्यामिन्दीवरेक्षणाख्यामेवोपमेये निर्माणकौशलादीनां निरङ्गाणामेव त्रयाणामुपमानानामारोपात् (मालारूपकम्) निरङ्गरूपकम् अलङ्कारः ।

॥ परिणामः ॥

उपमाने उपमेयतादात्म्येन प्रस्तुतप्रयोजनस्य उपयोगिसाधनभूते सति परिणामोऽलङ्कारो भवेत् । स च तुल्याधिकरणोऽतुल्याधिकरणश्चेति द्विधा । उक्तं च—

'विषयात्मातयारोप्ये प्रकृतार्थोपयोगिनि ।
परिणामो भवेत्तस्यातुल्याधिकरणो द्विधा ॥'

उपमानस्य उपमेयरूपत्वेन परिणमनात् परिणामः । यथा—

'स्मितेनोपायनं दूरादागतस्य कृतं मम ।
स्तनोपपीडमाश्लेषः कृतो दूते पणस्तया ॥'

अन्यत्रोपायनपणौ वसनाभरणादिभावेनोपयुज्येते । अत्र तु नायकसम्भावनद्यूतयोः स्मिताश्लेषरूपतया । प्रथमार्द्धे 'स्मितेनोपायनम्' इत्युपमानोपमेययोर्मिथो विभिन्नविभक्तित्वेन=वैयधिकरण्येन प्रयोगः । उत्तरार्द्धे तु—'आश्लेषः पणः' इत्युपमानोपमेययोर्मिथः समानविभक्तिकत्वेन=समानाधिकरण्येन, प्रयोगः ।

॥ उल्लेखः ॥

क्वचिद् ज्ञातॄणां बाहुल्येन क्वचिच्च हेतूनां बाहुल्येन एकस्य वस्तुनः यत्र बहुप्रकारक उल्लेखो भवति तत्रोल्लेखालङ्कारः कथ्यते । उक्तं च साहित्यदर्पणे—

'क्वचिद् भेदाद् ग्रहीतॄणां विषयाणां च तथा क्वचित् ।
एकस्यानेकधाल्लेखो यः स उल्लेख उच्यते ॥' इति ॥

तत्र ग्रहीतृभेदाद् यथा—

'प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधीश इति देवैः ।
नारायण इति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः ॥'

अत्रैकस्य भगवतः कृष्णस्य गोपवधूवृद्धदेवभक्तयोगिरूपग्रहीतृभेदात् प्रियशिश्वधीशनारायणब्रह्मत्वेनोल्लेख इति उल्लेखाऽलङ्कारः ।

विषयभेदात् यथा—

'गाम्भीर्येण समुद्रोऽसि गौरवेणासि पर्वतः ।
कामदत्वाच्च लोकानामसि त्वं कल्पपादपः ॥'

अत्रैकस्यैव नृपतेः गाम्भीर्यगौरवकामदरूपविषयभेदात् समुद्रपर्वतकल्पपादपत्वेनोल्लेखालङ्कारः ।

॥ उत्प्रेक्षालङ्कारः ॥

उपमेयस्य उपमानात्मना सम्भावनोत्प्रेक्षा । उपमेयस्य उपमानतादात्म्यसम्भावनम् उत्प्रेक्षाऽलङ्कारः । सा प्रथमं द्विविधा भवति—वाच्या प्रतीयमाना चेति । इवादीनां प्रयोगे वाच्या, तदभावे (इवादीनामप्रयोगे) प्रतीयमाना भवति । प्रतीयमाना एव गूढेति नामान्तरम् । उक्तं च साहित्यदर्पणे—

'भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना ।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता ॥
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः ॥' इति ॥

द्विविधाऽपि सा प्रत्येकं वस्तुहेतुफलरूपत्वेन पुनस्त्रिविधा ।

तत्र वाच्याया भेदत्रयस्यैकमेवोदाहरणं यथा—

'त्वन्मुखश्रीकृते नूनं पद्मैर्वैरायते शशी ।'

अत्र प्रथमतः 'पद्मैर्वैरायते शशी' इत्यंशे वस्तुतः पद्मावैरिणि शशिनि पद्मवैरित्वसम्भावनात् वस्तूत्प्रेक्षा, एवं स्वाभाविके पद्मचन्द्रविरोधे कान्तामुखश्रीप्राप्तिहेतुकत्वसम्भवात् हेतूत्प्रेक्षा, चन्द्रपद्मविरोधस्य अफले कान्तामुखश्रींलाभे तत्फलकत्वसम्भावनात् फलोत्प्रेक्षा चेति ।

त्रिविधा प्रतीयमानोत्प्रेक्षा (गूढोत्प्रेक्षा) यथा—

'यत्कीर्तिविभ्रमश्रान्ता विवेश स्वर्गनिम्नगाम् ।'

वस्तुतः स्वर्गनिम्नगाऽनवगाहिकायां कीर्तौ स्वर्गनिम्नगावगाहकर्तृत्वसम्भावनाद् वस्तूत्प्रेक्षा, स्वर्गनिम्नगावगाहस्याफलहेतुभूते विभ्रमश्रान्तत्वे तद्धेतुत्वसम्भावनात् हेतूत्प्रेक्षा, विभ्रमश्रान्तत्वस्य अफलभूते स्वर्गनिम्नगावगाहे

तत्फलत्वसम्भावनात् फलोत्प्रेक्षा चेति। सर्वा एवैता उत्प्रेक्षाव्यञ्जकेवादि प्रयोगाभावात् प्रतीयमानोत्प्रेक्षा एव।

॥ अपह्नुतिः ॥

उपमेयस्य प्रतिषेधं कृत्वा उपमानस्य आरोपकरणम् अपह्नुतिरलङ्कारः। उक्तं च साहित्यदर्पणे—

'प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः।' इति।

उदाहरणं यथा—

'नेदं नभोमण्डलमम्बुराशिर्नैताश्च तारा नवफेनभङ्गाः।
नायं शशी कुण्डलितः फणीन्द्रो नाऽसौ कलङ्कः शयितो मुरारिः॥'

अत्र नभोमण्डलाद्युपमेयप्रतिषेधपूर्वकाम्बुराश्याद्युपमानस्थापनाद् अपह्नुतिरलङ्कारः।

॥ अतिशयोक्तिः ॥

'सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।'

उपमेयस्य निगरणपुरःसरमुपमानेन सह तस्याभेदज्ञानम् अध्यवसायः। निगरणमत्र अधःकरणमेव। उक्तं च—

'विषयस्यानुपादानेऽप्युपादानेऽपि सूरयः।
अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते॥' इति॥

एवम्भूतस्य अध्यवसायस्य सिद्धत्वे सति अतिशयोक्तिरलङ्कारः। उत्प्रेक्षायाम् उपमेयस्यानिश्चितरूपेण निर्देशात् तत्राध्यवसायस्य साध्यत्वं भवति। इह तु तस्य निश्चितरूपेण निर्देशाद् अध्यवसायस्य सिद्धत्वम् इत्यतिशयोक्तेरुदाहरणमिदम्।

॥ तुल्ययोगिता ॥

प्रस्तुतानाम् अप्रस्तुतानां च पदार्थानां यत्र गुणक्रियारूपैकधर्मे अभिसम्बन्धो भवेत् तत्र तुल्ययोगिता नामकोऽलङ्कारो भवति। उक्तं च साहित्यदर्पणे—

'पदार्थानां प्रस्तुतानामन्येषां च यदा भवेत्।
एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता॥' इति॥

उदाहरणं यथा—

'तदङ्गमार्दवं द्रष्टुः कस्य चित्ते न भासते।
मालतीशशभृल्लेखाकदलीनां कठोरता॥'

अत्र नायिकाङ्गमार्दवे वर्णनीयत्वेन प्रस्तुते अप्रस्तुतानां मालत्यादीनां कठोरतारूपैकगुणात्मकधर्माभिसम्बन्धात् तुल्ययोगिताऽलङ्कारोऽस्ति ।

॥ दीपकम् ॥

अप्रस्तुतानां प्रस्तुतानां च सम्मिलितानां पदार्थानां यदा एकधर्माऽभिसम्बन्धः स्यात्तदा दीपकं नामालङ्कारो निगद्यते । धर्मश्चाऽत्रापि गुणक्रियाऽन्यतररूप एव । अथवा—अनेकासु क्रियासु विद्यमानासु एकमेव कारकं स्यात्तदपि दीपकमेव निगद्यते । उक्तं च साहित्यदर्पणे—

'अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥'

क्रमेणोदाहरणं यथा—

'बलावलेपादधुनाऽपि पूर्ववत् प्रबाध्यते तेन जगज्जिगीषुणा ।
सतीव योषित्प्रकृतिः सुनिश्चला पुमांसमभ्येति भवान्तरेष्वपि ॥'

अत्र प्रस्तुतायाः सुनिश्चलायाः प्रकृतेः अप्रस्तुतायाश्च योषितः एकानुगमनक्रियारूपधर्माभिसम्बन्धाद् दीपकाऽलङ्कारः ।

कारकदीपकं यथा—

'दूरं समागतवति त्वयि जीवनाथे भिन्ना मनोभवशरेण तपस्विनी सा ।
उत्तिष्ठति स्वपिति वासगृहं त्वदीयमायाति याति हसति श्वसिति क्षणेन ॥'

अत्रैकस्या नायिकाया उत्थानाद्यनेकक्रियाभिसम्बन्धाद् दीपकमलङ्कारः । एकस्यैव सर्ववाक्यप्रकाशकत्वेन दीपसाम्याद् दीपकमित्यर्थः । दीपयति अप्रस्तुतमपि पदार्थं प्रकाशयति (सुन्दरीकरोति) इति व्युत्पत्तिः ।

॥ प्रतिवस्तूपमा ॥

ययोर्द्वयोर्वाक्यार्थयोः सादृश्यं प्रतीयमानं भवेद्, तत्र यदि अभिन्नोऽपि साधारणो धर्मो गुणः क्रिया वा भिन्नतया निर्दिश्यते सा प्रतिवस्तूपमा, प्रतिवस्तु=प्रतिपदार्थम्, उपमा=सादृश्यम्, प्रतीयमाना यत्र सा, प्रतिवस्तूपमानामकोऽलङ्कारो भवति । उक्तं च साहित्यदर्पणे—

'प्रतिवस्तूपमा सा स्याद् वाक्ययोर्गम्यसाम्ययोः ।
एकोऽपि धर्मः सामान्ये यत्र निर्दिश्यते पृथक् ॥' इति ॥

उदाहरणं यथा—

'धन्यासि वैदर्भि ! गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥'

अत्र समाकर्षणम् उत्तरलीकरणं च क्रियैकैव पौनरुक्त्यनिरासाय भिन्न-वाचकतया निर्दिष्टेति प्रतिवस्तूपमालङ्कारः।

॥ दृष्टान्तः ॥

'दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्।' इति।

धर्मसहितस्य वस्तुनः=उपमानोपमेयरूपस्य पदार्थस्य प्रतिबिम्बनं=बिम्ब-प्रतिबिम्बभावः, दृष्टान्तोऽलङ्कारः। दृष्टोऽन्तो यत्र स दृष्टान्तः।

उदाहरणं यथा—

'अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला॥'

अत्र पूर्वार्द्धस्य उपमेयवाक्यार्थस्य उत्तरार्धेन उपमानवाक्यार्थेन सह बिम्ब-प्रतिबिम्बभाव इति दृष्टान्तोदाहरणमिदम्। अविदितगुणाया अपि सत्कवि-भणितेः कर्णेषु मधुधारावमनकरणम् अनधिगतपरिमलाया मालतीमालाया नयनलोभनीयत्वमिवेति साम्ये पर्यवसानम्।

॥ निदर्शना ॥

'सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वाऽपि कुत्रचित्।
यत्र बिम्बानुबिम्बत्वं बोधयेत्सा निदर्शना॥'

सम्भवन् असम्भवन् वा वस्तुनो=वाक्यार्थयोः पदार्थयोर्वा सम्बन्धो यत्र बिम्बानुबिम्बत्वम्=उपमानोपमेयभावरूपं सादृश्यम्, बोधयेत्=व्यञ्जनया निरूपयेत्, सा निदर्शयति=निश्चयेन सादृश्यम् उपमानोपमेयभावं बोधयतीति निदर्शना नाम अलङ्कारः।

उदाहरणं यथा—

'क्व सूर्यप्रभवो वंशः क्व चाऽल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्॥'

अत्र सूर्यवंशवर्णनेऽहं सागरं तितीर्षुरस्मीति सम्बन्धोऽनुपपन्नः, उडुपेन सागरतरणवत् मन्मत्या सूर्यवंशवर्णनम् असम्भावितमिति सादृश्यम्, उपमानोप-मेयभावं व्यञ्जनया बोधयतीति निदर्शना नाम अलङ्कारः।

॥ व्यतिरेकः ॥

उपमेयस्य उपमानाद् आधिक्ये न्यूनत्वे वा व्यतिरेको नाम अलङ्कारो भवति। विशेषेण अतिरिच्यते=उपमानाद् उपमेयं वैषम्येण अवगम्यते येन स व्यतिरेकः। उक्तं च साहित्यदर्पणे—

'आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा । व्यतिरेकः—॥'

उदाहरणं यथा—

'अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा ।'

अत्र उपमेयगतम् अकलङ्कत्वम् उपमानगतं च कलङ्कित्वमिति हेतुद्वयं = मुखोत्कर्षस्य विधुनिकर्षस्य च साधकद्वयमुक्तम् इत्यसौ उपमेयाधिक्यहेतुको व्यतिरेकालङ्कारः । यथाशब्दप्रतिपादनाच्च शाब्दमौपम्यम् ।

॥ समासोक्तिः ॥

'समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः ।
व्यवहारसमारोपः प्रकृतेऽन्यस्य वस्तुनः ॥'

यत्र समानैः कार्यलिङ्गविशेषणैः प्रकृते अप्रकृतस्य व्यवहारसमारोपः सा समासोक्तिरलङ्कारः । अप्रस्तुतस्य समासेन सकृदुच्चारणरूपसङ्क्षेपेण अवस्थाद्वयप्रतीतिः समासोक्तिः । यद्वा समस्य=कार्यादेः, आसेन=उपन्यासेन, उक्तिः= अप्रस्तुतावस्थाव्यञ्जनम्, समासोक्तिः ।

उदाहरणं यथा—

'असमाप्तविजिगीषस्य स्त्रीचिन्ता का मनीषिणः ।
अनाक्रम्य जगत्कृत्स्नं नो सन्ध्यां भजते रविः ॥'

अत्र रवेः पुंस्त्वेन सन्ध्यायाः स्त्रीत्वेन रविसन्ध्ययोः नायकनायिकयोरप्राकरणिकयोः व्यवहारसमारोप इति समासोक्तिरलङ्कारः ।

॥ अप्रस्तुतप्रशंसा ॥

यत्र वर्णने अप्रस्तुतस्य स्तुतिद्वारा प्रस्तुतस्य निन्दा प्रतीयते तत्र अप्रस्तुतप्रशंसा नामालङ्कारो भवति । अत्र क्वचित् अप्रस्तुतात् सामान्यात् प्रस्तुतो विशेषो गम्यते, क्वचिद्वा अप्रस्तुतात् विशेषात् प्रस्तुतं सामान्यं गम्यते, अथवा क्वचित् अप्रस्तुतात् कार्यात् प्रस्तुतं निमित्तं गम्यते, क्वचिच्च अप्रस्तुतात् निमित्तात् प्रस्तुतं कार्यं गम्यते, क्वचिच्च अप्रस्तुतात् सदृशरूपात् पदार्थात् प्रस्तुतः सदृशरूपः पदार्थः गम्यते । एवम् अप्रस्तुतप्रशंसा पञ्चधा भवति । उक्तं च साहित्यदर्पणे—

'क्वचिद्विशेषः सामान्यात्सामान्यं वा विशेषतः ।
कार्यान्निमित्तं कार्यं च हेतोरथ समात्समम् ॥
अप्रस्तुतात् प्रस्तुतं चेद् गम्यते पञ्चधा ततः ।
अप्रस्तुतप्रशंसा स्यात्…………………॥' इति ॥

दिङ्मात्रमुदाह्रियते—

'पादाहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद् वरं रजः ॥'

अत्र प्रस्तुतस्य रजसः प्रशंसामुखेन प्रस्तुतस्य अपमानसहिष्णोरस्मद्रूपस्य जनस्य निन्दा प्रतीयते । तथा चाऽस्मदपेक्षया रजोऽपि वरमिति विशेषे प्रस्तुत-सामान्यमभिहितम् । अत एवाऽत्र अप्रस्तुतप्रशंसालङ्कारः ।

॥ अर्थान्तरन्यासः ॥

यत्र मुख्यार्थस्य समर्थस्य अर्थान्तरमभिधीयते तत्र अर्थान्तरन्यासोऽलङ्कारो भवति । अत्र सामान्येन विशेषः, विशेषेण सामान्यम्, कारणेन कार्यम्, कार्येण च कारणम्, साधर्म्येण वैधर्म्येण वा समर्थ्यते । एवमर्थान्तरन्यासोऽष्टधा भवति ।

दिङ्मात्रमुदाह्रियते—

'बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥'

अत्र द्वितीयार्द्धगतेन विशेषरूपेणार्थेन प्रथमार्धगतः सामान्यरूपोऽर्थः समर्थितो भवतीति विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ।

॥ काव्यलिङ्गम् ॥

यत्र वाक्यार्थः पदार्थो वा कस्यापि हेतुर्भवति तत्र काव्यलिङ्गमलङ्कारो भवति । उक्तं च साहित्यदर्पणे—

'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते ।' इति ।

तत्र वाक्यार्थहेतुकं यथा—

'यत्त्वन्नेत्रसमानकान्तिसलिले मग्नं तदिन्दीवरम्,
मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी ।
येऽपि त्वद्गमनानुसारिगतयस्ते राजहंसा गता-
स्त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥'

अत्र चतुर्थपादे पादत्रयवाक्यानि हेतुत्वेनोक्तानीति वाक्यार्थहेतुककाव्य-लिङ्गोदाहरणमिदम् ।

पदार्थहेतुकं यथा—

'त्वद्वाजिराजिनिर्धूतधूलीपटलपङ्किलाम् ।
न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ॥'

अत्र द्वितीयार्धे प्रथमार्धमेकं पदं हेतुत्वेनोक्तानीति वाक्यार्थहेतुकं काव्य-लिङ्गमलङ्कारः ।

।। विभावना ।।

हेतुं विना कार्यस्य उत्पत्तिर्यदि उच्यते तर्हि विभावना नाम अलङ्कारो भवति । उक्तं च साहित्यदर्पणे—

'विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते ।' इति ।

उदाहरणं यथा—

'अनायासकृशं मध्यमशङ्कतरले दृशौ ।
अभूषणमनोहारि वपुर्भाति मृगीदृशः ।।'

अत्र कारणं विनैव कार्योत्पत्तिकथनात् विभावनाऽलङ्कारः ।

।। विशेषोक्तिः ।।

कारणे सत्यपि कार्यस्याभावो वर्ण्यते चेत्तदा विशेषोक्तिर्नाम अलङ्कारो भवति । उक्तं च साहित्यदर्पणे—

'सति हेतौ फलाभावे विशेषोक्तिः ।' इति । यथा—

'धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः ।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः ।।'

अत्र उन्मादकारणत्वे धनित्वे सत्यपि उन्मादाभावरूपकार्याभावकथनात् विशेषोक्तिरलङ्कारः ।

।। विरोधाभासः ।।

वस्तुतो विरोधाभावेऽपि यत्र कारणविशेषवशात् विरोधः प्रतीयते पर्यवसाने तस्य परिहारोऽपि भवति तत्र विरोधाभासनामकोऽलङ्कारो भवति । उक्तं च साहित्यदर्पणे—

'विरुद्धमिव भासेत विरोधाऽसौ ।' इति ।

उदाहरणं यथा—

'इयं विशालाऽपि च भूरिशाला विराजते संस्कृतपाठशाला ।'

अत्र विशालापदस्य विगता शाला यस्याः, इत्यर्थंकरणेन शालारहिताऽपि भूरिशाला कथं स्यादिति विरोधः प्रतीयते । 'विशाला' इत्यस्य 'विस्तीर्णा' इत्यर्थंकरणे विरोधपरिहारात् विरोधाभासोऽलङ्कारः ।

॥ असङ्गतिः ॥

कार्यस्य कारणस्य च विभिन्नदेशवृत्तित्वं वर्ण्यते चेत्तदा असङ्गतिनामा अलङ्कारो भवति । उक्तं च साहित्यदर्पणे—

'कार्यकारणयोर्भिन्नदेशतायामसङ्गतिः ।' इति ।

उदाहरणं यथा—

'सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम् ।
साऽऽक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्यद्भुतम् ॥'

अत्र कारणानां नायिकागतत्वं कार्याणां चात्मगतत्वमिति भिन्नदेशत्वाद् असङ्गतेरुदाहरणम् ।

॥ एकावली ॥

'पूर्वं पूर्वं प्रति कारणत्वेन परं परम् ॥
स्थाप्यतेऽपोह्यते वा चेत्स्यात्तदैकावली द्विधा ॥'

यदि पूर्वं पूर्वं विशेष्यं प्रति उत्तरमुत्तरं विशेषणत्वरूपेण, विशेष्यं स्थाप्यते=विधीयते, अपोह्यते=निषिध्यते वा तदा स्थापनापोहनात्मकतया द्विप्रकारा, एकरूपेण विशेषणत्वेन विशेष्यत्वेन वा विहितानाम् अपोहितानां वा आवली=श्रेणी, एकावली नामालङ्कारः ।

अपोहने उदाहरणं यथा—

'न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद् यदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः ॥'

अत्र जलादिकं पूर्वं पूर्वं विशेष्यं प्रति पङ्कजाद्युत्तरोत्तरविशेष्यस्य विशेषणत्वेन निषेधनात् एकावली नामालङ्कारः । एवं विशेष्यत्वेन इत्यत्रापि उदाहरणानि बोध्यानि ।

॥ परिसंख्या ॥

प्रश्नात् अप्रश्नतो वा प्रतिपादितात् पदार्थात् यदि शाब्द आर्थो वा, तथाविधस्य=प्रतिपादिततुल्यस्य, अन्यस्य वस्तुनः, व्यपोहः=निषेधो, भवेत्तदा परिसंख्या=इतरवर्जनबुद्धिरिति व्युत्पत्त्या तन्नाम अलङ्कारो भवेत् ।

उक्तं च—

'प्रश्नादप्रश्नतो वापि कथिताद् वस्तुनो भवेद् ।
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा ॥'

तत्र प्रश्नपूर्वकप्रतिपादने शाब्दी यथा—

'किं भूषणं सुदृढमत्र यशो न रत्नं किं कार्यमार्यचरितं सुकृतं न दोषः ।
किं चक्षुरप्रतिहतं धिषणा न नेत्रं जानाति कस्त्वदपरः सदसद्विवेकम् ॥'

अत्र व्यवच्छेद्यं (निषेध्यम्) रत्नादि 'न रत्नम्' इत्यादि शाब्दम् ।
प्रश्नपूर्वकप्रतिपादने आर्थी यथा—

'किमाराध्यं सदा पुण्यं कश्च सेव्यः सदाऽऽगमः ।
को ध्येयो भगवान् विष्णुः किं काव्यं परमं मदम् ॥'

अत्र व्यवच्छेद्यं पापादि आर्थन् ।

॥ स्वभावोक्तिः ॥

साधारणैर्ज्ञातुमशक्यानां सहृदयकविमात्रसंवेद्यानां बालपशुपक्ष्यादीनां चेष्टादेः स्वभावस्य च वास्तविकं वर्णनं क्रियते चेत् तदा स्वभावस्य उक्तिर्यत्रेति व्युत्पत्त्या स्वभावोक्तिः नाम अलङ्कारः । उक्तं च साहित्यदर्पणे—

'स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम् ।' इति ।

उदाहरणं यथा—

'लाङ्गूलेनाभिहत्य क्षितितलमसकृद्दारयन्नग्रपद्भ्या-
मात्मन्येवावलीय द्रुतमथ गगनं प्रोत्पतन् विक्रमेण ।
स्फूर्जद्घूङ्कारघोषः प्रतिदिशमखिलान् द्रावयन्नेष जन्तून्
कोपाविष्टः प्रविष्टः प्रतिवनमरुणोच्छूनचक्षुस्तरक्षुः ॥'

अत्र कोपाविष्टस्य तरक्षोः स्वाभाविकक्रियारूपवर्णनात् स्वभावोक्तिरलङ्कारः ।

॥ संसृष्टिः ॥

'मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते ।'

पूर्वोक्तानाम् अनुप्रासोपमादीनाम् अलङ्काराणां परस्परं नैरपेक्ष्येण अवस्थानं संसृष्टिरलङ्कारः । परस्परं पार्थक्येन तिलतण्डुलन्यायेन ज्ञायमानानाम् अलङ्काराणाम् एकस्मिन् पद्ये वाक्ये वा समावेशश्चेत् तदा संसृष्टिर्नाम अलङ्कार इत्यर्थः ;

उदाहरणं यथा—

'देवः पायादपायान्नः स्मेरेन्दीवरलोचनः ।
संसारध्वान्तविध्वंसहंसः कंसनिषूदनः ॥'

अत्र पायादपायादिति यमकम्, 'ध्वान्तविध्वंस' इत्यत्र ध्वयोरनेकधा सकृत् साम्यात् छेकानुप्रासः, एवं 'ध्वंस हंस कंस' इत्यत्र अन्त्यानुप्रासः, 'संसार' इत्यादौ वृत्त्यनुप्रासश्च, इत्येतेषां शब्दालङ्काराणां मिथोऽनपेक्ष्यत्वेन अवस्थानात् संसृष्टिः । द्वितीये पादे समागता लुप्तोपमा, द्वितीयार्द्धे च श्रीकृष्णे सूर्यत्वारोपस्य संसारे ध्वान्तारोपकारणमिति अश्लिष्टशब्दनिबन्धनं केवलपरम्परितरूपकम् । उभयोः यमकानुप्रासयोः उपमारूपकयोश्च शब्दार्थालङ्कारयोः मिथोऽनपेक्षया अवस्थानात् शब्दार्थालङ्कारसंसृष्टिः ।

॥ सङ्करः ॥

'अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।
सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः ॥'

(१) यस्मिन् पद्ये प्रधानाप्रधानभावेन अलङ्काराणां स्थितिर्भवति तत्र अङ्गाङ्गिभावसङ्करः अलङ्कारो भवति ।

(२) यस्मिन् पद्ये वाक्ये वा एकमेव आश्रयमवलम्ब्य द्वयोस्त्रयाणां वा अलङ्काराणाम् अवस्थितिर्भवति तत्र एकाश्रयानुप्रवेशसङ्कर अलङ्कारो भवति ।

(३) यस्मिन् पद्ये वाक्ये वा 'अयमलङ्कारो वा अन्यो वाऽलङ्कारः' इति निर्णायकप्रमाणभावेन सन्देहो भवति तत्र सन्देहसङ्करः अलङ्कारो भवति ।

त्रिविधेऽपि अस्मिन् सङ्करे 'नीरक्षीर'-न्यायेन अलङ्काराणां पार्थक्येन प्रतीतिर्न भवतीति संसृष्टितो वैलक्षण्यम् ।

तत्र अङ्गाङ्गिभावो यथा—

'आकृष्टिवेगविगलद्भुजगेन्द्रभोगनिर्मोकपट्टपरिवेष्टनयाम्बुराशेः ।
मन्थव्यथाव्युपशमार्थमिवाशु यस्य मन्दाकिनी चिरमवेष्टत पादमूले: ॥'

अत्र निर्मोकपट्टापह्नवेन मन्दाकिन्या आरोप इति अपह्नुतिः । सा च मन्दाकिन्या वस्तुवृत्तेन यत्पादमूलवेष्टनं तच्चरणमूलवेष्टनमिति श्लेषमुत्थापयतीति तस्याङ्गम् । श्लेषश्च पादमूलवेष्टनमेव चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम् । अतिशयोक्तिश्च 'मन्थव्यथाव्युपशमार्थमिव' इत्युत्प्रेक्षाया अङ्गम् ।

यथा वा—

'अनुरागवति सन्ध्या दिवसस्तत्पुरःसरः ।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥'

अत्र लिङ्गसादृश्यप्रयुक्ता समासोक्तिः विशेषोक्तेरङ्गम् । सन्देहसङ्करो यथा—

'इदमाभाति गगने भिन्दानं सन्ततं तमः ।
अमन्दनयनानन्दकरं मण्डलमैन्दवम् ॥'

अत्र किं मुखस्य चन्द्रतयाऽध्यवसानादतिशयोक्तिः, उत इदमिति मुखं निर्दिश्य चन्द्रत्वारोपाद्रूपकम् । अथवा—इदमिति मुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रकृतयोरेकधर्माभिसम्बन्धात् तुल्ययोगिता, आहोस्वित् चन्द्रस्याप्रकृतत्वाद् दीपकम्, किं वा विशेषणसाम्याद् अप्रस्तुतस्य मुखस्य गम्यत्वात्समासोक्तिः, यद्वा अप्रस्तुतप्रशंसा, यद्वा मन्मथोद्दीपनः कालः स्वकार्यभूतचन्द्रवर्णनामुखेन वर्णित इति पर्यायोक्तिरिति बहूनामलङ्काराणां सन्देहात् सन्देहसङ्करः ।

एकाश्रयानुप्रवेशसङ्करो यथा—

'संसारध्वान्तविध्वंसहंसः कंसनिषूदनः ।' इति ।

अत्र रूपकानुप्रासयोरेकाश्रयानुप्रवेशात् सङ्करः ।

यथा वा—'कुरवका रवकारणतां ययुः ।'

इत्यत्र 'रवका रवका' इत्येकं 'वकार वकार' इत्यपरम् इति यमकयोरेकाश्रयानुप्रवेशरूपसङ्करः ।

(१०३) प्रश्नः—अलङ्काराणां परस्परभेदकता प्रकाश्यताम् ?

उत्तरम्—१. पुनरुक्तवदाभास-यमकयोर्भेदः ।

पुनरुक्तवदाभासे 'भुजङ्गकुण्डली—' इत्यादौ भिन्नपूर्विकयोः समानार्थकत्वेन प्रतिभासमानयोः शब्दयोरुपादानम् । यमके तु 'नवपलाश-पलाश—' इत्यादौ समानानुपूर्विकयोरेव भिन्नार्थकयोरुपादानमिति भेदः ।

२. वक्रोक्ति-द्वितीयापह्नुत्योर्भेदः ।

वक्रोक्तौ 'के यूयम्—' इत्यादौ गोपनीयस्य वस्तुनः प्रथमं स्वयमभिधानाभावात् अन्योक्तस्यैव वाक्यस्याऽन्यथाकरणम् । द्वितीयापह्नुतौ तु 'इह पुरोऽनिलकम्पित विग्रहा—' इत्यादौ प्रकाशिताभिप्रायस्य निजवचनस्यैवाऽन्यथाकरणमिति भेदः ।

३. तुल्ययोगिता-शब्दश्लेषयोर्भेदः ।

तुल्ययोगितायाम्—एकस्यैव धर्मस्य अनेकधर्मिसम्बन्धतया प्रतीतिः । शब्द-श्लेषे तु अनेकेषां धर्मिणां पृथक्-पृथक् धर्मसम्बन्धतया अवगम इत्यनयोर्भेदः ।

४. उपमा-रूपकयोर्भेदः ।

उपमायाम् उपमानोपमेयसाधर्म्यस्याऽभिधावृत्तिप्रतिपाद्यत्वम् । रूपके तु सादृश्यमूलत्वात् व्यञ्जनावृत्तिलभ्यत्वम् इत्यनयोर्भेदः ।

५. उपमा-अनन्वयोर्भेदः ।

उपमायाम् द्वयोः धर्मिणोरुपमानोपमेयत्वाभिधानम् । अनन्वये तु 'राजीवमिव राजीवम्—' इत्यादौ एकस्मिन्नेव धर्मिणि उपमानोपमेयत्वकल्पनमित्यनयोर्भेदः ।

६. रूपक-परिणामयोर्भेदः ।

रूपके आहार्य्या एव सकृद्भेदबुद्धिः, अनन्तरं साधर्म्यप्रतीतिरेव न तु अभेदबुद्धिः । परिणामे तु वस्तुनोरेककार्यकारित्वरूपसाधर्म्येणाभेदबुद्धिरित्यनयोर्भेदः ।

७. अपह्नुति-रूपकयोर्भेदः ।

अपह्नुतौ—उपमेयप्रतिषेधपुरःसरम् उपमानतादात्म्यारोपणम् । रूपके तु प्रकृतस्य उपमेयस्य अप्रतिषेधेन तत्र तत्र उपमानतादात्म्याध्यास इत्यनयोर्भेदः ।

८. अतिशयोक्ति-सन्देहयोर्भेदः ।

अतिशयोक्तौ 'मध्यं तव सरोजाक्षि—' इत्यादौ केवलं संशयमात्रम् । सन्देहे तु उपमेये उपमानस्य संशय अलङ्कारत्वव्यवस्थापक इत्यनयोर्भेदः ।

९. सन्देहोत्प्रेक्षयोर्भेदः ।

सन्देहे कोटिद्वयस्यैव समकक्षतया संशयप्रयोजकयोर्भावाभावकोट्योरेव तुल्यबलत्वम् । उत्प्रेक्षायां तु अतुल्यबलतया उभयोरपि संशयकोट्योरेकस्यां कोटौ निवेश इत्यनयोर्भेदः ।

१०. निश्चय-निश्चयान्तसन्देहयोर्भेदः ।

निश्चये सन्देहनिश्चययोः पृथगाश्रयवृत्तितया वैयधिकरण्यम् । निश्चयान्त-सन्देहे तु—यस्य प्रथमतः सन्देहः तस्यैवान्ते निश्चयदर्शनात् सन्देहनिश्चययोः समानाधिकरण्यम् इत्यनयोर्भेदः ।

११. उपमोत्प्रेक्षयोर्भेदः ।

उपमायाम् उपमानोपमेययोः साधर्म्यस्य वाच्यत्वम् । उत्प्रेक्षायां तु उपमेयस्य उपमानात्मना सम्भावनम् इत्यनयोर्भेदः ।

१२. सन्देह-भ्रान्तिमतोर्भेदः ।

सन्देहे उभयकोटिकं ज्ञानम्, भ्रान्तिमति तु एककोटिकम् इत्यनयोर्भेदः ।

१३. भ्रान्तिमदुत्प्रेक्षयोर्भेदः ।

भ्रान्तिमदलङ्कारे—'मुग्धधिया' 'दुग्धधिया' इत्यादौ भ्रान्तानां वल्लवानां प्रकृत-विषयस्य चन्द्रिकादेः ज्ञानं न भवति । उत्प्रेक्षायां तु उत्प्रेक्षतुः पुरुषस्य सम्भावनाविषयस्य प्रकृतस्यापि ज्ञानं भवतीति उभयोर्भेदः ।

१४. अतिशयोक्ति-उत्प्रेक्षयोर्भेदः ।

अतिशयोक्तौ प्रतीतपदार्थकस्यैव आरोप्यमाणस्य वाक्यार्थपर्यालोचनानन्तरमेव असत्यताप्रतीतिः । उत्प्रेक्षायान्तु वाक्यार्थप्रतीतिसमकाले एव आरोप्यमाणस्य वस्तुनः असत्यतया प्रतीतिः इत्यनयोर्भेदः ।

१५. तुल्ययोगिता-दीपकयोर्भेदः ।

तुल्ययोगितायाम् द्वयोः प्रकृतयोः द्वयोर्वा अप्रकृतयोः पदार्थयोः गुणक्रियाऽन्यतररूपैकधर्मेण परस्परं सम्बन्धः न तु प्रकृताप्रकृतयोः । दीपके तु प्रकृताप्रकृतयोः पदार्थयोः गुणक्रियाऽन्यतररूपैकधर्मेण सम्बन्धः इत्युभयोर्भेदः ।

१६. उपमा-दीपकयोर्भेदः ।

उपमायाम् 'कमलमिव मुखं मनोज्ञमेतत्' इत्यादौ साम्यबोधकानाम् इवादिपदानां नियमेन प्रयोगः । दीपके तु इवादिपदानाम् अप्रयोग एव नियत इत्यनयोर्भेदः ।

१७. प्रतिवस्तूपमा-दीपकयोर्भेदः ।

प्रतिवस्तूपमायाम् प्रकृताप्रकृतान्वयिनः एकस्यैव धर्मस्य विभिन्नाऽकारेण निर्देशः । दीपके तु प्रकृताप्रकृतान्वयिनः एकस्यैव धर्मस्य एकाकारेणैव निर्देश इत्यनयोर्भेदः ।

१८. प्रतिवस्तूपमा-दृष्टान्तयोर्भेदः ।

प्रणिधानगम्यसाम्यस्य उपमानोपमेयगतसामान्यधर्मस्य तुल्यत्वं दृष्टान्ते । प्रतिवस्तूपमायां तु सामान्यधर्मस्य एकत्वमिति अनयोर्भेदः ।

१९. निदर्शना-दृष्टान्तयोर्भेदः ।

निदर्शनायाम् बिम्बप्रतिबिम्बभावापेक्षं विना वाक्यार्थस्यापर्यवसानम् । दृष्टान्ते तु पर्यवसितेन वाक्यार्थेन सामर्थ्यात् बिम्बप्रतिबिम्बताप्रत्यायनम् इत्यनयोर्भेदः ।

२०. अर्थापत्ति-निदर्शनयोर्भेदः ।

अर्थापत्तौ 'दण्डापूप'-न्यायाद् अर्थान्तरप्रतीतिमात्रम् । निदर्शनायां तु वाक्यार्थस्य सादृश्ये पर्यवसानम् इत्यनयोर्भेदः ।

२१. अर्थश्लेष-शब्दश्लेषयोर्भेदः ।

अर्थश्लेषे अभिधाया एकार्थबोधकैरपि शब्दैरभिधालक्षणाभ्यां वृत्तिभ्याम् अनेकार्थस्य प्रतिपादनम् । शब्दश्लेषे तु अभिधामात्रप्रतिपाद्यानेकार्थकशब्दैः अनेकार्थाभिधानम् इत्यनयोर्भेदः ।

२२. अप्रस्तुतप्रशंसा-दृष्टान्तयोर्भेदः ।

अप्रस्तुतप्रशंसायां क्वचिद् अप्रसिद्धस्यापि वस्तुनः प्रतिबिम्बत्वेन उपादानम् । दृष्टान्ते तु सर्वत्र प्रख्यातस्यैव पदार्थस्य इत्यनयोर्भेदः ।

२३. अप्रस्तुतप्रशंसा-समासोक्त्योर्भेदः ।

अप्रस्तुतप्रशंसायां प्रस्तुतस्य गम्यत्वम्, समासोक्तौ तु अप्रस्तुतस्य गम्यत्वम् इत्यनयोर्भेदः ।

२४. पर्यायोक्ति-अप्रस्तुतप्रशंसयोर्भेदः ।

पर्यायोक्तौ कारणवत् कार्यस्यापि प्रस्तुतत्वम् । अप्रस्तुतप्रशंसायां तु कार्यस्य अप्रस्तुतत्वम् इत्यनयोर्भेदः ।

२५. काव्यलिङ्गानुमानार्थान्तरन्यासानां भेदः ।

हेतुस्त्रिधा—ज्ञापको, निष्पादकः समर्थकश्च । तत्र ज्ञापको हेतुरनुमानस्य विषयः, निष्पादको हेतुः काव्यलिङ्गस्य विषयः, समर्थको हेतुश्चार्थान्तर-न्यासस्य विषय इत्येषां परस्परं भेदः ।

२६. उत्प्रेक्षाऽनुमानयोर्भेदः ।

उत्प्रेक्षायां विषयिणः अनिश्चिततया प्रतीतिः । अनुमाने तु—विषयिणः निश्चिततया ज्ञानम् इत्यनयोर्भेदः ।

२७. भ्रान्तिमद्भाविकयोर्भेदः ।

भ्रान्तिमदलङ्कारे अतस्मिन् तत्त्वेन बोधः । भाविके तु—भूतस्य भाविनो वाऽद्भुतस्य वस्तुनः प्रत्यक्षवद् भासमानत्वम् इत्यनयोर्भेदः ।

२८. समाधि-समुच्चयोर्भेदः ।

समाधौ एकस्मिन् कारणे फलसाधनायाऽनुष्ठीयमाने काकतालीयन्यायेन समुपस्थितेन कारणान्तरेण फलस्य सुकरत्वम् । समुच्चये तु मिलितान्येव कारणानि कार्यविशेषं जनयन्ति इत्यनयोर्भेदः ।

२९. अर्थापत्ति-अनुमानयोर्भेदः ।

अर्थापत्तौ ज्ञाप्यज्ञापकयोः नियतसामान्यन्यायेनार्थान्तरप्रतीतिः । अनुमाने तु साध्यसाधनयोः व्याप्तिरूपसम्बन्धेन साध्यज्ञानमिति भेदः ।

३०. परिवृत्ति-पर्याययोर्भेदः ।

परिवृत्तौ एकवस्तुत्यागोऽधिकापरवस्तुपादानरूपो विनिमयः । पर्याये तु अपरवस्तूपादानं प्रति अन्यवस्तुत्यागस्य नियमभाव इत्यनयोर्भेदः ।

३१. कारणमाला-मालादीपकयोर्भेदः ।

कारणमालायां पूर्वपूर्ववस्तुनः परं परं प्रति हेतुत्वमात्रम् । मालादीपके तु पूर्वपूर्वस्य उत्तरोत्तरं प्रति हेतुत्वं सर्वेषामेकक्रियान्वयनियमश्च इत्यनयोर्भेदः ।

३२. असङ्गति-विरोधयोर्भेदः ।

असङ्गतौ — कार्यकारणयोः वैचित्र्याधायकत्वेन भिन्नाधिकरण्यम् । विरोधे तु स्वतः समानाधिकरण्येऽपि कार्यकारणयोः विरोधकल्पनमिति भेदः ।

३३. संसृष्टि-सङ्करयोर्भेदः ।

संसृष्टौ 'तिलतण्डुल-न्यायेन' स्फुटं गम्यमानभेदानां शब्दार्थालङ्काराणां यथासम्भवमेकत्र श्लोके समवस्थानम् । सङ्करे तु—'नीरक्षीर–'न्यायेन अनासादितस्वतन्त्रभावानाम् अलङ्काराणाम् एकस्मिन् आश्रये परस्परम् अनुग्राह्यनुग्राहकभावेन सम्मिश्रणमित्यनयोर्भेदः । इति ।

'साहित्यदर्पणालोकः काव्यतत्त्वप्रकाशकः ।
भूयाच्छ्रेयस्करो नित्यं परीक्षापारगामिनाम् ॥'

इति हिमाचलप्रदेशान्तर्गत-'चम्बा'-नगरस्थिते दयानन्द-संस्कृत-महाविद्यालये प्रधानाचार्यपदमलङ्कुर्वता साहित्यवारिधि-विद्यावाचस्पति-साहित्य-व्याकरण-दर्शनाचार्येत्याद्यनेकोपाधिधारिणः श्रीरामजीलालशर्मणा कृतः साहित्यदर्पणालोकः समाप्तः ।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

शास्त्रिपरीक्षायाम्

प्रथमवर्षे

साहित्यविषये–कवर्ग–पञ्चमपत्रम्

प्रश्नपत्रम् १९८६

१. काव्यप्रयोजनं विशदं सयुक्तिकञ्च निरूपणीयम् ।

२. विश्वनाथाभिमतं काव्यस्वरूपं विविच्य तत्र दोषगुणयोः स्थितिः विविच्या ।

३. वाक्यलक्षणं तद्भेदान् निरूप्य पदस्य स्वरूपं सपदकृत्यं विश्लेषयत ।

४. व्यञ्जनास्वरूपं प्रतिपाद्य, अभिधामूला व्यञ्जना सोदाहरणा प्रतिपाद्या ।

५. रसलक्षणं प्रदर्श्य तदास्वादप्रकारः प्रकाशनीयः ।

६. रसस्यानुकार्यगतत्वं सम्भवति न वेति ग्रन्थाशयं प्रकाशयत ।

७. ध्वनिकाव्यलक्षणं विलिख्य, अविवक्षितवाच्यध्वनेर्भेदद्वयमपि सोदाहरणमुपस्थाप्यम् ।

८. "प्रबन्धेऽपि मतोधीरैरर्थशक्त्युद्भवो ध्वनिरिति" कारिकेयं सोदाहरणा व्याख्येया ।

९. गुणीभूतव्यङ्ग्यस्य स्वरूपं निरूप्य यथामति द्वयोः कयोश्चिद् गुणीभूतव्यङ्ग्ययोरुदाहरणं देयम् ।

१०. अभिधातात्पर्यलक्षणादिभिरेव रसादिबोधो युक्तो न वेति ग्रन्थकारहृदयं स्पष्टयत ।

अथवा

अनुमानेनैव व्यङ्ग्यार्थबोधसम्भवे कृतं व्यञ्जनाव्यापारेणेति नैयायिकमतं युक्तया विश्लेषयत ।

११. अभिनयलक्षणं तद्भेदांश्च प्रतिपाद्य रूपकोपरूपकभेदान् गणयत ।

अथवा

नाटकम्, विष्कम्भकः, सन्धिः, भाणः, चम्पूः, कौशिकी—उपर्युक्ते केषाञ्चित् त्रयाणां लक्षणं लेखनीयम् ।

29-12-2/1/97 0 6 5-99

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

शास्त्रिपरीक्षायाम्

द्वितीयवर्षे

साहित्यविषये-कवर्ग-षष्ठपत्रम्

प्रश्नपत्रम् १९८६

१. दोषस्य लक्षणं विलिख्य सामान्यभेदान् प्रतिपादयत ।

२. अविमृष्टविधेयांशदोषे "यत्तदोर्नित्यसम्बन्धः" इति न्यायस्य व्यवस्था देया ।

३. निम्नाङ्कितेषु काव्यदोषेषु केषाञ्चित् पञ्चानां लक्षणोदाहरणानि लिखतः—

अप्रयुक्तत्वं, निहतार्थत्वं, च्युतसंस्कारत्वं, अर्धान्तरैकपदत्वं, अमतपरार्थत्वं, निर्हेतुत्वं, विद्याविरुद्धता, विध्ययुक्तता ।

४. गुणालङ्कारयोर्लक्षणं विलिख्य तयोः परस्परं भेदाः निरूपणीयाः ।

५. वक्त्राद्यौचित्येन रचनानां कथं व्यत्ययो जायत इति सोदाहरणं प्रतिपादयत ।

६. प्राचीनमतं निराकृत्य अभङ्गश्लेपस्य शब्दालङ्कारत्वं साध्यम् ।

७. त्रयाणां युग्मालङ्काराणां परस्परं भेदाः प्रदर्शनीयाः—

उपमारूपकयोः, रूपकपरिणामयोः, तुल्ययोगितादीपकयोः, काव्यलिङ्गानुमानयोः, संसृष्टिसङ्करयोः ।

८. अधोलिखितेषु केचित् पञ्च अलङ्कारा लक्षणोदाहरणविश्लेषणपुरस्सरं विविच्यन्ताम्—

लाटानुप्रासः, अतिशयोक्तिः, समासोक्तिः, पर्यायोक्तम्, असङ्गतिः, अन्योन्यम्, अर्थापत्तिः, व्याजोक्तिः ।

[stamp]

[illegible]
को।ऽयं

२०४२२ ११
०६२४/इ५११

सम्पूर्णानन्दसंस्कृतविश्वविद्याल... क ग्रन्थ

शास्त्रिपरीक्ष...

... रामजी लाल शर्मा १५-००

... श्री रामजी लाल शर्मा १५ ००

... (प्रश्नोत्तरात्मकः)। मानवल्ली तथा वेताल १४-००

शिशुपालवध-रहस्यम् (प्रश्नोत्तरात्मकः) । १-४ सर्ग । अशोकचन्द्र गौड़ १६-००

सांख्यकारिकादर्शः (प्रश्नोत्तरात्मकः) । श्री राजेन्द्रप्रसाद कोठयारी १०-००

अलङ्कारशास्त्रस्येतिहासः (प्रश्नोत्तरात्मकः) । श्रीपरमेश्वरदीन पाण्डेय १०-००

नलचम्पू-रहस्यम्(प्रश्नोत्तरात्मकः)। १-५ उच्छ्वास । परमेश्वरदीनपाण्डेय १०-००

वेदान्तसार-प्रदीपः (प्रश्नोत्तरात्मकः) । श्री राजेन्द्रप्रसाद कोठयारी ८-००

मध्यसिद्धान्तकौमुदी-चन्द्रिका (प्रश्नोत्तरात्मकः) । विजयमित्र शास्त्री २०-००

मृच्छकटिक-सोपानम् (प्रश्नोत्तरात्मकः) । डॉ० नरेश झा १५-००

वेणीसंहार-रहस्यम् (प्रश्नोत्तरात्मकः) श्री परमेश्वरदीन पाण्डेय १०-००

नैषध-रहस्यम् (प्रश्नोत्तरात्मकः) । १-५ सर्ग । श्री रमाशंकर मिश्र १६-००

दशरूपक-रहस्यम् (प्रश्नोत्तरात्मकः) । श्री त्रिलोकीनाथ द्विवेदी १२-५०

भट्टिकाव्य-दर्पणः (प्रश्नोत्तरात्मकः) । श्री प्रज्ञान भिक्षु । १-४ सर्ग १५-००
५-८ सर्ग १५-००

भट्टिकाव्यालोकः (प्रश्नोत्तरात्मकः) । ...शंकर मिश्र । १४-१७ सर्ग १५-००
१८-२२ सर्ग १५-००

चन्द्रकलानाटिका-रहस्यम् (प्रश्नोत्तरात्मकः) । श्री परमेश्वरदीन पाण्डेय ७-५०

संस्कृतसाहित्येतिहासः (प्रश्नोत्तरात्मकः) । श्री परमानन्द शास्त्री १२-५०

रसगङ्गाधर-रहस्यम् (प्रश्नोत्तरात्मकः) श्री ज्ञानचन्द्र त्यागी १४-००

लघुसिद्धान्तकौमुदी-चन्द्रिका (प्रश्नोत्तरात्मकः) । विजयमित्र शास्त्री २०-००

कादम्बरी-कलाप्रकाशः (प्रश्नोत्तरात्मकः) । डॉ० नरेश झा १५-००

लघुमञ्जूषारहस्यम् (प्रश्नोत्तरात्मकः) । स्वामी रामेश्वर पुरी ६-००

शाकुन्तलरहस्यम् (प्रश्नोत्तरात्मकः) श्री त्रिलोकीनाथ द्विवेदी १५-००

मेघदूत-तत्त्वालोकः (प्रश्नोत्तरात्मकः) । डॉ० अशोकचन्द्र गौड़ शास्त्री १०-००

महाभाष्यनवाह्निकालोकनम् (प्रश्नोत्तरात्मकः) विजयमित्र शास्त्री १६-००

मुक्तावली-प्रकाशः (न्यायसिद्धान्तमुक्तावली-प्रश्नोत्तरी) ।
श्री राजेन्द्रप्रसाद कोठयारी १५-००

औचित्यविचारचर्चा-मञ्जरी (प्रश्नोत्तरात्मकः) । डॉ० नरेश झा १०-००

वक्रोक्तिजीवितम् (प्रश्नोत्तरात्मकः) । डॉ० नरेश झा ७-५०

भारतीयसंस्कृति-सोपानम् (प्रश्नोत्तरात्मकः) । डॉ० शिवप्रसाद द्विवेदी १२-५०